


# दार्शनिकी शिक्षाधारा




लेखकः

डा. रामचन्द्रुल बालाजी



श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्

Shree Somnath Sanskrit University-Veraval-Gujarat

2013

# ।। दार्शनिकी शिक्षाधारा ।।

प्रधानसम्पादकः

**प्रो. वेम्पटि कुटुम्बशास्त्री**

लेखकः

**डा. रामचन्द्रुल बालाजी**



**प्रकाशनम्**

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५३२,३३ फेक्स : २४४४१७

www.shreesomnathsanskrituniversity.org

**प्रकाशकः** -

**डॉ. दशरथः जादवः**
कुलसचिवः
श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्
युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५
जुनागढजनपदम् (गुजरात)

**प्रथमं संस्करणम्**

फ़रवरी, २०१३

**प्रतयः**

३००

**ISBN**

978-93-83097-05-0

**मूल्यम्**

रु. १००/-

**मुद्रकः**

एच. के ओफसेट, वेरावलम्

# ।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'उज्जयिनीनगरे'** आयोजिते **''संस्कृतसाहित्योत्सवे'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। अध्यापकानां छात्राणां च कृते **डा. रामचन्द्रुल बालाजी** रचितोऽयं **दार्शनिकी शिक्षाधारा** नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

*प्रो. वी. कुटुम्बशास्त्री*

**कुलपतिः**

# प्रास्ताविकम्

आर्षज्ञानगर्भा वेदराशयः । ते एव दर्शनवेदाङ्गस्मृतीतिहासपुराण-तन्त्रागमकाव्यसङ्गीतकलापात्मना विस्तारङ्गतस्य लौकिकालौकिकसंस्कृतवाङ्मयस्य मूलभूताः भवन्ति । मन्त्रद्रष्टारः ऋषयो जनसामान्यस्य लौकिकालौकिकश्रेयोभिलाषिणः अमुम् अमूल्य निधिम् अस्मभ्यं प्रादुः । अत्र न केवलम् अलौकिकपरमपुरुषार्थमोक्ष-साधनविषयिणी चिन्ता, परन्तु तदङ्गतया लौकिकाभ्युदयाय विचारः, अपि जागर्ति । वेदसंहितायां प्रतिपादितानां विषयाणां सुकुमारमतिभिः दुर्ग्राह्यतया महर्षयः विषयान् सरलीकृत्य दर्शनानि व्यरचयन्त । दर्शनेषु विस्तृतान् विचारान् ते प्रत्यपीपदन् । विशिष्य शिक्षासम्बद्धविषयाः अपि अत्र बोभूयन्ते ।

अत्र मया विषयप्राधान्यदृष्ट्या केवलं कानिचन दर्शनानि एव स्वीकृतानि । स्वांख्ययोगयोः विचारसाम्यात् एकाध्यायरूपेण, न्यायवैशेषिकयोः लक्ष्यैक्यात् एकाध्ययरूपेण, पूर्वोत्तरमीमांसे एकाध्ययरूपेण, नास्तिकदर्शनेषु जैनबौद्ध दर्शने, तद्वदेव दार्शनिकतथ्यानि स्वकीयचिन्तनैः प्रतिपादितवतां केषाञ्चन महतां विचाराः अपि अस्मिन् ग्रन्थे विन्यस्ताः । गुरोः स्वरूपं किम् ? गुरोः कर्तव्यानि कानि ? छात्रस्वरूपम् किम् ? के उत्तमविधयः? इत्यादि विचाराः दर्शनेषु विराजन्ते । ते शिक्षाशास्त्रविचाराः यावच्छक्ति अस्मिन् ग्रन्थे उपनिबद्धाः वर्तन्ते । शिक्षाशास्त्रलोकस्य नूनमयं ग्रन्थः उपकारको भवेदिति विश्वसिमि । यदि ग्रन्थोऽयं छात्राणां लाभाय कल्पेत तर्हि कृतकृत्यतामनुभवामि ।

एतद्ग्रथने जीवातुभूतेभ्यः वेदान्तादिशास्त्रेषुकृतभूरिपरिश्रमेभ्यः, अस्य ग्रन्थस्य प्रकाशने उपकृतवद्भ्यः आचार्येभ्यः वेम्पटिकुटुम्बशास्त्रिवर्येभ्यः साष्टाङ्गप्रणामपूर्वकं कृतज्ञतां विनिवेदयामि । एतद्ग्रन्थलेखने मार्गनिर्देशनेन सर्वविधसहकारं दत्तवद्भ्यः आचार्येभ्यः शिक्षाशास्त्रपारङ्गतेभ्यः रामानुजदेवनाथवर्येभ्यः कार्तज्ञ्यं विनिवेदयामि ।

परमकारुणिकानां श्रीमज्जगद्गुरुशृङ्गेरीशारदापीठाधीश्वराणाम् अनन्तश्रीविभूषितानां **श्रीश्रीभारतीतीर्थमहास्वामिनाम्,** भगवत्याः **शारदाम्बायाश्च** चरणनलिनयोः साष्टाङ्गं प्रणतिततीः समर्पयामि ।

शृङ्गेरी
नन्दनपौषपूर्णिमा
27.01.2013

विद्वज्जनसमाराधकः
डा.रामचन्द्रुल बालाजी

# विषयसूची

# भारतीयदर्शनानि शिक्षा च

## भारतीयदर्शनानि-तेषां स्वरूपम्

'दृश्यते यथार्थरूपतया ज्ञायते अनेन अलौकिकार्थ इति दर्शनम् इति व्युत्पत्या अलौकिकार्थ विषयकयथार्थज्ञानजनकानि दर्शनानीति ज्ञायते ।

तादृशदर्शनानि प्रथमतः आस्तिकनास्तिकभेदेन द्विविधानि । तत्र प्रथमतः नास्तिक दर्शनानां स्वरूपं संक्षेपणोच्यते।

नास्तिकदर्शनानि चार्वकबौद्धजैनानीति त्रिविधान्यपि, बौद्धदर्शनं शिष्यबुद्धिभेदमनुसृत्य माध्यमिक-योगाचार-सौत्रान्तिक-वैभाषिकरूपेण चतुर्विधमितिआहत्य नास्तिकदर्शनानि षट् । एतानि नास्तिक दर्शनानि वेदप्रामाण्यं परलोकास्तित्वं जन्मान्तरं च नाभ्युपगच्छन्ति' ।

## चार्वाकदर्शनम् -

तत्र नास्तिकशिरोमणिना चार्वाकेन प्रतिपादितं दर्शनं चार्वाकदर्शनम् इति केचन। अस्यैव दर्शनस्य बार्हस्पत्यमिति, लोकायतमिति च नामान्तराणि वर्तन्ते। एवमेव बृहस्पतिः,अजितकेशकम्बलपुरन्दराः अस्य प्रवर्तकाः इत्यापि च मत भेदाः वर्तन्ते ।

'यावज्जीवं सुखम जीवेत्, नास्तिमृत्योरगोचरः' भस्मीभूतस्य देहस्य पुनरागमनं कुतः' इति लोकानुसारित्वात् लोकायतमिति तस्यान्वर्थं नाम। अस्मिन् मते प्रत्यक्षमेकमेव प्रमाणम् । अतः प्रत्यक्षगोचराभावात् न परलोकः विद्यते । पुण्यं पापं वा नास्ति । अनुमानादिसिद्धः ईश्वरः नाङ्गीक्रियते । किन्तु लोकप्रसिद्धः राजैव परमेश्वरः । देह एव आत्मा । मरणमेव मोक्षः । कान्तालिङ्गानादि सुखमेव पुरुषार्थः । अतः अस्मिन् मते अर्थकामावेव पुरुषार्थौ । कण्टकादिजन्यदुःखमेव नरकः । तस्मात् भक्ष्याभक्ष्यादि विचारणा निरपेक्षं यावदनुभोक्तुं शक्यते तावत्सुखं सम्पादनीयमेव। तदेतन्मतं श्रवणसमये मनोहरमपि परिणामे दुःखदायि भवतीति शिष्टविगर्हितं एतन्नास्तिकमतम् अनुपादेयम्' ।

## बौद्धदर्शनम् -

बुद्धाख्यं देवमनुसरन्तः इति बौद्धाः । तेषां दर्शनं बौद्धदर्शनम् । ते च बौद्धाः माध्यमिक-योगाचार, सौत्रान्तिक-वैभाषिकभेदेन चतुर्विधाः प्रसिद्धाः' ।

**माध्यमिकाः-**

तत्र भगवता बुद्धेन प्रथामतः स्व शिष्येभ्यः सर्वं शून्यमित्युपदेशे कृते तदेव यथार्थत्वेन परिगृह्य तदुपरि आक्षेपमकुर्वन्तः मध्यमबुद्धित्वात् ते माध्यमिकसंज्ञां प्रापुः। एतेषामयमाशयः। गुरुणा बुद्धेन 'सर्वं क्षणिकं, सर्वं दुःखम् सर्वं स्वलक्षणम्, सर्वं शून्यम्' इति भावना चतुष्टयोपदेशात् प्रथमभावनया सर्वस्थायित्वनिराकरणेन, द्वितीयभावनया अनुकूल वेदनीयत्वनिराकरणेन, तृतीय भावनया सर्वानुगतत्वनिराकरणेन, चतुर्थभावनया सर्वसत्यत्वनिराकरणेन सर्वशून्यत्वमेवास्माकं गुरुणा बुद्धेन बोधितमिति, निश्चयवन्तस्सञ्जाताः। अतः एते सर्वशून्यत्ववादिनः'।

**योगाचाराः-**

अपरे शिष्याः सर्वस्य शून्यत्वं कथं सम्भवति, तथासति ज्ञानस्यापि शून्यत्वेनजगदन्ध्य प्रसङ्गः। अतः बाह्यार्थस्य शून्यत्वमस्तु नाम, आन्तरस्य ज्ञानस्यास्तित्वमेव। शिष्येनावश्यं द्वयं करणीयम्। योगः, आचारश्चेति। तत्र अज्ञातार्थस्य ज्ञानस्याक्षेपः योगः'। गुरूक्तार्थस्य अङ्गीकरणम् आचारः। ततश्च यैः शिष्यैः गुरूक्तं भावना चतुष्टयम्, बाह्यार्थशून्यत्वं चाङ्गीकृत्य सर्वस्य शून्यत्वे आक्षेपः: कृतः ते योगाचाराः इति प्रसिद्धिं गताः। अत एव योगाचाराः बाह्यार्थशून्यत्ववादिनः, विज्ञानमात्रास्तित्ववादिनश्च' इति उच्यन्ते। एतेषामयमाशयः। अनादि वासनावशात् बुद्धिरेव अनेकाकारेण (घटपटादि रूपेण) भासतेति पूर्वोक्तभावनाचतुष्टयबलात् सर्ववासनोच्छेदे विविध विषयाकारोपद्रवानुदयात् विशुद्धज्ञानोदयो मोक्षः संबध्यतेति'।

**सौत्रान्तिकाः-**

अन्येतु नीलादेः बाह्यार्थस्यापि अस्तित्वमवश्यमङ्गीकरणीयम्। बाह्यपदार्थानङ्गीकारे नीलाद्यर्थस्य ज्ञानाकारत्वे अहं नीलमिति ज्ञानं स्यात्। नत्विदं नीलमिति शिष्टे प्रश्ने कृते? गुरुणा एव मुक्तम्। भवतु बाह्यार्थः परं तु न स प्रत्यक्षः, किन्त्वनुमेयः इति। तदनन्तरं कियत् पर्यन्तं सूत्रं भवेदिति पृष्टत्वात् ते सौत्रान्तिकाः इति प्रसिद्धाः। सूत्रान्तं पृच्छन्तीति 'पृच्छतौसुस्नातादिभ्यः' इति सूत्रेण 'ष्ठक्' प्रत्यये कृते सौत्रान्तिकाः इति रूपम्'।

**वैभाषिकाः-**

केचित् शिष्याः एवम् ऊचुः । अनुभवानुसारेण घटपटादि बाह्यपदार्थः यथा अङ्गीक्रियते तथा 'घटं पश्यमि', 'शब्दं शृणोमि' इत्यनुभवफलात् घटपटादि बाह्यार्थस्य प्रत्यक्षत्वमप्यङ्गीकरणीयम् । एवं च बाह्येषु घटपटादिषु आन्तरेषु विज्ञानादिषुचार्थेषु प्रत्यक्षेषु सत्सुकथं गुरुः सर्वशून्यमिति कांश्चिदुपदिष्टवान्? अनन्तरं विज्ञानमेव सदिति कथमुपदिष्टवान्? अनंतरं बाह्यमन्तरं च सदित्यभिप्रेत्य बाह्यम्-अनुमेयमिति कथमुक्तवान्? सेयं गुरोर्भाषा विरुद्धेति बृवाणाः वैभाषिकसंज्ञया प्रसिद्धाः । बौद्धास्तु प्रत्यक्षमनुमानं चेति प्रमाण द्वयमभ्युपगच्छन्ति ।

**जैनदर्शनम्-**

अर्हन् (जिन) नामकं परमेश्वरं मन्यमानाः आर्हताः तेषां दर्शनम् (आर्हत) जैनदर्शनम् । अत्र जीवाजीवौ, पुण्यपापे, आश्रवसंवरौ, बन्ध-निर्जर-मोक्षाश्चेति नव तत्त्वानि । एतन्मते घटपटादयः सन्तीति न निश्चेतुं शक्यन्ते । नापि न सन्तीति । अतः सर्वे पदार्थाः भावाभावात्मकाः । सम्यक्दर्शन- सम्यक्ज्ञान-सम्यक् चारित्रैश्च मोक्षः सिद्ध्यति । स च मोक्षः, देहात्मक -आवरणापगमे सततोर्ध्वगमनम्' । एते च चार्वाकप्रभृति आर्हतपर्यन्ताः वेदविरोधित्वात् नास्तिकाः इत्युच्यन्ते । वेदविरोधित्वमेव नास्तिकत्वमित्यर्थः । इति षण्णास्तिक दर्शनस्वरूप संक्षेपः' ।

एवम् आस्तिकदर्शनान्यपि षट् । पूर्वोत्तरमीमांसे, सांख्ययोगौ न्यायवैशेषिके चेति । एते सर्वे वेदप्रामाण्यवादिनः । एतेषां दर्शनानां क्रमेण जैमिनिः व्यासमहर्षिः, कपिलः, पतञ्जलिः, गौतमः, कणादश्च प्रवर्तकाः ।

**पूर्वमीमांसादर्शनम् -**

द्वादशाध्यायात्मकम् पूर्वमीमांसादर्शनं जैमिनिमहर्षिणा प्रणीतम् । 'अथातो धर्म जिज्ञासा' इत्यादिना अस्मिन्दर्शने धर्मस्य तत्सम्बन्धि प्रमाणादीनां च विचारः कृतः । अस्मिन् दर्शने ईश्वरः नाङ्गीक्रियते । कर्मैव फलप्रदम् । कर्मफलदातृत्वेन ईश्वरकल्पना अनर्थिका । ज्योतिष्टोमादि कर्मभिरेव निरतिशयसुखात्मकः मोक्षः लभ्यते , स्वर्गस्य यागादि फलस्य निरतिशय सुखरूपत्वात् । एते च मीमांसकाः वेदस्य स्वतः प्रामाण्यमभ्युपगच्छन्ति । नैयायिकादीनां मते प्रामाण्यं परतो ग्राह्यम् । अस्मिन् मते स्वतो ग्राह्यम् । अस्मिन् च दर्शने कुत्रचित् प्रदेशेषु प्राभाकर-मुरारिमिश्र-भाट्टादि

भेदेन ईषन्मतभेदः दरीदृश्यते। 'प्रत्यक्षानुमानोपमान शब्दार्थापत्त्यनुपलब्धयः' षट् प्रमाणानि अङ्गीक्रियन्ते एतैः ।

**उत्तरमीमांसादर्शनम्-**

अस्य दर्शनस्य प्रवर्तकः ब्रह्मसूत्राणां रचयिता व्यासमहर्षिः । अस्य च औपनिषदं दर्शनमिति नामान्तरमपि वर्तते । उपनिषदर्थनिर्णयाय भगवान् वेदव्यासः अध्यायचतुष्टयात्मकतया ब्रह्मसूत्राणि प्रणिनाय । उपनिषत्सु तदर्थप्रतिपादकब्रह्मसूत्रेषु च 'ज्ञानादेव तु कैवल्यम्' इत्यत्रनास्ति मतभेदः । मोक्षसाधनं ज्ञानं कीदृशमित्यत्र अनेके मतभेदाः दृश्यन्ते । तदनुरोधेनैव द्वैतं, अद्वैतं, विशिष्टाद्वैतमित्यादीनि मतानि व्याप्तानि ।

तत्र द्वैतं माध्वसम्मतम्। विशिष्टाद्वैतं रामनुजसम्मतम्। शङ्करभागवत्पादास्तु अद्वैतपरतया उपनिषदां ब्रह्मसूत्राणां व्याख्यामकुर्वन्। 'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः' इति एतेषां परमस्सिद्धान्तः । अस्मिन् दर्शने जीवस्य ब्रह्माभेदज्ञान एव मोक्षः । ब्रह्माभेदस्य वास्तविकत्वेऽपि अविद्यया - अनुभवगोचरो न भवति ।
'अविद्यास्तमयोमोक्षः, सा च बन्ध उदाहृतः' अविद्या नाशोमोक्षः, अविद्यैव बन्ध इति वदन्ति। अविद्या परिणामभूतान्तः करणावच्छिन्न चैतन्यमेव जीवः। स च अनादिः

'जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा ।
अविद्या तच्चित्तेर्योगः षडस्माकमनादयः' ॥

जीवः ईश्वरः, शुद्धचैतन्यं, जीवेश्वर भेदः, अविद्या-अविद्या चैतन्यसम्बन्धः एते षड् पदार्थाः अद्वैतदर्शनरीत्या अनादयः । जीवत्वेश्वरत्वादिकं कल्पितम् । जपाकुसुमसान्निध्यात् स्पटिके लौहित्यमिव कर्तुत्वभोक्तृत्वादि रहिते आत्मनि, कर्तुत्व भोक्तृत्वादि सहित अन्तःकरणसम्बन्धात् कर्तृत्वभोक्तृत्वादिकं प्रतीयते। एतत् सर्वमविद्या कल्पितम् । निर्गुणब्रह्मसाक्षात्कारेण अविद्यायाः नाशे ब्रह्माभेदः सिद्धो भवति । अखण्डब्रह्मसाक्षात्काराय त्रीणि साधनानि। 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इत्युक्तरीत्या श्रवण-मनन-निदिध्यासनादीनि । सांख्यदर्शने प्रकृतेः कर्तृत्वं पुरुषस्य भोक्तृत्वम् अङ्गीक्रियते। अद्वैतदर्शनेतु वास्तवं भोक्तृत्वमपि नाङ्गीक्रियते। अकर्ता अभोक्ता च परमेश्वरः ।

मीमांसादर्शनवत् 'प्रत्यक्षानुमानोपमानशब्दार्था अर्थापत्यनुपलब्धयः' षड्प्रमाणानि अस्मिन् दर्शने । अन्तःकरणपरिणात्मिकावृत्तिर्जानम् । प्रत्यक्षस्थले इन्द्रियप्रणाल्या स्वच्छं द्रवद्रव्यमन्तःकरणं बहिर्निर्गत्य विषयाकाराकारितं भवतीति एतेषां प्रक्रिया ।

**सांख्यदर्शनम्-**

सांख्यदर्शने संग्रहेण पदार्थानां चतुर्था वर्गीकरणम् कृतम् । कश्चन पदार्थः प्रकृतिरेव, कश्चन पदार्थः विकृतिरेव, कश्चन प्रकृतिः विकृतिश्च । कश्चिदनुभयः इति । तत्र केवलप्रकृतिपदेन प्रधानम् ग्राह्यम् । प्रधानं न कस्यचित् विकृतिः । सत्वरजस्तमोगुणानां साम्यावस्था मूलप्रकृतिः । महदादेः प्रपञ्चस्य मूलम् । महदहंकारतन्मात्राणि विकृतयः प्रकृतयश्च । तदुक्तं 'महदाद्याः प्रकृतिविकृतयः सप्तसत्ता इति । प्रधान कार्यत्वात् विकृतित्वम् । पञ्चीभूत पञ्चभूतानां कारणत्वात् प्रकृतित्वं च । केवला विकृतिः ज्ञानेन्द्रियपञ्चकम्, कर्मेन्द्रियपञ्चकम्, मनः, वियदादि पञ्च भूतानि इति षोडशकस्तु विकारः इति कारिका । अनुभयात्मकः पुरुषः, न प्रकृतिः, नापि विकृतिः पुरुषः । एवं च सांख्यदर्शने पञ्चविंशति तत्त्वानि – अङ्गीकृतानि । तत्र क्रमोप्येवम् । प्रकृतेर्महान्, महतोऽहंकारः, अहंकारात् षोडशकः गणः (नाम अपञ्चीकृतपञ्चभूतानि, ज्ञानेन्द्रिय पञ्चकं, कर्मेन्द्रिय पञ्चकं मनः) अपञ्चीकृत पञ्चभूतेभ्यः पञ्चभूतान्यस्मिन्दर्शने ।

'दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टम्' सांख्यकारिका (4) इति प्रत्यक्षानुमानागमाः त्रीणि प्रमाणानि । एते सांख्याः सत्कार्यवादिनः। पूर्वं कारणे सदेव कार्यमभिव्यज्यते । परिणामवादः एतद्दर्शन सम्मतः ।

प्रकृतिपुरुषविवेकज्ञानात् मोक्षः । प्रकृतिः कर्त्री, पुरुषस्तु पुष्करपलाशवत् निर्लेपः, किन्तु चेतनः । प्रकृतितादात्म्याभिमानात् पुरुषे कर्तृत्वाभिमानः । पुरुषसंसर्गवशात् प्रधाने चैतन्याभिमानश्च भ्रमः । अत्र चेतनपदेन जीव एव गृह्यते । जीवातिरिक्तेश्वराङ्गीकारे सेश्वरं सांख्यं भवति । नो चेत् निरीश्वरं सांख्यम् ।

**योगदर्शनम्-**

पतञ्जलिप्रणीतं योगदर्शनं पादचतुष्टयात्मकम् । तत्र प्रथमपादे 'अथ योगानुशासनम्' इति योगशास्त्रारम्भप्रतिज्ञां विधाय 'योगश्चित्तवृत्ति निरोधः' इति योगलक्षणमुक्त्वा समाधेः सम्यक् विवरणम् प्रदर्शितम् ।

द्वितीयपादे 'तपस्स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इत्यादिना व्युत्थितचित्तस्य क्रियायोगं यमादीनि पञ्च बहिरङ्गसाधनानि निरूपितानि।

तृतीयपादे 'देशबन्धः चित्तस्य धारणा' इत्यादिना धारणध्यानसमाधित्रयं, अन्तरङ्गसाधनम्, तदवान्तरफलं विभूतिजातं च निरूपितम्।

चतुर्थेपादे 'जन्मौषधिमन्त्रातपः समधिजाः सिद्धयः' इत्यादिना सिद्धिपञ्चकविवरणपुरस्सरं कैवल्यं निरूपितम्

अस्मिन्योगदर्शने सांख्यदर्शनवत् पञ्चविंशति तत्त्वानि सम्मतानि। फलं 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः' इति ईश्वरप्रतिपादनात् परमेश्वरः षड्विंशतत्त्वेन स्वीक्रियते।

यथा चिकित्साशास्त्रं रोगः, रोगहेतुः, आरोग्यं, तदुपायात्मकभेषजमिति चतुर्व्यूहं, तथा योगदर्शनमपि संसारः, संसारहेतुः, मोक्षः, मोक्षोपायाः इति चतुर्व्यूहात्मकम्।

**न्यायदर्शनम्–**

गौतममहर्षिणा प्रोक्तमिदं न्यायदर्शनम्। अस्मिन् 'प्रमाण–प्रमेय–संशय–प्रयोजन–दृष्टान्त सिद्धान्तावयवतर्कनिर्णयवाद जल्पवितण्डा हेत्वाभास च्छलजाति निग्रहस्थानानां तत्त्वज्ञानान्निश्रोयसाधिगमः' इति षोडशपदार्थनां तत्त्वज्ञानात् मोक्षप्राप्तिरभिहिता। तत्रापि क्रमः, 'दुंखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इत्यभिहितः। आत्यन्तिक दुःखनिवृत्तिरेव अस्मिन्दर्शने मोक्षः। 'दुःखेन आत्यन्तं विमुक्तश्चरति' इति शृतिरत्रप्रमाणम्। प्रपञ्चः सत्यः, जीवेश्वरभेदोऽपिसत्यः। दर्शनेऽस्मिन् 'प्रत्यक्षानुमानोपमान शब्दाः' चत्वारि प्रमाणानि। षोडशपदार्थनिरूपणपरस्यापि अस्य दर्शनस्य न्यायदर्शनमिति नाम 'आसाधारण्येन व्यपदेशाः भवन्ति' इति न्यायेन परार्थानुमानात्मकन्यायस्य प्राधान्येनात्र विचारितत्वात् समागतम्। अस्यैव 'आन्वीक्षकीति' नामान्तरम्।

अनु=प्रत्यक्षागमाभ्यां पश्चात्

ईक्षणम् – अस्याम् इत्यान्वीक्षकी। आत्मनः इतरविलक्षणत्वेन ज्ञानं मोक्षसाधनम्। आत्मनः इतरविलक्षणत्वं च तत्तत्पदार्थलक्षणपरिज्ञानपूर्वकमित्यस्मिन् दर्शने षोडश पदार्थानां लक्षणानि सम्यक् प्रतिपादितानि।

एतेनैयायिकाः पिठरपाकवादिनः । आमनिक्षिप्ते सर्पादिचित्रसहित घटे, आपरमाण्वन्तं नाशेसति पुनः सर्पादि सहितस्य घटस्वरूपस्योत्पत्तिः कथं भवेत्? अतः अग्निसंयोगविशेषात् सूक्ष्मावयवानामपि रूपनाशः रूपान्तरोत्पत्तिः भवति । अतः पिठरेऽपि पाकः इति कथनमेवयुक्तमित्येते' ।

**वैशेषिकदर्शनम्-**

अस्य दर्शनस्य प्रवक्ता कणादमहर्षिः । अस्मिन्दर्शने दशाध्यायाः वर्तन्ते । अस्मिन् दर्शने

इतरभेदसाधकतया परमाण्वादिषु नित्येषु विशेषरूपपदार्थः प्रत्येकमङ्गीक्रियते इति वैशेषिकदर्शनमिति नाम सार्थकम् । विशिष्यते सर्वतो व्यवच्छिद्यते येन सः विशेषः ।

अस्मिन् दर्शने द्रव्यगुणकर्मसामान्यविशेषसमवायाः षडेवपदार्थाः । यथाः - धर्मविशेषप्रसूतात् द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्' इति कणादं सूत्रम् ।

प्रत्यक्षानुमाने एव प्रमाणे । अस्मिन्दर्शने आगमस्यापिअनुमानद्वारैव प्रामाण्यमिति तेषां मतम् . पीलुपाकवादिनो वैशेषिकाः । आमनिक्षिप्ते घटे अग्निसंयोगकारणात् श्यामघटनाशः पुनः द्व्यणुकादि क्रमेण रक्तघटोत्पत्तिः भवति । तत्र रूपपरिणामः कथं भवतीत्यत्र वैशेषिकाः एवं कथयन्ति । अग्निसंयोगात् अदृष्टवशाच्च परमाणुपर्यन्तं घटः शिथिलः भवति । तदानीं परमाणुषु विद्यमानश्यामरूपः नष्टः । पाकान्तरवशात्रक्त रूपत्वेन' परिणामं प्राप्नोति । पुनः अदृष्टवशात् परमाणवः द्व्यणुकादि क्रमेण घटाकारं प्राप्नुवन्ति । अतः पीलुः नाम परमाणुः । पीलुषु एव पाकः अङ्गीक्रियते एतैः इति पीलुपाकवादिनः ।

कणादस्यैव उलूक इति नामान्तरं वर्तत इति औलूकदर्शनमित्यपि व्यवह्रियते ।

अक्षपाददर्शनमिति न्यायदर्शनस्यापरं नाम ।

दर्शनद्वयेऽपि तत्त्वज्ञानात् निश्रेयसप्राप्तिरित्युक्तम् ।

मोक्षश्चात्यन्तिकी दुःखनिवृत्तिः । स च तत्त्वज्ञानानन्तरमेव न जायते, किन्तु तत्त्वज्ञानेन दुःखजन्म प्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरस्य नाशे सति तत्पूर्व भाविदोषादीनां नाशात्क्रमेणापवर्गः सिध्यति ।

मोक्षसाधनी भूतज्ञानविषयाणि तत्त्वानि प्रमाण, प्रमेय, संशयेत्यादिना गौतमेन षोडशोक्तानि । कणादेन तु षडेवोक्तानि । तेषु षट्स्वेव गौतमोक्तानां षोडशपदर्थानाम यथायथमन्तर्भावः सिध्यति । अत एव षोडशपदार्थवादिनो नैयायिकाः, षट्पदार्थवादिनश्च वैशेषिकाः इति व्यवहारः ।

**शिक्षायाः अर्थः –**

अथ 'सा विद्या या विमुक्तये' । इति आसीत् उपनिषद्समयः । 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इति खलु वेदघोषः । सा विद्या एव प्रकृष्टा या विद्या मुक्तिं प्रददाति । वेद-शास्त्र-विज्ञानादीनां साध्वनुशीलने तत्त्वार्थज्ञानं च विद्येति स्वीक्रियते । उपनिषदाम् अनुसारेण द्वे विद्ये परा अपरा च । यया विद्यया लौकिकं ज्ञानं जायते, सा अपरा विद्या । यया च अक्षर-ब्रह्मविषयकं ज्ञानं जायते, सा परा विद्या । लोकेऽस्मिन् विद्या एव तज्जोतिः यद् मानवे ज्ञानज्योतिं ज्वालयति, अविद्यान्धतमसं व्यपोहति, दुर्गुणगणं वारयति, सद्गुणततिं संचारयति, कीर्तिं प्रथयति, गौरवं विकासयति, यशो वितनोति, भूभृत्सु च आदरम् आवहति । एषा मातृवत् संरक्षिका, पितृवत् सत्पथप्रदर्शिका, कान्तावत् सुखदा मनोरञ्जिकाच, कीर्तिप्रदा, वैभवदायिनी, दुर्गुणगणनाशेन मनसः पावयित्री च । सर्वमनोरथपूरणात् सेयं कल्पलतेति परिज्ञायते ।

**शिक्षायाः शाब्दिकार्थः(Meaning of Education)**

**(a) शिक्षायाः शाब्दिकार्थः (Etymological Meaning of Education)**

शिक्षायाः शाब्दिकार्थे शब्दस्य कोऽर्थः अभिप्रेत इत्यस्मिन् विषये चर्चा विधीयते । 'शिक्षा' इति शब्दः 'शिक्ष विद्योपादने' इति धातोः निष्पन्नोऽस्ति । यस्य च अर्थः भवति शिक्षणम् अध्ययनम् वा । एवमेव 'विद्या' इति शब्दः 'विदलृ उपादाने' इति धातोः निष्पन्नोऽस्ति । सोऽपि पूर्वोक्तार्थमेवाभिप्रैति । आङ्ग्लभाषायां शिक्षा इति शब्दः Education नाम्नाभिधीयते । Education इति शब्दः लेटिन् भाषायाः Educatum, Educare तथा Educere इति पदत्रयस्याधारेण उत्पन्नः इति शिक्षाशास्त्रिणामभिमतम् । तत्र यथाक्रमं विवरणं दीयते –

**Educatum**

E — Out of (बहिरानयनम्)

Duco — To lead forth or To extract out (आन्तरिकं वस्तु)

शिक्षा – आन्तरिकशक्तेः बहिरानयनम् अथवा अन्तस्थशक्तीनां बहिर्निष्क्रमणमित्यर्थः ।

**(b) Educare -** To bring up, To rise, To educate. लालनम् अथवा पालनम् इति ।

**(c) Educere -** To bring out, To lead out.

**काश्चन परिभाषा –**

1. अविद्याद्यशुभगुणानां परित्यागपूर्वकं, विद्यादिशुभगुणानां स्वीकारेण सदानन्दमयजीवनयापनं नाम शिक्षा अथवा शीलनिर्माणमेव शिक्षा – *स्वामिदयानन्दसरस्वती* ।

2. अस्माकं जीवनस्य सर्वासामपि समस्यानां समाधानार्थं विद्यमानः राजपथ एव शिक्षा । The highest education is that which makes our life in harmony with all existence - ***Rabindranath Tagore.***

3. मानवान्तर्निहित–मानसिक–आध्यात्मिकशक्तीनां निर्माणमेव शिक्षा वर्तते – *अरविन्दः* ।

4. मानवान्तर्निहितायाः पूर्णतायाः अभिव्यक्तिः शिक्षा अथवा मानवान्तर्निहितदैवात्मस्वरूपाभिव्यञ्जनमेव शिक्षा – *स्वामिविवेकानन्दः* ।

5. शिक्षा नाम व्यक्तेः समाजस्य च निर्मात्री स्यात् – ***डा. सर्वेपल्ली राधाकृष्णन्*** ।

6. शिक्षा नाम व्यक्तेः बालकस्य च शरीरात्ममस्तिष्केषु विद्यमानशक्तीनां सर्वतोमुखो विकासः **अथवा** बालके मनुष्ये च शारीरिक–मानसिक–आध्यात्मिकशक्तीनाम् उत्तमोत्तमसर्वाङ्गीणविकास एव शिक्षा – ***महात्मगान्धी*** ।

**पाश्चात्यदृष्ट्या (Western context)-**

1. स्वस्थे शरीरे स्वस्थं मनः नाम शिक्षा – अरिष्टाटल Creation of sound mind is a sound body is Education - ***Aristotial.***

2. मानवान्तर्निहितशक्तीनां स्वाभाविकसुमेलितप्रकृत्याधारितविकास एव शिक्षा – ***पेष्टालाजी*** ।

Education is natural hormonious and progressive development of man's innate powers - ***Pestalozzi,*** शिक्षा नाम मनुष्यस्य जन्मजातशक्तीनां स्वाभाविकसामञ्जस्यपूर्ण – प्रगतिशीलविकासः ।

3. व्यक्तित्वस्य समग्राभिवृद्धिरेव शिक्षा – टी.पी.नन् ।

Education is complete development of an individual - ***T.P.Nunn***

4. जीवनयापनप्रक्रिया एव शिक्षा – जान डीवी ।

Education is a process of living - ***John Dewey.***

5. शिक्षा नाम व्यक्तेः पूर्णतायाः विकासो वर्तते यदर्थं सः सुयोग्यो वर्तते – काण्ट ।

Education is the development in the individual of all the perfection of which he is capable - ***Kant***

6. शिक्षा नाम एषा प्रक्रिया वर्तते, यया बालकः जन्मजातशक्तीनां बहिः प्रकटनं कर्तुं शक्नुयात् – फ्रॉवेल ।

Education is a process by which child makes its internal external - ***Froeble***

7. उत्कृष्टमेकं प्रशिक्षणं शिक्षा – प्लेटो ।

8. शिक्षा भाविजीवननिर्माणार्थं नास्ति परन्तु जीवनयापनप्रक्रिया एव भवति – जान डीवी ।

Education is process of living and not a preparation for future living - ***Jhon Dewey.***

9. शिक्षायाः अर्थः प्रत्येकमनुष्यस्य मस्तिष्के अदृश्यरूपेण विद्यमानानां सर्वमान्यविचाराणां बहिः प्रकाशनमेव भवति – साक्रेटिस्।

Education means the bring out of the ideas of universal validity whichh are latent in the mind of every man - ***Socrates***

10. शिक्षा चैतन्यरूपा एका नियन्त्रिता प्रक्रिया, यया व्यक्तिव्यवहारः परिवर्तयितुं शक्यते तथा व्यक्ति द्वारा समूहस्य च परिवर्तनं कर्तुं शक्यते। – जे.एफ्.ब्राउन

Education is the consciously controlled process where by changes in behaviour are produced in the person, and through the person within the group - ***J.F.Brown***

**शिक्षाशास्त्रदर्शनयोः सम्बन्धः –**

तत्त्वशास्त्रं लक्ष्यं निर्धारयति। शिक्षाशास्त्रं निर्दिष्टे लक्ष्ये प्रवर्तयति। तत्त्वशास्त्रं मार्गं प्रदर्शयति। शिक्षाशास्त्रं मार्गे प्रवर्तयति। विना तत्त्वशास्त्रं लक्ष्यविहीनत्वात् अन्धः भवति शिक्षाशास्त्रम्। विना शिक्षाशास्त्रं प्रवृत्तेरभावात् पङ्गुः भवति तत्त्वशास्त्रम्। अतः तत्त्वशास्त्रस्य शिक्षाशास्त्रस्य च मध्ये अविनाभावसम्बन्धः वर्तते। न केवलं तत् शैक्षिकसमस्यानां समाधानाय तत्त्वज्ञानम् अत्यन्तमपेक्षति। John Adams महोदयेन शिक्षादर्शनयोः सम्बन्धकथनावसरे एवमवाचि। यत् –

1. तत्त्वशास्त्रस्य आचरणात्मकं रूपं शिक्षा भवति।
2. शिक्षा दर्शनस्य गत्यात्मकः पक्षः भवति। (Education is the dynamic side of pilosophy)
3. जीवनोद्देश्यप्राप्त्यर्थं व्यावहारिकं साधनं भवति शिक्षा। (The practical means of realising ideals of life)
4. दार्शनिक विश्वासस्य क्रियाशीलपक्षः भवति शिक्षा। (It is the active aspect of philosophical belief.

आचरणस्य कृते सिद्धान्तः मार्गनिर्देशकः यदि न भवति तदा आचरणं लक्ष्यविहीनम् अनिश्चितम् असमर्थञ्च भवति । एवमेव सिद्धान्तस्य कृते आचरणं यदि न भवति तर्हि सोऽपि सिद्धान्तः निरुपयोगः अव्यवस्थितश्च भवति । एवञ्च तत्त्वशास्त्रं शिक्षा च एकस्यैव नाणकस्य पार्श्वद्वयमिति स्वीकर्तुं शक्यते । 'Philosophy and Education are the sides of a coin presenting different views of the same thing and the one is implied by the other - **ROSS.**

**********

# वेदे शिक्षातत्त्वम्

'महो अर्णः सरस्वती
प्रचेतयति केतुना ।
धियो विश्वा विराजति'

Sanskrit literature although a symbol of Indian culture is much than this, it is universal and belongs to the world

वेदो नाम ज्ञानराशिः । ऋषयः मन्त्रद्रष्टारः । यथावत् गुरोः मुखात् साक्षात् शिष्यं प्रति बोधिता श्रुतिः । अतः वेदमन्त्राः चिरन्तनसत्यं लोकहितं च गर्भीकृत्य विश्वं पुनन्ति । समग्रं वेदसाहित्यं भारतीयसंस्कृतेः आधारभूतं सत् विश्वस्मिन् ज्ञानं प्रसारयति । लौकिकाः अलौकिकाः च अनन्तविचाराः वेदमन्त्रेषु निहिताः सन्ति । जिज्ञासूनां चिन्तन-मन्थन-द्वारा निष्कृष्टविचाराः निस्सरन्ति वेदमन्त्रेभ्यः । प्रकृते वेदे अन्तर्निहिताः शिक्षाशास्त्रसम्बद्धाः केचन विचाराः प्रस्तूयन्ते । वेदे बहवः मन्त्राः शिक्षायाः विविधमुखं विवृण्वन्ति । ऋग्वेदस्य ('अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति', 7-81-1) सप्तममण्डले 'शिक्षा अज्ञानान्धकारं दूरीकृत्य ज्ञानदीपं प्रज्वालयति' इति शिक्षायाः महत्त्वं प्रतिपाद्यते । लोके यथा अन्धकारः तथा अज्ञानं वस्तूनां यथार्थज्ञानं प्रतिबध्नाति । प्रकाशद्वारा यथा अन्धकारस्य अपनयनं तथा ज्ञानप्रकाशद्वारा अज्ञानान्धकारस्य अपनयनम् आवश्यकं तत्र शिक्षा आवश्यकी । ज्ञानप्रदो गुरुः न केवलं स्वहितं काङ्क्षते परं स्वशिष्यस्यापि बुद्धिविकासम् अभिलषति । एतदर्थम् आचार्यः स्वयं सर्वज्ञं याचते यथा मम शिष्यस्य बुद्धिं विकासयतु इति । वस्तुतः शिक्षकस्य प्रधानं कर्म तदेव 'इमां धियं शिक्षमाणस्य देव' (8-42-3) यत् शिष्यस्य बुद्धिं परिष्करोति, शिष्यस्य ज्ञानपरिधिं च विस्तारयति । अत एवोक्तं 'शिष्यात् इच्छेत् पराभवम्' इति ।

'इमे ये नार्वाङ् न परश्चरन्ति' (10-71-9) इत्यत्र शिक्षाविहीनाः कथं वा इह - परयोः तिरस्क्रियन्ते इति सुष्ठु प्रतिपादितम् । अशिक्षितः अज्ञानी नरः इह इहलोके स्वसदृशैः मानवैः सह जीवनं यापयितुं न प्रभवति, तथा परलोके देवैः अपि तिरस्क्रियते

इत्याशयः। अत एवोक्तं 'विद्वान् सर्वत्र पूज्यते' इति। कथं वा विपश्चित् स्वीयं ज्ञानं वर्धयति इत्यत्र शिक्षाशास्त्र-रहस्यं प्रकाशितम्। श्रद्धया एकाग्रचित्तः ('क्रतुं सचन्ते सचितः सचेतसः', 10-64-7) सन् अधीते जनः। ज्ञानप्राप्तिः चित्तस्य स्थिरतया नान्यथा इति बोधयति वेदः। ज्ञानविकासे निरन्तरम् अध्ययनरूपं तपः आवश्यकम्। अध्ययन - अध्यापनद्वारा ('तपसो जातं तपसो विभूतम्', 10-183-1) लब्धायाः ज्ञानसम्पत्तेः विस्तारः इति उपदिशति वेदः। तथा च ज्ञानी आजीवनम् अध्ययनरूपं तपश्चरति तेन च तपसा महतीं विभूतिं प्राप्नोति। श्रूयते च आभाणक 'अनभ्यासे विषं शास्त्रम्' इति। तादृशं ज्ञानरूपं चक्षुः ('तृतीयेन ज्योतिषा संविशस्व', 10-56-1) देहि मे, इति प्रार्थयते जिज्ञासुः। ज्योतिःचक्षु तृतीयं ज्ञानरूपं नेत्रम्। चर्मचक्षुभ्याम् अतिशेते। ज्ञानचक्षुषा प्रतिक्षणं विकसति जीवः। विकसितं जीवनं - विवेकी, तपस्वी, श्रद्धावान् एव विन्दते इत्याशयः। तथैव विद्वान् स्वबुद्धिं सम्यक् उपयुज्य सन्मतिं सद्गतिं च प्राप्नोति। सदा ज्ञानस्य स्वाधीतशास्त्रस्य सदुपयोगः इष्यते न तु दुरुपयोगः। विपश्चित् स्वबुद्धिं विवेकेन उपयुञ्जन् स्वविकासं स्वेतरविकासं च सम्पादयेत् इत्याचष्टे वेदः। शिक्षाशास्त्रम् अपि तत्वमिदं पोषयति। शिक्षां निन्दमानाः मूढाः ज्ञानराशिं ज्ञानयज्ञं च द्विषन्ति ('न ब्राह्मणासो न सुतेकरासः', 10-71-9) इति एकत्र विशदीक्रियते। तत्र कारणं केवलं मौढ्यम् इति विदुषाम् अभिप्रायः। जनहितकाङ्क्षिणः गुरवः शिक्षमाणाः शिक्षाधारां तैलधारामिव अविच्छिन्नरूपेण संरक्षयेयुः। तत्र पूर्णप्रज्ञाः आचार्याः शपथं कुर्वन्ति यथा वयं ('पक्षेभिरपिकक्षेभिरत्राभि संरभामहे', 10-134-7) कथञ्चिदपि येन केन प्रकारेणापि शिक्षां प्रसरेम इति। शिक्षा मानवस्य व्यक्तित्वं पोषयति। अन्तरं बाह्यं च सौन्दर्यं वर्धयति। कुरूपिणं सुरूपिणं कारयति ('पेशो मर्या अपेशसे', 1-6-3) हे मानवाः भवन्तः शिक्षया कुरूपम् अपहाय सुरूपं प्राप्नुवन्तु इति उपदेशो अन्तर्निहितः। कथं वा शिक्षा सन्ततेः सन्ततिं प्रसरेत् इति प्रतिपाद्यते। ज्येष्ठाः कुटुम्बसदस्याः, समाजसदस्याः च स्वापेक्षया ('यदिन्द्र पूर्वो अपराय शिक्षन्', 7-20-7) अवरान् शिक्षयन्ति। स्वज्ञातं विषयं स्वानुभवं च प्रेम्णा संक्रामयन्ति।

एवं जिज्ञासवः स्वशक्तेरनुसारं शिक्षां लभेयुः ('यथायथा मतयः सन्ति नृणाम्', 10-111-1) इत्याशयः सम्यक् विशदीकृतः। यथा मानवः स्वबुद्धेः अनुगुणं ज्ञानं विन्दते। शिक्षाशास्त्रानुसारं शिशुकेन्द्रितशिक्षा, व्यक्तेः बुद्धि-अनुगुणा च शिक्षा

मनोवैज्ञानिकी समुचिता च मन्यते। मनुष्यः शारीरिकशक्तिं प्रतिभां च ('यावत् तरस्तन्वो यावदोजः',7-91-4)अनुसृत्य ज्ञानं समार्जति नान्यथा । पुनश्च स्वीया सूक्ष्मदृष्टिः ज्ञानार्जने सहकरोति । केचन विषयाः सूक्ष्मदृष्ट्या तीक्ष्णमत्या एव अध्येयाः न तु ('यावन्नरश्चक्षसा दीव्यानाः',7-91-4)साधरणया । सेयं तीक्ष्णा बुद्धिः ज्ञानरूपं वज्रं तीक्ष्णयति। गभीराणां शास्त्राणाम् अध्ययनार्थं बुद्धिमन्त एव प्रभवन्ति। तत्र योग्यानां शिष्याणां चयनं बोधनं च आवश्यकम्। अन्यथा मन्दमतीनां कृते तादृशबोधनं ('मनीषणः प्रभरध्वं मनीषाम्', 10-111-1)वृथा स्यात्। ज्ञानी विपश्चित् मानवः सदा सन्मतिम् उपयुङ्क्ते। स एव सुमतिः परमं ज्ञानं विन्दते येन निरन्तरं सुखं लभ्यते । 'सुविज्ञानं चिकितुषे जनाय'(7-104-12) इति स्वमत्या अधीतशास्त्रः, सर्वत्र बहुमन्यते। गहनेषु शास्त्रार्थेषु परिणतः ('सुवीरासो विदथमा वदेम',8-48-14)समाजं भाषणद्वारा उपदिशेत् स्नातकः। सोऽयमाशयः सार्वकालिकः। शिक्षितो जनः शिक्षाद्वारा समाजम् उन्नयेत् स्वयं च मुच्येत। कर्तव्यं पालयन्तः शिक्षिताः सामाजिकान् यथाशक्ति यथाकालं शिक्षयन्तः सम्भूय परमानन्दम् अनुभवेयुः। तथा च वयं सर्वे (सुतर्माणमधि नावं रुहेम', 8-42-3)सहैव संसारतारिकां शिक्षानौकाम् आश्रयामः । सेयं ज्ञानरूपिणी विद्या सहस्रधाराभिः क्षीरं ददती कामधेनुरिव चकास्ति । वयं च ('सहस्रधारा पयसा मही गौः', 10-133-7) 'ज्ञानरूपं दुग्धं पिबामः। शिक्षागावं शरणं गच्छामः' इति वाग्देवी कामधेनुना सह उपमिता वर्तते । ज्ञानार्थं ज्ञानम् इति वदन्तः प्राचीनाः अर्थस्य उपेक्षां कृतवन्त इति आक्षेपः श्रूयते । वस्तुतः वेदे अर्थकरी ('तां शिक्ष या दोहते प्रति वरं जरित्रे', 10-133-7) विद्या यथोचितम् आश्रयणीया इति निरूपितं दृश्यते। ज्ञानदातारं शिक्षकं धनिकं कर्तुं याचते शिष्यः । ('त्वमिद् हि ब्रह्मकृते काम्यं वसु देष्ठः', 8-66-6) योग्यः शिक्षकः भगवता अनुगृहीतः स्वयम् आढ्यो जायते । अत एव विपश्चित् कीर्तिप्रदं जीवनोपयोगकरं च तत्त्वं स्वीकरोति। न कदापि जीवनम् उपेक्षते; परं स्वज्ञानेन जीवनतत्त्वानि सम्यक् ('ईहे रयिं यशसं पूर्वभाजम्', 7-93-4) विविच्य यथेच्छं सुचारुरूपेण आस्वदति। सेयं ज्ञानज्योतिः विश्वहितकारिणी प्रकाशते। शिक्षया समग्रः लोकः हितं विन्दते। योग्य - अयोग्य, ग्राह्य - त्याज्य, कार्य - अकार्य - विवेकेन समाजः विकासं भजते । अतः ज्ञानं ('उदु ज्योतिरमृतं विश्वजन्यम्', 7-76-1) शाश्वतं लोकोपकारकं विराजते । ('उप शिक्षा सखायं प्रबोधय', 10-

42-2) Each one Teach one इत्याशयः वेदे एव निहितः। स्वयम् अधीतः स्वमित्रमपि शिक्षयेत्। 'क्षयतो वृद्धिमायाति' इति सुभाषितवत् बोधनेन वर्धते विद्या। विनियोगेन द्विगुणायते ज्ञानम् अतः शिक्षितः प्रतिक्षणं स्वेतरं सखायं शिक्षयेत्। तेन च वीचीतरङ्गन्यायवत् शिक्षा प्रसरति।

शिक्षणाय, प्रशिक्षणाय वा या क्रिया भवति तस्यै शिक्षा इति व्यवहारः। अत्र गुरोः समीपे अर्थात् सान्निध्यात् विद्याभ्यासः। विद्यायाः ग्रहणं वा शिक्षा। अपि च विद्यायां दक्षता सम्पादनम्। विद्यायाः उपदेशश्च अत्रैवान्तर्भवतः। प्राचीनकाले शिक्षाशब्दस्य प्रयोगः 'अनुशासनस्यार्थेऽपि कृतो लभते। अनुशासनस्य द्वौ भागौ स्तः। बौद्धिकविकासः, मानसिकविकासो वा। भौतिकविकासः, शारीरिकविकासो वा। वस्तुतः शिक्षायाः अपरं प्रसिद्धं नाम अनुशासनमेव भवति। उद्देश्यानि –

* मनुष्यस्य नैसर्गिकशक्तीनां सम्यक्तया विकासः।
* वास्तविकमनुष्यस्य निर्माणम्। अर्थात् सफलजीवनाय अपेक्षितक्षमतानां विकासः।
* मानवस्य भौतिक–आध्यात्मिकजीवनस्य सर्वाङ्गीणविकासः।
* जैविकस्तरे मानवः, मानव एव स्यात्, किन्तु मानवगुणानां प्राप्तिः साधनीया भवति, सा प्राप्ति एव उद्देश्यं विद्यते।
* पशुतुल्यमानवं, दैवतुल्यमानवरूपेण निर्माणम्।
* वैश्यक्तिकचेतनायाः जागृतिं विभाय आध्यात्मिकाऽभ्युदय प्राप्तये प्रवृत्तिसाधनम्।
* उत्तरोत्तरसोपानानां प्रापणम्।

**शिक्षाकेन्द्राणि –**

**(अ) गृहम् –** उपनिषत्काले प्रारम्भिकशिक्षाकेन्द्रं गृहमेवाभवत्। पितैव प्रथमगुरुः। पिता महाशीलः, महोश्रोत्रियश्च भवति स्म। यथा – उद्दालक आरुणिः – श्वेतकेतुः। महर्षिः पुत्रं श्वेतकेतुं पपाठ। अर्थात् पितुः समीपे स्वविद्याभ्यासम् अकरोत्, श्वेतकेतुः। अपि च भृगुः, स्वपितुः वरुणात् महर्षे : सन्निध्यात् ब्रह्मज्ञानं जग्राह। यथा – 'भृगुर्वै वारुणिः। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।' अतः पित्ता एव सन्तानस्य प्रथमो गुरुरासीत्। (माता च पिता च पितरौ)। अत्र पितृशब्दे

मातृशब्दोऽप्यन्तर्गतः । यथा पितरौ इति संस्कृतशब्दस्य parents इति आङ्ग्लाभाषायां पर्यायवाची शब्दो भवति । पितरौ स्वसन्ताने गुणानां विनयस्य, संस्काराणां, शुभाचरणानां, ज्ञानस्य च सन्निवेशं कुरुतः । यथा जातकर्मसंस्कारे मधुघृतयोः प्रासनसमयेऽयं मन्त्रः पठ्यते ।

**अङ्गादङ्गात्सम्भवसि हृदयादधिजायसे ।**
**आत्मा वै पुत्र नामासि स जीव शरदः शतम् ॥**
**अश्मा भव परशुर्भव हिरण्यमश्रुतं भव ।**
**पशूनां त्वां हि कारेणाभिजिघ्रामि...... ।**
**वेदो वै पुत्र नामासि स जीव शरदः शतम् ॥**

**(आ) याज्ञिकस्थलानि** –याज्ञिकानुष्ठानेषु राजभिः समयोजितानि विद्वत्सम्मेलनानि विद्यानां केन्द्राणि आसन् । एतेष्वनुष्ठानेषु ऋषयः, तत्त्वज्ञाः, वाक्पटवो विद्वांसश्च समागच्छन्ति । याज्ञिकानुष्ठानम् औपनिषदिकसंस्कृतेः केन्द्रमासीत् – इत्यत्र नास्ति संशयलेशः । एवमेव उपनिषत्कालिकम् अत्यन्तं प्रसिद्धं याज्ञिकस्थलं नैमिषारण्यमासीत् ।

**शिक्षणपद्धतयः –**

(1) संवादपद्धतिः
(2) दृष्टान्तपद्धतिः
(3) कथापद्धतिः
(4) सूत्रपद्धतिः
(5) एकाक्षरपद्धतिः
(6) रूपकपद्धतिः
(7) आत्मोक्तिपद्धतिः
(8) समन्वयपद्धतिः
(9) व्युत्पत्तिपद्धतिः
(10) प्रयोजनपद्धतिः
(11) प्रतिगमनपद्धतिः

**आचार्यः –**

(1) गुरुः – पराविद्याया द्वौ स्कन्धौभवतः – आचार्यन्तेवासिनौ । तत्र –

(1) आचार्यः – अन्तेवासी
(2) गुरुः – शिष्यः
(3) उपाध्यायः – छात्रः

गुरुं विना आध्यात्मिकविद्यायाः प्राप्तिः न भवति । गुरुशब्दः गु – शब्दे गृह्णाति उपदिशति, धर्मं, गु–निगरणे गिलति – गिरति अज्ञाने वा । यद्वा गीर्यन्ते स्तूयन्ते

देवगन्धर्वादिभिः (गृ+कृ-उत्व) इत्यस्मिन्नर्थे गुरुशब्दः उपयुज्यते ।

(1) गु-गृणाति - अध्यात्मविद्यायाः उपदेशं ददाति सः गुरुः ।

(2) गु - निगरणे - ज्ञानेन मानवम् अज्ञानरूपात् अन्धकारात् त्रायति सः गुरुः ।

(3) गु - गीर्यते - देवतानां वन्दनं स्तुतिं वा करोति सः गुरुः ।

**आचार्यः** - आचार्यः पूर्वरूपम् । अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनं सन्धानम् । इत्यधिविद्यम् । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् । एते ब्रह्मपरा ब्रह्मान्वेषमाना एष ह वै तत्सर्वं वक्ष्यतीति ते समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः । तान्ह स ऋषिरुवाच भूय एव ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति ।

यच्छन्दसामृषभो विश्वरूपाः....................श्रुतं मे गोपाय ।

आवहन्ती वितन्वाना.................ब्रह्मचारिणः स्वाहा ॥

यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि ।

यान्यस्माकं सुचरितानि । तानि त्वयोपास्यानि । नो इतराणि । इत्यादि वाक्यद्वारा गुरोः स्वरूपं स्पष्टं भवति ।

**अन्तेवासी - अन्तेवासिनः कर्त्तव्यानि-**

(1) अग्निपरिचर्या

(2) पशुपालनम्

(3) समिदाहरणम्

(4) भिक्षा (संवर्गविद्या) यस्मै वा एतदन्नं तस्मादेतन्न दत्तमिति ।

**शिक्षायाः अवधिः -**

'छान्दोग्योपनिषदि' स ह द्वादशवर्षम् उपेत्य चतुर्विंशतिवर्षः सर्वान्वेदानधीत्य महामना अनूचानमानी स्तब्धः एयाय । (श्वेतकेतुः) इत्यनेन पाठेन वेदाध्ययनार्थं गुरुकुले द्वादशवर्षाणि अवधिः भवतीति ज्ञायते ।

**उपनिषदि शिक्षारीतिः**

आर्षज्ञानगर्भावेदराशयः । त एव बीजं विविधदर्शनवेदाङ्गस्मृतीतिहास-पुराणतन्त्रागमकाव्यसङ्गीतकलाद्यात्मना अपरिमितविस्तारङ्गतस्य

लौकिकालौकिकविषयस्य संस्कृतवाङ्मयस्य, विविध शाखोपबृंहितविज्ञानस्य च। वेदेषूपनिबद्धस्य आर्षविज्ञानस्य याथार्थ्यं वैभवञ्चाविष्कर्तुम् उत्तरोत्तरं बहुभिः ऋषिभिः ऋषिकल्पैश्च बहवः ग्रन्थोऽपि लिखिताः। वेदोक्तगभीरविषयाः उत्तरोत्तरकाव्येषु सरलीकृताः। वेदे प्रभुसम्मिततया कथितस्य कर्मकाण्डस्य प्रधानीभूते प्रथमभागे कर्मणः आचरणार्थम् अर्थवादानाम् अपेक्षा वर्तते । परन्तु ज्ञानप्रधानभूते उपनिषद्ग्रन्थभागे अर्थवादानाम् आवश्यकता नैव दृश्यते। तत्र कारणं उपनिषद् ग्रन्थेषु विषयप्रतिपादनशैली बोधनरीतिश्च ।

उपनिषद् शब्दस्य व्युत्पत्तिरस्ति उप+नि+षद्, यस्यार्थः वर्तते समीपे उपवेशनम्, अर्थात् गुरोः चरणसमीपे उपविश्य अध्ययनम् । उपनिषदां तात्त्विकविवेचनं संवादरूपेण वर्तते, यस्मिन् शिष्यः प्रश्नं करोति, विद्वान् गुरुः विभिन्नविधिभिः तस्य जिज्ञासां शमयितुं प्रयतते । शिष्यः मध्ये मध्ये स्वशङ्कां प्रस्तौति, तथा गुरुः तासां शङ्कानां निवारणं करोति । उपनिषदः परम्परेयं शिक्षासम्बन्धिनः त्रीन् अभिप्रायान् स्पष्टयति –

१. ज्ञानं स्वप्रयासेन ग्रहणीयं भवति, परन्तु ज्ञानप्राप्तिप्रक्रियायां गुरोः सहायतायाः मार्गदर्शनस्य च आवश्यकता भवति ।

२. शिक्षा वैय्यक्तिकरूपेण ग्रहणीया भवति, सर्वे विद्यार्थिनः स्वावश्यकता – क्षमता – योग्यताऽनुसारं स्वस्य गतेः स्वनिर्मितयोजनानुसारं च शिक्षाग्रहणं कुर्वन्ति। एकप्रकारकशिक्षा एकस्मिन् समये एकगत्या, पूर्वनिर्धारितयोजनानुसारं न दातुं शक्यते ।

३. उपनिषद् ज्ञानं गूढं रहस्यमयं च मनुते । ज्ञानप्राप्तेः फलस्वरूपेण ज्ञातुः शक्तिरनन्तगुणवर्धिता भवति। अतः ज्ञानं तस्मैं प्रदातव्यं यः ज्ञानप्राप्तेः कृते पात्रं भवेत्। अपात्राय ज्ञानस्य प्रदानेन ज्ञान शक्तेश्च दुरुपयोगस्य आशङ्का भवति ।

### औपनिषद्शिक्षायाः महत्त्वम् –

औपनिषद्शिक्षा कस्यचित् कालविशेषस्य शिक्षाप्रणाली नास्ति अपि तु तत्सिद्धान्तानां प्रयोगः सर्वाकालिकोऽस्ति, यतो हि तत्रत्यप्रश्नाः आत्मप्रश्नेन

सम्पृक्ताः वर्तते । आत्मनः उत्तरोत्तरावस्थानां यद्वर्णनं पञ्चकोषेषु वर्तन्ते अद्य तदेव शिक्षोद्देश्यानाम् उत्तरोत्तरसोपानानि प्रस्तौति । अद्य अस्माकं कृते आजीविकायाः, स्वास्थ्यस्य, ज्ञानस्य विज्ञानस्य नैतिकजीवनविकासस्य च शिक्षा काम्यते तथा अनेन प्रकारेण आगामियुगेऽपि इमानि उद्देश्यानि तथैव महत्त्वपूर्णानि भविष्यन्ति ।

शिक्षकशिक्षार्थनोः सम्बन्धस्य यत् स्वरूपम् उपनिषत्सु वर्णितमस्ति तत् कस्यापि समाजस्य कस्यापि युगस्य च आदर्शसम्बन्धं परिकल्पयति । अद्यतनमयुगस्य अनुशासनविभीषिकां न्यूनीकर्तुम् एकमात्रोपायः शिक्षकछात्रयोः उत्कृष्टसम्बन्धो भवति । उपनिषत्सु विवेचितशिक्षकशिष्यसम्बन्धः एतस्य एकम् आदर्शोदाहरणं प्रस्तौति ।

उपनिषत्सु वर्णिताः अनेकशिक्षणविधयः अद्यापि आधुनिकशिक्षणविधिरूपेण प्रयुज्यन्ते । औपनिषदशिक्षणविधेः मूलमन्त्रोऽस्ति स्वीयाध्ययनप्रणाली, यः आधुनिकशिक्षायाः मूलमन्त्रोऽस्ति ।

उपनिषत्सु अत्यन्त–कठिनदुरवगहन–अमूर्तविषयबोधने तत्तत् समयानुगुणं छात्रानुगुणं विषयानुगुणञ्च बहव्यः रीतयः स्वीकृताः । अस्मिन् लघुशोधप्रबन्धे विविधसन्दर्भेषु उपनिषद्प्रतिपादितकासाञ्चनशिक्षारीतीणां विवरणपुरस्सरं तासां साम्प्रतिकोपयोगिताञ्च यावच्छक्यं प्रतिपाद्यते ।

**बोधनरीतयः –**

अनेकासु उपनिषत्सु नानाप्रकारकविधीनां प्रयोगः कृतोऽस्ति, परं सर्वप्रमुखविधिस्तु स्वयमन्वेषणविधिः वर्तते । उपनिषत्काराणाम् एषा दृढधारणा वर्तते यत् मनुष्यः स्वप्रयासेन ज्ञानं प्राप्तुं शक्नोति । अन्येन प्रदत्तं ज्ञानं शाब्दिकरूपेण ग्रहीतुं शक्नोति, परं तद् आत्मासातुकर्तुं न शक्नोति । आत्मसात्कर्तुम् इदमावश्यकं यत् शिक्षार्थी स्वयं ज्ञानस्यानुभूतिं कुर्यात् । अध्यापकः शिक्षार्थिनः मार्गदर्शनं कर्तुं शक्नोति, किन्तु ज्ञानस्य आत्मीकरणं शिक्षार्थिना स्वयं करणीयं भवति । अत्र केषाञ्चनविधीनां सङ्क्षेपेण विवरणं क्रियते । प्रायः उपनिषत्सु एते विधयः स्वीकृताः वर्तन्ते । ते च क्रमेण प्रहेलिकाविधिः, सूत्रप्रणाली, व्युत्पत्तिप्रणाली, कथाप्रणाली, अनुरूपताप्रणाली, चर्चाप्रणाली, संश्लेषणप्रणाली, भाषणप्रणाली,

तदर्थप्रणाली, आनुक्रमिकप्रणाली इत्यादयः वर्तन्ते । अस्मिन् प्रबन्धे केषाञ्चन विधीनां प्रतिपादनं सोदाहरणं क्रियते ।

**प्रायोगिकप्रणाली (Experimental Method) –**

छान्दोग्योपनिषदि षष्ठाध्यायस्य पञ्चमखण्डतः सप्तमखण्डपर्यन्तम् अयं विचारः दृश्यते ।

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति, भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति ॥

एवमेव खलु सोम्यान्नस्यास्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति ॥

अपां सोम्य पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति ॥

तेजसः सोम्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाग्भवति ॥

अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येति होवाच ॥

अत्र गुरुः श्वेतकेतुमुद्दिश्य हे सोम्य अन्नमयं मनः आपोमयः प्राणः तेजोमयी वागिति प्रतिपादयति । गुरोः कथनान्तरं श्वेतकेतुः हे भगवान् कथं मनसः अन्नरसेन उपचयः इत्येतत् नाद्यापि समाहितमिति कथिते सती मनसः अन्नमयत्वं दृष्टान्तपूर्वकं विज्ञापयितुं प्रवर्तते । सोम्या मथ्यमानस्य दध्नः सूक्ष्मभागः एकत्र सम्मिल्य नवनीतरूपेण घृतरूपेण च परिणमते । एवमेव भक्षितस्य अन्नस्य सूक्ष्मभागः मनः रूपेण, स्वीकृतस्य जलस्य सूक्ष्मभागः प्राणरूपेण, तेजसः सूक्ष्मभागः वाग्रूपेण परिणमते इति दृष्टान्तपूर्वकम् उक्तं चेदपि पुनः स्पष्टयितुं श्वेतकेतुः प्रार्थयति । तदानीम्–

षोडशकलः सोम्य पुरुषः पञ्चदशाहानि माऽशीः काममपः पिबाऽऽपोमयः प्राणो नपिबतो विच्छेत्स्यत इति ॥ इत्यादि ग्रन्थेन मनसः अन्नरसोपचितत्त्वं दर्शयितुम् अन्नरसजनितां शक्तिं कलात्वेन कल्पयति । भुक्तस्य अन्नस्य यः सूक्ष्मांशः मनसि शक्तिं जनयति । अन्नद्वारा विकासं प्राप्तायाः अस्याः शक्तेः कलात्वेन कल्पनं दृश्यते । षोडशदिनावच्छेदेन षोडशधा कलाकल्पनं भवति । कार्यकारणसङ्घातलक्षणः जीवविशिष्टः पिण्डः षोडशकलः इत्युच्यते । एताभिः

कलाभिः पुरुषः द्रष्टा, श्रोता, मन्ता, बोद्धा, कर्ता, विज्ञातादि क्रियाकरणसमर्थः भवति । कलानामभावे सामर्थ्यस्य लोपः भवति । एतादृश षोडशकलावतः पुरुषस्य प्रत्यक्षं कर्तुमिच्छति चेत् पञ्चदशदिनपर्यन्तं भोजनं न करोतु । यथेच्छं जलं पिब । जलमात्रस्वीकरणेन प्राणानां विच्छित्तिः नैव भवति । आचार्यमुखात् तत् शृत्वा श्वेतकेतुः मनसः अन्नमयत्वं प्रत्यक्षीकर्तुं पञ्चदशदिनपर्यन्तं भोजनं न कृतवान् । हीनतां प्राप्तवान् । षोडशदिने आचार्यसमीपं गत्वा आचार्यं वदति किं ब्रवीमीति ? हे सोम्या ऋग्यजुष्साममन्त्राणाम् अध्ययनं कुरु इति गुरुः वदति । तदा श्वेतकेतुः न वै मामृगादीनि प्रतिभान्ति मम मनसि न दृश्यन्ते इति । तदानीम् आरुणिः वदति अन्नेन विकसिते षोडशकलायुक्तपुरुषे पञ्चदशदिनानाहारेण पञ्चदशकलाः नष्टाः, एक कलामात्रम् अवशिष्टं वर्तते । तया वेदमन्त्राणाम् अनुभवः असाध्यः । खद्योतमात्राङ्गारकतुल्यया एकया कलया वेदान् नानुभवसि। अतः भुङ्क्ष्वा इति आदिशति । खद्योतमात्रं परिशिष्टं तं तृणैः चूर्णैः उपसमाधाय वर्धयेत्, तेन अङ्गारः पूर्वपरिमाणं प्राप्नोति । इत्युक्ते सति श्वेतकेतुः षोडशेदिने भोजनमकरोत् । तदनन्तरं पुनः पितुः उपदेशं श्रवणं कर्तुं गुरोः समीपं गतवान् । ऋगादि मन्त्राणाम् अर्थमवगन्तुं शक्तः जातः । मनसादीनां अन्नमयत्वादि विषयान् विशेषरूपेण अवगतवान् ।

अत्र मनसः अन्नमयत्वप्रतिपादनार्थं व्याख्यानविधिः स्वीकृतः । छात्रेण पुनः प्रार्थितः दृष्टान्तविधिः अनुसृतः । तदापि शिष्यस्य शङ्का न निवृत्ता इति प्रायोगिकविधिं स्वीकृत्या कठिनविषयस्य बोधनं कृतं वर्तते ।

**प्रश्नोत्तरविधिः–**

छान्दोग्योपनिषदि षष्ठाध्याये प्रथमखण्डे अयं विचारः प्रवर्तितः । श्वेतकेतुः द्वादशवर्षीयः, पितुः आज्ञानुसारं आचार्यसमीपं गत्वा द्वादशवर्षं यावत् चतुरः वेदान् सार्थपूर्वकं ज्ञात्वा अनूचानमानी स्तब्धः अप्रणतस्वभावः एयाय गृहम् । तदेवं भूतम् आत्मनोननुरूपशीलं स्तब्धं मानिनं पुत्रं दृष्ट्वा पितोवाच सद्धर्मावतारचिकीर्षया । सोम्येदं महामना अनुचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यः हे श्वेतकेतो येन परम्ब्रह्मादिश्यते सः आदेशः गुरुं पृष्टवान् वा

? येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति । तदा श्वेतकेतुः वदति कथं नु भगवः सः आदेशो भवतीति । पितुः अद्भुतसारगर्भितवाणीं श्रुत्वा अन्यस्य विज्ञानेन अन्यस्य विज्ञानं कथं भवति ? एतत् लोकप्रसिद्धं नैव भवति । नाहं जानामि इत्युक्त्वा तमादेशमुपदेष्टुं प्रार्थयति ।

अत्र विषयत्रयमस्माभिः ज्ञातुं शक्यते । प्रश्नकरणेन –

१. अविनीतस्य छात्रस्य गर्वापनयनम् ।

२. अविज्ञातनूतनविषयज्ञानार्थं प्रेरणम् ।

३. नूतनविषयज्ञानार्थं सिद्धता च ।

यदा नाहं जानामि इति चिन्ता भवति तदेव अहं भावरहितस्वभावस्य सूचकं भवति । अल्पसमाजात्मके विद्यालये अत्यन्तोद्दण्डछात्राणां गर्वापहरणे इयमत्यन्तोत्तम पद्धतिः भवति । आधुनिककाले उपयुज्यमान सोक्रेटिस् पद्धतिः अपि एवमेव भवति । सोक्रेटिस्वर्यः यः कोऽपि ज्ञानीति, पण्डितः इति वा ? चिन्तयति चेत् सत्यान्वेषणार्थं प्रश्नान् पृच्छति । यावत् पर्यन्तं सः नाहं जानामि इति वदति तावत् पर्यन्तं प्रश्नपरम्परा भवति स्म । अनेनैव कारणेन एथेन्स् नगरे विद्यमानपौराणां नायकानां कृतेऽपि अयं रिपुः जातः ।

**दृष्टान्तविधिः –**

छान्दोग्योपनिषदि षष्ठाध्यायस्य द्वादशखण्डे दृश्यमाणजगद्रूपस्थूलकार्यस्य मुख्यं कारणं सूक्ष्मरूपेण भवतीति प्रतिपादनावसरे न्यग्रोधफलस्य दृष्टान्तः प्रदर्शितः । शिष्यं न्यग्रोधफलमानीय छेदनं करोतु इति आदिशति । पुनः पुनः छेदनेन सूक्ष्मबीजभागः अवशिष्यते । अयमेव अत्यल्पपरिमाणविशेषः बृहदाकारकवृक्षस्य कारणं कथं भवति तद्वदेव अत्यन्त सूक्ष्मकारणात् जगतः उत्पत्तिः भवतिः इति । चेतनात् ब्रह्मणः अचेतनस्य जगतः उत्पत्तिः कथं भवतीत्यत्र मुण्डकोपनिषदि पुरुषात् केशलोमानि कथं भवन्ति तद्वदेव चे चेतनस्य ब्रह्मणः जगतः कारणत्वम् ।

मुण्डकोपनिषदि ब्रह्मणः उपादानकारणत्वं निमित्त कारणत्वञ्च निरूपयितुं यथोर्णनाभिः सृजते ..... इति लूतयाः दृष्टान्तः प्रतिपादित । वस्तुतः लोके उपादानकारणं निमित्तकारणञ्च भिन्नरूपेण दृश्यते । परन्तु ब्रह्मणः उपादाननिमित्तकारणे च ऊर्णनाभिदृष्टान्तेन सुन्दरतया प्रदर्शितः ।

विषयः अमूर्तः विषयः तादृशविषयस्य प्रतिपादनं दृष्टान्तैः विना नशक्यते इत्यतः प्रत्यक्षरूपेण साधरणतया विद्यमानानां दृष्टान्तानां प्रदर्शनम् अत्र दृश्यते ।

**पुनः पुनः अभ्याससिद्धान्तः (Principle of Practice & Drill) –**

छान्दोग्योपनिषदि षष्ठाध्याये सप्तमखण्डदारभ्यः अन्तिमपर्यन्तं तत्त्वमसीति वाक्यं नववारमुपदिष्टमस्ति । एकस्य विषयस्य स्पष्टार्थं बहुवारम् आवर्त्तनं दृश्यते । जटिलविषये स्पष्टार्थं छात्रस्य सन्देहनिवृत्तिकरणद्वारा विषयावगमार्थञ्च अयं प्रकारः स्वीकृतः ।

**संसिद्धतासिद्धान्तः (तत्परतसिद्धान्तः) –**

यावच्छात्राणाम् अभिरुचिः नैव भवति, तावत् कठिनविषयाणाम् अवगमनसामर्थ्यं नैव भवति । अतः नूतनविषयबोधनाय छात्रेषु योग्यता अत्यन्तमपेक्ष्यते । एनं विचारं कठोपनिषदि द्रष्टुं शक्यते । अत्र दक्षिणात्वेन दीयमानेषु धनद्रव्येषु दातुः उद्धालकस्य आत्मजः बालकः नचिकेतसः अपि स्वतः अन्तर्भवति । पितुः आदेशः बलात् स्वीकृत्य यमसदने प्रविष्टः, यमस्य आगमनपर्यन्तं स्थिरचित्तः सन् अन्नजलग्रहणं विना यमसदने दिनत्रयं व्यापितवान्। यमस्य प्रत्यागमनानन्तरं तिस्रो रात्री यदवात्सीगृहे मे तस्मात् प्रति त्रीन् वरान् वृणीष्व इति यमादेशात् प्रथमवररूपेण पितुः स्वस्थता प्राप्तिं, द्वितीयवररूपेण अग्निविद्यां, येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके विषयेऽस्मिन् मामुपदिशतु भवान् । तृतीयवररूपेण ब्रह्मविद्यां प्रार्थितवान् । तदा यमः नचिकेतसः योग्यतायाः परिक्षणार्थं शतायुष पुत्रपौत्रान् वृणीष्व, वृणीष्व वित्तं चिरजीविकाञ्च । ये ये कामा दुर्लभाः मर्त्यलोके तान् छन्दसः प्रार्थयस्व इत्यादिभिः यमराजेन प्रदर्शितैः नानाविधैः प्रलोभैः स्थिरमतेः नचिकेतसः दयं विचलितं नाभूत् । एवं पात्रपरीक्षायाः परं यमराजः नचिकेतसः श्रेयप्रेयसोः स्वरूपं वर्णितवान् ।

**अन्वेषणविधिः –**

शिक्षकेण छात्राः अत्यल्पमेव पाठ्येरन् अत्यधिकम् अन्वेषणे प्रोत्साह्येरन् इत्याकारकं हर्बर्ट् महोदयस्य सिद्धान्तमाधारीकृत्य प्रो.एच्.ई,आर्मस्ट्रांगमहोदया

१९ शताब्द्यां विज्ञानविषये शिक्षणार्थम् अमुं विधिं पर्यकल्पयत् । अद्य अस्य प्रयोगः न केवलं विज्ञानविषये अपि तु गणितव्याकरणादि विषयेष्वपि वरीवर्ति । वस्तुतः एतादृशः अन्वेषणविधिः उपनिषत्सु अस्माकं सुपरिचितः एव तत्रैकमुदाहरणं तैत्तिरियोपनिषदि भृगुवल्यां वरुणः स्वकीयं पुत्रं भृगुं वदति यतो वा इमानि भूतानि जायन्ते तेन जातानि जीवन्ति इत्यादि ग्रन्थेन तपसा तद्ब्रह्मविजिज्ञासस्वा इति वदति । सः आरुणिः तपसा अन्वेषणमारभ्य प्रथमतया अन्नं ब्रह्मेति व्यजानात् । तदनु प्राणो ब्रह्मेति, मनोब्रह्मेति, विज्ञानं ब्रह्मेति क्रमेण व्यजानात् । अन्ते तपसा आनन्दोब्रह्मेति व्यजानात् । एवं क्रमेण स्वयमेव अन्वेषणं कृत्वा गुरूपदिष्टमार्गेण तत्त्वज्ञानं प्राप्नोति ।

एवम् अधुनिकैः प्रयुज्यमानाः प्रायः सर्वेऽपि विधयः उपनिषत्सु वरीवर्तन्ते एव । तेषामुपयोगः न केवलं साम्प्रतिके युगे भावियुगेष्वपि भविष्यतीति शम् ।

**********

## ३
## श्रीमद्भगवद्गीताया शिक्षातत्त्वम्

श्रीमद्भगवद्गीता महाभारतान्तर्गतः एकः अंशः । अत्र जगद्गुरुः श्रीकृष्णः शिष्यप्रतीकाय अर्जुनाय शिक्षामदात्। शिक्षादर्शनदृष्ट्या भगवद्गीता अमूल्यनिधिः भवति । यतो हि अस्यां सर्वाभ्युपगतशिक्षासिद्धान्तानां समाहारः उपलभ्यते । भारतीयशिक्षादर्शनस्य सारःअत्रैव अवलोकयितुं शक्यते । भारतीयदर्शनेषु द्वौ प्रमुखमार्गौ दृश्येते। एकः निवृत्तिमार्गः प्रवृत्तिमार्गश्चापरः। शिक्षादृष्ट्या प्रवृत्तिमार्गस्य महत्त्वमधिकं भवति। निवृत्तिमार्गः प्रायशः सन्यासाश्रमायोपयुक्तो भवति। अत एव शिक्षां बुबोधयिषया भगवान् श्रीकृष्णः प्रवृत्तिप्रधानीभूतरणभूमिमचिनोत् । गीतायां ज्ञानस्य व्याख्या एवं दृश्यते । 'येन सर्वप्राणिषु एकं निर्विकारभावम्, एवं विभक्तेषु एकमविभक्तं भावमीक्षते तत् सात्विकज्ञानमित्युच्यते (अ-१८श्लो-२०)'अर्थात् ज्ञानप्राप्तेः लक्ष्यं न केवलं प्राणिषु एकताग्रहणम्। परन्तु सम्पूर्णजगति दृश्यमानभिन्नतान्तरालवर्तिनः सर्वात्मनः अनुभूतेः प्रापणं भवति।

शिक्षायाः परिभाषा ज्ञानव्याख्यान एव निहिता वर्तते । उपर्युक्तव्याख्याद्वारा गीतायाः अनुसारं शिक्षायाः परिभाषा एवं भवति 'या प्रत्येकं व्यक्तिषु निहितब्रह्मणः अथवा परमात्मनः अनुभूत्यै सहायिका भवति । शिक्षाद्वारैव आत्मनः अनुभूतिः भवति । यस्य ज्ञानचक्षुषः उन्मीलनं भवति तेनैव किल अन्तरात्मनः दर्शनं कर्तुं शक्यते । विमूढा नानुपश्यन्ति इत्युक्तरीत्या (गीता अ १५श्लो १०) सर्वप्राणिषु विद्यमानपरमात्मनः दर्शनं विना ज्ञानस्य पूर्णता नैव भवति'।

### शिक्षायाः उद्देश्यानि

उपर्युक्तविचारेण शिक्षायाः लक्ष्यम् एवं भवति। १. भेदज्ञानकारणीभूतस्य आत्मानुभूतिबाधकस्य च अज्ञानस्य निवृत्तिः । २. ज्ञानप्रकाशेन भिन्नतायाम् अभेददर्शनप्राप्तिः । ३. सर्वेषु प्राणिषु विद्यमानपरमात्म-सन्दर्शनप्राप्तिश्च।

अन्यभारतीयदर्शनानामिव गीतायाः लक्ष्यमपि आध्यात्मिकमुक्तिप्रदानमेव भवति । येन समग्रव्यक्तित्वस्य परिवर्तनं भवति, यस्य फलरूपेण मानवीयप्रकृतिः

दैवीप्रवृत्तिरूपेण परिणमति नैतिकाचरणं स्वाभाविकं भवति, ईश्वरसाम्यं च प्राप्नोति । मुक्तात्मा ईश्वरीयज्ञानादभिप्रेरितो भवति । एवं दैवीसङ्कल्पेन कर्माचरणं भवति । बौद्धिकी प्रकृतिः दैवीप्रकृत्यां सम्मिलिता भवति । मोक्षप्राप्तये मनुष्यशरीरस्य मन इन्द्रियाणां च विनाशः नावश्यकः, किन्त तेषां शुद्धिः आवश्यकी । तद्द्वारा ईश्वरीयज्योतिर्दर्शनं भवति ।

शिक्षायाः वैयक्तिकसामाजिकोद्देश्यानां सम्यग्विवेचनं गीतायां लभ्यते । रणभूमौ उभयोः सेनयोः मध्ये स्थितस्य अर्जुनस्य मानसिकस्थितिः व्यक्तिगतस्वतन्त्रता, सामाजिककर्तव्ययोर्मध्ये डोलायमाना वर्तते । एकपक्षे अर्जुनः क्षत्रियो भवतीत्यनेन सामाजिककर्तव्यापेक्षा तस्य वर्तते। अतः युद्धं करणीयं भवति। (अ -२ श्लो-३२)तदर्थं व्यर्थमानसिकतर्कवितर्काः त्याज्याः । तदर्थं किमुचितं किमनुचितमिति चिन्तनाय अवसरः नास्ति। परन्तु अर्जुनः एतादृशमानसिकशान्तिं प्राप्तुं नेच्छति सः स्वयं सम्पूर्णरूपेण एकाकित्वमनुभवति। क्षत्रियकर्तव्यपालनद्वारा तस्य आन्तरिकशान्तिः लभ्यते स्म, परन्तु अर्जुनः तदकृत्वा मानसिकपीडाम् ईप्सितवान्। यदि अर्जुनः सामाजिककर्तव्यनिर्वहणे स्वत्मार्पणं करोति तर्हि अस्मिन् निहिताद्वितीयशक्तीनां प्रतीतिः तस्मै कथं भवति ? तस्य आत्मप्रत्ययः (Concept) कथं भवति? तस्य व्यक्तित्वविकासस्यावरोधः भवति । एवं गीतायां सामाजिककर्तव्यापेक्षया वैयक्तिकस्वतन्त्रतायाः कृते स्थानं दत्तं, परन्तु अनन्तरम् अर्जुनः अवश्यं युद्धं करोति । तथा क्षत्रियधर्मनिर्वाहोऽपि कृतः। एवं वैयक्तिकस्वतन्त्रतासामाजिकादर्शयोर्मध्ये समन्वयः गीतायां प्रकटितः वर्तते।

श्रीमद्भगवद्गीतानुसारं मनुष्याणां निर्णयस्वीकरणे कार्यकरणे च स्वातन्त्र्यं वर्तते । तथापि स्वतन्त्रताकारणात् मानवः अनुचितं कार्यं नैव कुर्यात् । प्रत्येकं व्यक्तौ वासुदेवः (ईश्वरः) निवसति । यदि यः कोऽपि अन्तःकरणप्रेरणया किमपि कर्म करोति, तत्पृष्ठभागे ईश्वरीयप्रेरणापि निहिता भवति । अतः 'स्वभावस्य' 'स्वधर्मस्य' च सहजप्रवृत्त्या प्रेरितमानवस्य कार्यं सामाजिकाहितकारकं नैव भवितुमर्हति । कोऽपि पुरुषः सामाजिककर्तव्यभावनया कर्म करोति चेत् तस्य भावनायाम् अहङ्कारभावः प्रविष्टः भवति । इदम् अविकसितव्यक्तित्वमित्युच्यते । यतो हि कर्तव्यम् अस्माकं सामाजिकदायित्वं नैव भवति । किन्तु अस्मान् प्रति अस्माकं दायित्वं भवति ।

अस्माकं कार्यं प्रति वयमेव दायिनः भवामः । कर्तव्यं सापेक्षं भवति। प्रत्येकम् अवस्थायां परिस्थितौ च कर्तव्यं भिद्यते । कर्तव्यं मानवस्य अपूर्णवर्तमानस्थितेः भाव्युच्चतरपूर्णमानवीयविकासाय च एकः मार्गः भवति । गीतायाः अनुसारं सर्वाणि कार्याणि भगवदर्पणीयान्येव । कर्मफलविषयकेच्छा नैव कार्या । परिणामचिन्तनं विना निर्लिप्तभावेन कर्म कर्तव्यम् । गीतायाः अनुसारं क्रियमाणं कार्यं मानवीयं न भवति, अपि तु दैविकम् । कार्यं तु सामाजिकदायित्वनिर्वाहाय न । प्रकृतेरनुसारं ईश्वरीयसङ्कल्पपूरणार्थं कार्यम्।

एवं गीतायाः अनुसारं शिक्षायाः उद्देश्यं सामाजिकदायित्वनिर्वहणज्ञानप्राप्तिः नास्ति। अपि तु अन्तरात्मनः शब्दश्रवणे अवगमने एव तदनुसारम् आचरणे च योग्यताप्राप्तिः भवति । सामाजिकदायित्वं कालदेशसापेक्षं भवति । प्रत्येकं समाजेन अभ्युपगतः व्यवहारः सत्यं, शिवं, न्यायोचितं न भवति । शिक्षाद्वारा एतादृशव्यक्तित्वाविष्कारः आवश्यकः, यः स्वान्तरात्मनः प्रकृत्यनुरूपव्यवहारी भवति, एवं सामाजिकान्यायस्य विरोधं कर्तुं शक्नोति ।

अत्र अयं प्रश्नः उदेति । विभिन्नव्यक्तीनां प्रवृत्तिः भिन्ना भवति । एवमेव तदा व्यवहारे अन्तःकरणप्रकृतेरपि भिन्नरूपेणाभिव्यञ्जनं दृश्यते । अस्यां स्थितौ कः न्यायोचितव्यवहारः भवति, कस्मिन् व्यवहारे दैवी प्रकृतिः प्रस्फुटिता भवति इति प्रश्नः उदेति । गीतानुसारं सर्वात्मसु ईश्वरसत्ता वर्तते इत्यतः सर्वे समाना एव । परन्तु कथं नाटकेषु विभिन्नपात्रधारिणः भिन्नभिन्नपात्रेषु भूमिकासु व्यवहरन्ति, परन्तु सर्वेऽपि यथा नाटकस्योद्देश्यं प्रपूरयन्ति, तद्वत् लक्ष्यपूर्त्यै सहयोगिनः भवन्ति , एवं प्रत्येकं व्यक्तिः स्वान्तरात्मनः आदेशानुसारं कर्माचरणद्वारा सर्वप्राणिषु विद्यमानसम्पूर्णसृष्टच्या व्याप्तसत्तायाः लक्ष्यपूर्तिं कुर्यात् ।

**ज्ञानिनः लक्षणम् -**

यः आत्मसाक्षाकृत् यस्य ज्ञानप्राप्तिः जाता, सः जीवन्मुक्तः इति व्यवह्रियते । गीतायां तादृशपुरुषः स्थिरबुद्धिः इति अथवा स्थितप्रज्ञः इति कथ्यते । भगवद्गीतायां स्थितप्रज्ञस्य लक्षणमेवमाह-

**स्थितप्रज्ञस्य का भाशा समाधिस्थस्य केशव ।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥**

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञा-स्तदोच्यते ॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥
यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्टिता ॥
यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठित ॥
विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्ज रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥
यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनिहरन्ति प्रसभं मनः ॥
तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥
ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।
सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥
क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥
रागद्वेष-वियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्ति-रशान्तस्य कुतः सुखम् ॥
इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवांभसि ॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।

इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥
या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्ति-माप्नोति न कामकामी ॥

यः मनोगतान् सर्वान् कामान् प्रजहाति, आत्मनि आत्मना सन्तुष्टः भवति सः स्थितप्रज्ञः यः दुःखेषु उद्वेगं न प्राप्नोति, सुखेषु आसक्तः न भवति, राग-द्वेष-भय-क्रोधरहितः सः स्थितधीः भवति । स्थितप्रज्ञः सर्वेषु विषयेषु व्यामोहरहितः सन् शुभास्वशुभासु अवस्थासु सन्तोषद्वेषरहितः समभावी भवति । ज्ञानी इन्द्रियजन्यविषयेषु मोहासक्तः न भवति । अर्थात् तान् प्रति अनासक्तः भवति । एवं गीताकारः स्पष्टयति विषयाणां परिहारः बुद्धिपूर्वकं नैव कार्यः । परन्तु विषयोपलब्धिसमये तेषु उदासीनव्यवहारः भवितव्यः इति, एतदेव ज्ञानिलक्षणं भवति । सदा विषयान् चिन्तयतः पुरुषस्य तेषु आसक्तिः भवति, ततः मनसि कामः जायते, कामात् क्रोधः, क्रोधात्संमोहः, सम्मोहात् स्मृतिविभ्रमः, स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् पुरुषः नश्यति इति ज्ञानाज्ञानयोः परिणामः प्रदर्शितः । ज्ञानी रागद्वेषरहितः आत्मवश्यैरिन्द्रियैः विषयेषु चरन्नपि मनःप्रसादं प्राप्नोति । मनःप्रसादे तस्य सर्वदुःखानां नाशः जायते अन्ते गीताकारः वदति - सर्वेषां प्राणिनां या रात्रिः भवति, तस्यां संयमीं जागर्ति । यस्मिन् समये सर्वे प्राणिनः जाग्रति, तदा संयमिनः रात्रिः भवति । अर्थात् अज्ञानरूपान्धकारे सर्वाणि भूतानि विषयमोहे मग्नानि भवन्ति । तदा ज्ञानी तेषु अनासक्तः भवति । यः पुरुषः सर्वान् कामान् त्यक्त्वा, भोगेषु निस्पृहो भूत्वा निरहंकारः, निर्मोहः सन् चरति सः परमशान्तिं प्राप्नोति । इत्थं शिक्षायाः उद्देश्यानि, आदर्शाः, मूल्यानि च अत्यन्तविशदरूपेण सम्यग् विवेचितानि दृश्यन्ते । एतादृशोच्चस्तरीयोद्देश्यानामवलोकनेन सामान्यशिक्षकस्य मनसि एषः भावः प्रादुर्भवति, एतेषामुद्देश्यानां प्राप्तिः सम्भवति न वेति । अस्मिन्नवसरे एतत् स्मर्तव्यं भवति, अत्र शिक्षा तावत् विद्यालयेनैव न सीमिता, किन्तु आजीवनं प्रचाल्यमाना प्रक्रिया । न केवलमस्मिन् जन्मनि, जन्मान्तरेष्वपि अनुवर्तते । गीतायाः अनुसारं मनुष्येण

वर्तमानस्थित्यपेक्षया उन्नत्यै सततं प्रयत्नः विधेयः । वर्तमानात् अपूर्णात् पूर्णतास्थितिं प्राप्नुयात्, अग्रेसरः भवेत् । अन्यथा प्रगतिः नैव स्यात् ।

**बालकस्वरूपम् -**

भगवद्गीतायां छात्रस्य बाह्यशरीरस्य, आत्मनश्च समानरूपं महत्त्वं प्रदत्तं वर्तते । ईश्वरस्य द्वौ अंशौ स्तः। एकः 'सत्' अन्यः 'असत्' । तत्र सदंशात् आत्मनः उत्पत्तिः, असदः औपाधिकशरीरस्योत्पत्तिः । अतः बालकशरीरस्य तादृशी पवित्रता एवं दैविकता भवति, यादृशी आत्मनः उक्ता वर्तते ।

भगवद्गीतानुसारं यदा वयं सर्वे ईश्वरीयचैतन्येन प्रकाशिताः भवेम, यच्चैतन्यं जन्मजन्मान्तरपर्यन्तमपि तिष्ठति, तत् अच्छेद्यम्, अदाह्यम्, अक्लेद्यम्, अशोष्यं, नित्यं, सनातनं च भवति । इदं दिव्यज्योतिः अव्यक्तम्, इन्द्रियैरगोचरम् । अचिन्त्या नाम मनसा ज्ञातुं नैव शक्यते । अविकारिणी अर्थात् कर्मेन्द्रियैः अनुभवार्हा नैव भवति । अस्य चैतन्यस्योपरि मृत्योः प्रभावोऽपि न पतति । एतत् नित्यं भवति । अध्यापकस्य छात्रविषये ईदृशः सङ्कल्पः भवतु । यत् शिक्षार्थी पञ्चभूतेभ्यः निर्मितशरीरेन्द्रिययुक्तनामरूपधारी प्राणी न, इदं शरीरम् आत्मनः निवासस्थानं भवति, तत्रापि सः आत्मा परमात्मनः रूपं भवति इति। अध्यापकेन छात्रशारीरिकेन्द्रियविकासविषयेऽपि उपेक्षा नैव कार्या । कुत इत्युक्तौ शरीरमपि दैविकं भवति , यतो हि दिव्यज्योतिः धरति । यः अध्यापकः ईश्वरविश्वासी भवति सः सर्वेषु छात्रेषु ईश्वरस्वरूपं पश्यति । अस्य छात्राः तस्योपासनापात्राः भवेयुः । छात्रशरीरं कर्मजन्यं भवति । अस्य शारीरिक- ऐन्द्रिय- मानसिकशक्तयः भिन्नाः भवन्ति । परन्तु शरीरनिहितात्मा एक एव । प्रत्येकं बालके देवत्वं भवति, परन्तु प्रच्छन्नरूपेण भवति । अतः शिक्षकस्य कर्तव्यं एवमस्ति शिक्षाद्वारा प्रच्छन्नज्योतिषः जागरणम् । जन्मतः बालकः दुष्टः पापी वा नैव भवति। यतो हि अस्य प्रकृतिः दैवी भवति । अज्ञानकारणात् बाह्यपापच्छायया आवृतो भवति । अतः ज्ञानद्वारा अस्य सुप्तशक्तीनां जागरणं कार्यम्, तदा वयं तस्मिन् देवत्वं द्रष्टुं शक्नुमः ।

**छात्रस्वभावाध्ययनावश्यकता -**

गीतानुसारं प्रत्येकं बालः आत्मनः प्रकृत्यनुसारं शिक्षां गृह्णाति । अतः शिक्षकाय बालप्रकृतेरवगमनम् आवश्यकं भवति। गीतायामुक्तं वर्तते -

**सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ।**

**प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ।।** (३ अ श्लो -३३)

ज्ञानवानपि प्रकृतेरनुसारम् आचरति। सर्वे प्राणिनः तेषां जन्मजातसंस्कारसदृशं व्यवहरन्ति । इन्द्रियनिग्रहेणापि प्रकृतेरियं प्रबला शक्तिः नावरुद्धा भवति। भगवद्गीतायां प्रकृतेः स्वधर्ममथवा सहजकर्म उद्दिश्य उक्तं वर्तते । बालकस्य शिक्षा तस्य जन्मजात-शक्तीरनुसृत्य आयोजनीया भवति ।

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।

सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ॥ (गी-अ१८श्लो -४८श्लो)

दोषयुक्तमपि सहजं कर्म न त्यजेत् , यतो हि सर्वे आरम्भाः (शिक्षायाः आरम्भः) येन केनापि दोषेण व्याप्ताः भवन्त्येव, यथा- अग्निः धूमेन आवृतो भवति । शिक्षाद्वारा शनैः शनैः दोषाणां निवारणं कार्यम्। तेन धूमेन अनावृताग्निवत् तेजोस्वी ज्ञानरूपी शिक्षार्थी प्रकाशते। एवं व्यक्तिः स्वाभाविककर्मद्वारापि सिद्धिं प्राप्नोति । अनेन प्रकारेण गीतायां बालकस्य सहजरुच्याधारेण शिक्षायाः आयोजनं करणीयमिति लभ्यते । नूतनज्ञानदानात्पूर्वं शिक्षार्थिनां कृते तत् ज्ञानप्राप्त्यर्थमावश्यकाभिप्रेरणा दातव्या भवति । इयमभिप्रेरणा तदा तदा परिस्थितिकारणात् उत्पन्ना भवति । कदाचित् सहजप्रकृतेः फलस्वरूपेण उत्पन्ना भवति। एवं अध्यापकः स्वप्रयासद्वारा सुषुप्तप्रेरणां जागरयति । कुरुक्षेत्रसंग्रामे युद्धभूमौ एतादृशी स्थितिः उत्पन्ना। परिस्थितिवलये बन्धितः अर्जुनः मोहासक्तः । श्रीकृष्णः अर्जुनं सहजस्वभावानुरूपं कर्मकरणार्थं प्रेरयति। परन्तु तदानीं परिस्थितिः अत्यन्तोग्रा वर्तते । यतो हि अर्जुनस्य युद्धचिकीर्षा नास्ति, परन्तु ज्ञानम् प्राप्तुम् आवश्यकपरिपक्वस्थितौ वर्तते, तदा अर्जुनः वदति -

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।

यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥

(अ-२ श्लो.७)

यपरिस्थितिकारणात् (कार्पण्यदोषकारणात् ) सहजः स्वभावः तमसावृतः जातः, एवं किंकर्तव्यताविमूढः सञ्जातः अर्जुनः । तदानीं सुकर्तव्यज्ञानप्राप्त्यर्थम् अर्जुनस्य मानसिकतत्परता जागरिता वर्तते । अस्यां स्थितौ अर्जुनः श्रीकृष्णं प्रार्थयामास ।

एवञ्च गीतायां शिष्यज्ञानप्रदानार्थं पूर्वम् अभिप्रेरणावश्यकता बलपूर्वकेण कथिता दृश्यते।

**छात्रपात्रत्वम् –**

उपनिषत्सारभूतगीतायामपि सत्पात्रस्यैव छात्रस्य कृते ज्ञानप्रदानं कार्यमिति दृढमतं वर्तते। शिक्षां प्राप्तुं सर्वेषामपि अधिकारः अस्ति, परन्तु शिक्षकस्यापि दायित्वमिदं भवति , यत् यः सत्पात्र भवति तस्यैव ज्ञानप्रदानं कर्तव्यम् । गीतायां सत्पात्रलक्षणमेवमुवाच । शिष्यत्वं प्राप्तुं छात्रेषु संयमः तथा तपः आवश्यकं भवति। छात्रे शिक्षकेषु भक्तिः, शुद्धा च भवितव्या । श्रोतुं तत्परता आवश्यकी, अध्यापक दोषप्रदर्शनकर्ता न स्यात् । प्रत्येकं व्यक्तेः सर्वविधज्ञानप्राप्तये योग्यता नैव भवति । परन्तु शिक्षां प्राप्तुम् अधिकारः अस्ति । गीतानुसारं छात्रयोग्यतानुगुणा, क्षमतानुगुणा शिक्षा दातव्या। कर्मसङ्गिनाम् अज्ञानां भर्त्सनद्वारा कर्मविमुखान् नैव कुर्यात्।

शिक्षार्थी अध्यापकं प्रति सर्वतोभावेन समर्पणभावं प्राप्नुयात् । ज्ञानाहङ्कारयोः मेलनं न स्यात् । यस्मात् ज्ञानं प्राप्तव्यं तं प्रति शिष्यः विनम्रः स्यात् । चतुर्थाध्याये एवमवोचत् , प्रणिपातेन ( नमस्कारद्वारा), चर्चाद्वारा सेवाद्वारा वा ज्ञानं प्राप्तव्यम् इति तत्त्वदर्शिनः तादृशपुरुषाय ज्ञानमुपदेक्ष्यन्ति ।

ज्ञानं प्राप्तुं श्रद्धा आवश्यकी । अश्रद्धायाः आशयः अयं वर्तते। छात्रः मनसि विद्यमानसर्वविधसन्देहान् लज्जां विना गुरुसमीपे पृष्ट्वा सन्देहनिवृत्तिं प्राप्नुयात् । विना सन्देहनिवृत्तिं शिक्षा नैव लभ्यते । शिक्षकस्य बोधनसामर्थ्यविषये शङ्का भवति चेत् छात्रः शिक्षां प्राप्तुं न शक्नुयात्। छात्रस्य मनसि एतादृशी विश्वासभावना स्यात् , अध्यापकः ज्ञानप्रदानाय सम्पूर्णसमर्थः इति। छात्राणां सर्वविधशङ्काः निवारयितुं अध्यापकस्य क्षमता अस्तीति च। तदैव ज्ञानादानप्रदानप्रक्रियायाः आरम्भः भवति ।

**शिक्षकयोग्यताः –**

छात्रेषु यथा श्रद्धा, विनयः, समर्पणादयः अपेक्षिताः तथैव शिक्षकेभ्यः अपि काश्चन अपेक्षिताः योग्यताः गीतायां प्रोक्ताः । शिक्षकस्य एतद्दायित्वं वर्तते यत् अध्यापकः छात्रेषु आत्मविश्वासं संस्थाप्य तेषां साफल्यकारकः स्यात् । बालकः नानाप्रकारकचिन्तनैः व्यथितो भवति । अतः अध्यापकः बालकं चिन्तनेभ्यः मुक्तीकृत्य, तेषां सफलतायै विश्वासं जनयेत् । कृष्णः अर्जुनं प्रति एवमवादीत् -

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

हे अर्जुन ! त्वं सर्वधर्मान् (अन्यव्यर्थविषयान् ) त्यक्त्वा मां शरणं व्रज । त्वामहं सर्वेभ्यः दोषेभ्यः मुक्तं करिष्यमि। तद्विषये शोकः मास्तु । शिक्षकेण विद्यार्थिषु आशावादः नाम आत्मविश्वासः कल्पनीयः । कृष्णः अवोचत् - हे अर्जुन ! मम शिष्यः कदापि नाशं न प्राप्नोति। (कौन्तेय प्रतिजानामि, न मे भक्तः प्रणश्यति) ममशिष्यः कदापि असफलः नैव भवति । एतादृशकथनेन छात्रेषु विश्वासः वर्धते । अतः छात्रेषु व्यक्तित्वनिर्माणार्थम् आत्मविश्वासः अत्यन्तावश्यकः इत्यवगम्यते । अध्यापकस्य मनसि छात्रविषये अत्यन्तस्नेहः आवश्यकः एवं सर्वदा छात्रहितकामना आवश्यकी । छात्राय यत् श्रेयसे भवति तदेवोपदेष्टव्यम् । छात्रेभ्यः किमपि ज्ञानं गोप्यरूपेण न स्थापनीयम् ।

गीतानुसारं छात्रव्यक्तित्वस्यापि विकासो दातव्यः । अध्यापकनिर्णयः, छात्रस्योपरि न प्रक्षेपणीयः । स्वतन्त्रनिर्णयाधिकारः छात्रेभ्यो दातव्यः । गीतायां सम्पूर्णज्ञानोपदेशानन्तरं कृष्णः अगादीत् - हे अर्जुन ! मया तुभ्यम् अत्यन्तं गुप्तं ज्ञानं बोधितम् । एतत्सर्वं सम्यक् परिशील्य यथेच्छेसि तथा कुरु । ( अ- १८- श्लो. - ६३) अध्ययनाध्यापनप्रक्रियायां शिष्यशिक्षकयोः रुचिः अपेक्ष्यते । उभयोर्मध्ये अन्यतरस्य रुचिः नास्ति चेदपि अध्ययनाध्यापनं सम्यक् नैव प्रचलति।

**गीतानिसारं पाठ्यक्रमः**

उपनिषत्सारभूतभगवद्गीतायामपि विद्यायां द्वौ भागौ स्तः । एकः भागः अपरा विद्या, अपरभागः परा विद्या । अपरापेक्षया परा विद्या उत्कृष्टा वर्तते । भूमिः, जलं, अग्निः, वायुः, प्रकाशः इत्यादयः मन एवं बुद्धिः एतानि अपराविद्याङ्गानि भवन्ति । एतेषां सर्वेषाम् अन्तर्गतरूपेण विद्यमानब्रह्मपदार्थः सर्वोत्कृष्टः विद्यते । पराविद्याप्राप्त्यर्थम् अपरा विद्या साधनं भवति , न तु अपरा विद्या साध्या भवति । अपराविद्यायां सर्वप्रकारज्ञानाध्ययनम् एवम् इन्द्रियेभ्यः बुद्ध्या च प्राप्तं सर्वमपि अनुभवात्मकं ज्ञानं (Empirical Knowledge) अन्तर्गतं भवति । पराविद्यायां केवलमात्मज्ञानं भवति । एतत् नित्यं , पूर्णं , सनातनं च भवति । गीतायां सप्तमाध्याये श्रीकृष्णः एवं प्रोवाच - 'अस्य जगतः सृष्टिस्थितिलयानां मत्तः अन्यः कारणं

नास्ति । एतत्सर्वं जगत् मयि सूत्रे मणिगणा इव। जले रसः, सूर्यचन्द्रयोः प्रभा, वेदेषु ओंकारः, नरेषु पौरुषं, पृथिव्यां पवित्रगन्धः, अग्नौ तेजः, सर्वभूतेषु जीवनं , तपस्विषु तपश्च अहमस्मि । सर्वभूतानां बीजमस्मि। बुद्धिमतां बुद्धिः, तेजस्विनां तेजः, बलवतां बलं, प्राणिषु धर्माविरुद्धो कामः अस्मि' । ( गी. अ. -७-श्लो.- ७ तः ११ )

शिक्षापाठ्यक्रमः शैक्षिकोद्देश्यप्राप्तये मार्गः स्यात् । अपराविद्याद्वारा जगतः अन्तर्निहितचेतनसत्तायाः अनुभूतिं प्राप्तुं विज्ञान- समाजशास्त्र-साहित्य-कलादिविषयाः सहायकाः भवेयुः । छात्रदृष्टौ स्पष्टतेयमावश्यकी - यत् बहिर्जगतः अध्ययनेन पूर्णता न मिलिष्यति । तस्य पृष्ठतः निहितेश्वरीयशक्तेः स्वीकरणमावश्यकं भवति ।

**बोधनपद्धतिः -**

शिक्षणविधिषु द्वे प्रमुखमनोवैज्ञानिकतथ्ये प्रतिबिम्बिते स्याताम् । प्रथमम् - शिक्षणविधिः सप्रयोजनः (Purposive) स्यात् । एवं छात्रसहजप्रवृत्तीनां (Innate urges) रुचीनाम् (Interests) उपरि आधारितः स्यात् । प्रकृतेरनुसारं छात्राः त्रिधा विभक्तुं शक्यन्ते। ज्ञानप्रधानप्रकृतयः, भावनाप्रधानप्रकृतयः, कर्मप्रधानप्रकृतयः। छात्रानुरूपं शिक्षणविधिरपि त्रिप्रकारः स्यात् । ज्ञानत्मकः, भावनात्मकः, कर्मात्मकश्च । यः छात्रः तथ्यानि एकीकर्तुं विश्लेषणं कर्तुं , तर्कितुम्, अवबोधनं प्राप्तुं च सक्षमः भवति, तस्मै ज्ञानात्मकविधिः उपयोक्तव्यः । अस्मिन्नेव विधौ श्रवण- मनन- निदिध्यासनादयः भवन्ति । यस्य छात्रस्य भावनात्मकप्रकृत्तिः भवति, तस्मै बुद्धिप्रधानीभूततार्किकप्रणाली नोपयुक्ता भवति। एतादृशः छात्रः ज्ञानम् आनन्दानुभूत्यर्थं गृह्णाति, न तु तार्किकविवेचनार्थम्। तृतीयप्रकारः छात्रः कर्मद्वारा अत्यन्तसरलतया ज्ञानमवगच्छति इति कृत्वा अभ्यसनमिति विधिः अस्य कृते अत्यन्तलाभकारी भवति । एक एव बालकः भिन्नावस्थासु तिस्रः प्रकृतीः अपि प्रकटयति । बाल्यावस्थायां क्रियाद्वारा सरलतया शिक्षाग्रहणं कर्तुं शक्नोति। अस्मिन्नेव वयसि स्वानुभवद्वारा शिक्षणं प्राप्तुमवसरः दातव्यः । उत्तरबाल्यावस्थायां क्रियाद्वारा शिक्षया साकम् अध्यापककथनद्वारा पुस्तकपठनद्वारा च ज्ञातुं शक्यते । अस्मिन् स्तरे श्रद्धापूर्वकं विवेचनपूर्वकं च ज्ञानग्रहणं नैव भवति । यत् पुस्तके लिखितं वर्तते, तत्सर्वं

जानाति । अत्र विद्यार्थी शङ्कां नैव करोति । अपि तु विना तर्कं शिक्षकवचनानुसारं कार्यं करोति । इदं वयः अनुकरणप्रधानं भवति । किशोरावस्थायां तार्किकबुद्धेः विकासो भवति । अध्यापककथनविषये पुस्तकीयज्ञानविषये च शङ्कां करोति । विश्लेषणम् एवं विवेचनं च करोति । एवं तर्कवितर्काभ्यां ज्ञानं गृह्णाति । ज्ञानभावनाकर्मात्मकविधयः स्वतन्त्रविधयः नैव भवन्ति। एकः अन्यस्य पूरकः भवति । अवस्थाविशेषे, व्यक्तिविशेषे, विषयविशेषसन्दर्भे वा एक एव विधिः यदि प्रधानो भवति, तदितरविधिद्वयं गौणरूपेण भवति । गीतायामेवमाह- 'ज्ञानं कर्मसु कौशलम्' अर्थात् कर्मणः कुशलतापूर्वकसम्पादनं ज्ञानं भवति । एवं ज्ञानभावनयोः समन्वयरूपव्यवहारो दरीदृश्यते । गीतायाः तृतीयचतुर्थपञ्चमाध्यायेषु त्रिप्रकारकविधीनां विवेचनम् उपलभ्यते ।

**गीतायाः वैशिष्ट्यम् -**

शिक्षादर्शनं कालविशेषसम्बद्धं नास्ति । किन्तु सार्वकालिकं वर्तते । यदा समाजे विशृङ्खलव्यवहारो भवति, तदा समाजोन्नत्यै समाजरक्षणाय परमात्मा येन केनापि शिक्षकरूपेण अवतरति । सामाजिकपरिवर्तनं निरन्तरप्रक्रिया भवति । समाजपरिवर्तनानुरूपं सामाजिकप्रक्रियायाः नियन्त्रणं शिक्षकस्य दायित्वं वर्तते । अधुनातनयुगे कर्मणः महत्ता निराकर्तुं नैव शक्यते । मौलिकसर्जनता वैज्ञानिकविकासः, औद्योगिकक्रान्तिः, अधिकोत्पादनम् एतत्सर्वं कर्माश्रितं भवति । गीताकारः मनुष्यम् एकत्र कर्मणः फलकारणादुत्पन्नाहङ्कारात् रक्षति । अन्यत्र कर्मणः विफलकारणादुत्पन्नकुण्ठनात् रक्षति । सामाजिकप्रगत्यै यदि मनुष्यः कर्म करोति एवं तस्मात् समाजिकविकासो भवति चेत् अत्र श्रेयः न कर्तुः , किन्तु ईश्वरस्य कर्मसफलतां न प्राप्नोति चेत् तस्योत्तरदायित्वमपि तस्य पुरुषस्य नैव भवति । मनुष्याणां केवलं कर्म कर्तुमेव अधिकारो भवति । शुभाशुभकर्मणः फलं भगवदधीनम् अस्ति । (कर्मण्येवाधिकारस्ते मा फलेषु कदाचन) अतः प्रत्येकं विद्यार्थिना ज्ञानं प्राप्तुम् आत्मनः शक्त्यनुसारं प्रयासः करणीयः । सफलता, असफलता वा ईश्वराधीना भवति । शिक्षकेणापि स्वकार्यम् उत्कृष्टरूपेण पूर्णपरिश्रमेण करणीयम्। अस्य परिश्रमस्य फलं तु भगवतः उपरि त्यक्तव्यं भवति ।

*************

## ४

# साङ्ख्ये शिक्षातत्त्वम्

षड् दर्शनेषु अत्यन्तप्राचीनदर्शनं सांख्यमिति मन्यते । अस्य प्रवर्तकः कपिलमुनिः । सांख्ययोगदर्शनयोः विवेचनं परस्परपूरकरूपेण भवति । सांख्यदर्शने तत्त्वचिन्तनं वर्तते, परन्तु योगदर्शने लक्ष्यप्राप्तौ साधनायाः मार्गः प्रदर्शितः वर्तते । सामान्यव्यवहारे सांख्यं नास्तिकदर्शनं भवति . यतो हि निरीश्वरवादिदर्शनं सांख्यदर्शनम् । सांख्यदर्शने सृष्टिकर्तुः ईश्वरस्य कल्पना नास्ति, अपि तु प्रकृतिं अथवा सृष्टिं स्वयम् एकस्वतन्त्रसत्तारूपेण स्वीकुर्वन्ति। पुरुषस्य चैतन्यप्रकाशेन प्रकृतिरेव सृष्टिरचनां करोति । एवमेव सांख्यदर्शने आत्मनं किमपि सर्वात्मत्वेन अथवा ब्रह्मणः अंशरूपेण न मन्यते, अपि तु सर्वेषाम् आत्मनां स्वतन्त्र- अस्तित्वं स्वीकुर्वन्ति। अनेन प्रकारेण सांख्यदर्शनं द्वैतदर्शनम् (Dualistic Philosophy) इति कथ्यते। यतो हि अस्मिन् द्वयोः स्वतन्त्र- सत्तयोः अङ्गीकारः कृतः । प्रथमः पुरुषः, द्वितीया प्रकृतिः । अन्यदृष्ट्या सांख्यदर्शनम् अनेकात्मवादि अपि भवति यतो हि अस्मिन् अनेक-आत्मनाम् अस्तित्वं स्वीकृतं वर्तते । अनन्तरकाले सांख्यदर्शनस्य व्याख्याम् एकात्मवादरूपेण (Monism) विधातुं प्रयासः कृतः । सांख्यपुरुषं ब्रह्मणः समरूपेण, प्रकृतिं मायारूपेण च प्रदर्शयितुं प्रयत्नः कृतः । गीतायां प्रकृति इत्यादि शब्दानां प्रयोगः अनेन प्रकारेण कृतः। परन्तु मौलिकरूपेण सांख्यविचारधारा द्वैतवादं प्रस्तौति ।

**बालविकासः**

सांख्यदर्शनस्य प्रमुखं योगदानं सृष्टिविकाससिद्धान्तः, यस्य सामान्यव्याख्या-तिरिक्ततया अनेकाः व्याख्याः भवितुमर्हन्ति । यथा सम्पूर्णसृष्ट्यां प्रकृतिपरुषयोः अथवा जडचैतन्ययोः सत्ताद्वयं विद्यते, अपि च सृष्ट्याः उत्पत्तिस्थित्योः व्याख्या उक्तसत्ताद्वयमाध्यमेन भवति तथा प्रत्येकव्यक्तौ, बालके, बालिकायाम्, अध्यापके वा सत्ताद्वयं वर्तते । सृष्ट्याः उत्पत्तिः एवं विकासः मनुष्यस्य जन्मनः विकासस्य स्थितेश्च समरूपं विद्यते । सर्वोपि मनुष्यः स्वयं सृष्टिः अस्ति, तथा सृष्टिविकासयोः सर्वासु स्थितिसु स्वकीयजीवनकालं यापयति । हॉल महाशयस्य 'कल्चर इपोक थ्योरी' इति ग्रन्थोऽपि एनं विषयं समर्थयति ।

छात्रस्य शारीरिक-मानसिक-भावात्मकबौद्धिक-आध्यात्मिकविकासेषु शिक्षायाः योगदानं भवति। अतः बालकस्य उत्केषु कुत्र विकासः केन प्रकारेण जातः इत्येतत् ज्ञानम् अध्यापकस्य आवश्यकं भवति। सांख्यद्वारा प्रतिपादितः सृष्टिविकासस्य सिद्धान्तः बालविकासस्य एकं क्रमवद्धं सिद्धान्तं प्रस्तौति ।

आधुनिकमनोविज्ञानस्य दृष्टया उक्तविकासक्रमावगमनार्थम् आवश्यकीभूतसांख्यद्वारा विश्लेषितनिम्न- तमतत्त्वानाम् आरम्भं कुर्मः ।

पुनर्जन्मसिद्धान्तानुसारम् आत्मा यदा एकं शरीरं त्यजति तदा तेन साकं पूर्वकर्मणाम् आधारेण सूक्ष्मशरीरमपि स्वीकृत्य गच्छति, अन्यथा अशरीरी आत्मा अन्यत् शरीरं कथं प्राप्नोति? सांख्यदर्शनानुसारं सूक्ष्मशरीराणि ज्ञानं-कर्म-मनः-इन्द्रियाणि -तन्मात्रेभ्यः निर्मितानि भवन्ति। एतत् सूक्ष्मशरीरम् अतिवाहकशरीरं भवति, यतो हि आत्मा अनेन साकं पुनर्जन्म प्राप्नोति । अयं प्रकाश इव स्थूलशरीरम् आवृत्य तिष्ठति । अनेन सुक्ष्मशरीररूपेण शिशुः मातृगर्भे जन्मधारणार्थं प्रविशति तत्र क्रमशः प्रत्येकं तन्मात्राः तस्य समरूपं महाभूततत्त्वं च उत्पादयिष्यन्ति। यथा शब्दात् आकाशः, स्पर्शात् वायुः, रूपात् तेजः, रसात् जलं, गन्धात् पृथिवी। अनेन प्रकारेण मातुः गर्भे पञ्चतत्त्वनिर्मितमानवशरीरस्य वृद्धिर्भवति। मासत्रयपर्यन्तं कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाञ्च विकासो न भवति । मासत्रयान्तरं भ्रूणस्य कर्मेन्द्रियाणां ज्ञानेन्द्रियाणाञ्च स्थूलरूपेण उत्पत्तिर्भवति । स्पर्शेन सम्बद्धकार्याणां सम्पादनार्थं पञ्चकर्मेन्द्रियाणि, श्रोतुं कर्णौ, द्रष्टुं नेत्रे, जिघ्रातुं नासिका, रसार्थं रसनं ज्ञानेन्द्रियाणां क्रमशः विकासः भवति । एतेषां निर्माणं पञ्चतन्मात्रेभ्यः निर्मितपञ्चमहाभूतानां सम्मिश्रणात् भवति । जन्मतः पूर्वपर्यन्तम् इन्द्रियाणि पाक्षिकरूपेण कार्यशीलानि अंशतः सुषुप्तौ भवन्ति । मनसः विकासः गर्भावस्थायां न भवति। जन्मानन्तरं कर्मेन्द्रियाणि सक्रियाणि भवन्ति । ज्ञानेन्द्रियाणि स्वकार्यव्यापारं शनैः शनैः आरम्भं कुर्वन्ति। ज्ञानेन्द्रियाणां विकासः सम्पूर्णशैशवास्थायां तथा बाल्यावस्थायां प्रचलति। सांख्यदर्शने मनः अभौतिकतत्त्वं नास्ति । मनोऽपि दशेन्द्रियैः अतिरिक्तम् एकम् अन्तरिन्द्रियं, तत्स्थूलरूपेण द्रष्टुं न शक्यते । यथा अन्येन्द्रियाणि ज्ञानोपकरणानि भवन्ति , तथा मनः अपि ज्ञानस्य साधनम्, येन विना ज्ञानस्य क्रिया सम्पन्ना न भवति । मनसः विकासः जन्मप्राप्त्यनन्तरं भवति । अत एव मानसिकविकासे शिक्षायाः योगदानम् अधिकाधिकं भवितुमर्हति । अन्येन्द्रियाणि तु

येन प्रकारेण प्राप्तानि तेन प्रकारेणैव स्वीकर्तव्यानि। शिक्षाद्वारा तेषां शक्तिः वर्धयितुं शक्यते , परन्तु तेषां परिवर्तनन्तु कर्तुं नैव शक्यते । मनसः कार्यम् इन्द्रियद्वारा अनुभूतविषयस्य परिचयः। इन्द्रियाणि अनुभूतविषयस्य मनःपर्यन्तं प्रापयन्ति। मनः इन्द्रियद्वारा अनुभूतविषयस्योपरि संकल्पं विकल्पं च करोति । मनः तादृश ज्ञानप्रक्रियाणां संस्थानं भवति, यत् वस्तूनां परस्पराकलनञ्च तथा मानसिकप्रक्रियासम्पन्नां कर्तुं प्रभवति । अनेन कारणेन विचाराणां क्रिया सम्पन्ना भवति। मनः सा भौतिकशक्तिर्भवति या चेतनावृता भवति। एतत् मनः प्रक्रियाणां दिग्दर्शनमपि करोति । अस्मिन् अवधानं, विश्लेषणं, संश्लेषणं, चयनम् एवं निरसनम् इत्यादिशक्तयः निहिताः भवन्ति। एतत् विचारतर्ककल्पनाविकल्पस्वप्नज्ञानभावना-इच्छाविकारदीनाम् अधिष्ठानं भवति । अस्य आन्तरिकधर्मविचारः भवति ।

मनसः अनन्तरं विचारप्रक्रियायां द्वयोः तत्त्वयोः विकासः भवति । एतयोः तत्त्वयोः क्रमशः अहंकारः महत् इति नाम । एते बाह्यकरणे न भवतः, अपि तु एते अन्तःकरणे भवतः । स्थूलशरीरे अनयोः अस्तित्वं कुत्रापि द्रष्टुं न शक्यते । प्रायः प्रथमे वर्षे अहंकारस्य विकासः भवति। तदनन्तरं तस्य विकासः आजीवनं तिष्ठति। अहंकारकारणात् बालकस्य "स्व" प्रत्ययः विकसितो भवति । अनेन कारणेन अहं, मम इत्यादि बोधः भवति । मनसः कार्यं तु विश्वस्य वस्तुनिष्ठज्ञानप्रस्तुतीकरणम् , परन्तु अनेन साकं तादात्म्यम् अहंकारस्य फलस्वरूपं सम्भवति। अहंकारकारणात् एव बालकः स्वयं कर्मणः कर्ता, ज्ञानस्य ज्ञाता, फलानाञ्च भोक्ता इति मन्यते। बालकस्य सामाजीकरणं, संस्कृतीकरणम्, आत्मीकरणम् इत्यादि शैक्षिकप्रक्रियाः अस्य अहंकारस्य फलस्वरूपेणैव सम्भवन्ति । वैयक्तीकरणमपि अहंकारभावनादेव सम्भवति आरम्भे बालकेषु अहंकारः न्यूनरूपेण भवति । वयसा साकम् अयम् एधते । बालविकासस्य सर्वोन्नतशिखरः बुद्धे : अथवा महतः विकासः । मनः ज्ञानस्य विषयवस्तूनां च आकलनं करोति । अहंकारः तानि आत्मसात्कर्तुं प्रभवति । परन्तु मनः अहङ्कारो वा, निर्णयं कर्तुं न शक्नुतः । मनसः समीपे बाह्यजगतः अनुभवानां तथ्यात्मकसंकलनं वर्तते । अहंकारः सहजप्रवृत्तीनां तथा संवेगानां (येषु सुखदुःखात्मकानुभूतीनां प्राधान्यं भवति ) भण्डारः भवति। बुद्धिः तेषां चिन्तनं करोति तदा किं करणीयं ? किम् अकरणीयमिति च निर्णयं करोति । मनोऽहंकारबुद्धयः

क्रमेण चित्तस्य ज्ञानात्मकभावात्मकसंकल्पात्मकपक्षाणां प्रतिनिधित्वं कुर्वन्ति । ज्ञानप्राप्तिप्रक्रियायाम् इन्द्रियाणि अनुभूतविषयसामग्रीं मनःपर्यन्तं प्रापयन्ति । मनः संकल्पं कृत्वा अहंकारसमीपं प्रेषयति, तथा अहंकारः विषयेण साकं तादात्म्यं कृत्वा निश्चयार्थं बुद्धिसमीपं प्रेषयति । बुद्धिः संवेद्यविषयरूपेण रूपान्तरं प्राप्य अहंकारमाध्यमेन मनः कार्यं कर्तुं प्रेरयति । अपि च मनः ज्ञानेन्द्रियैः कर्मेन्द्रियैः अथवा उभयोः मिश्रितयोगेन अपेक्षितकार्यं सम्पादयति ।

इतोऽपि एकः सत्तात्मकपदार्थः, यं मनोविज्ञानं न स्वीकरोति । परन्तु यः सर्वेषां दर्शनानाम् आधारः भवति सः पुरुषः, अथवा आत्मा । सांख्यमतानुसारं प्रकृतिः अचेतना तथा जडा भवति। बुद्धिमनोऽहंकारादयः अपि चेतनरहितकारणात् स्वयं शक्त्या ज्ञानं प्राप्तुं न शक्नुवन्ति, नापि क्रियाशीलाः भवन्ति । तेषां पुरुषस्य चेतनायाः प्रकाशः प्राप्तो भवति, अपि च अस्य प्रकाशस्य फलस्वरूपेण बुद्ध्यादयः ज्ञानप्राप्तौ समर्थाः भवन्ति। सांख्यमतानुसारं पुरुषः स्वयं चेतनः, परन्तु सः अशरीरी कर्मरहितः । सः स्वयं किमपि कर्तुं न शक्नोति । पुरुषं सक्रियं कर्तुं प्रकृतेः सहायता आवश्यकी । सः बुद्धि-अहङ्कार-मन-इन्द्रियादीनां माध्यमेन जानाति, तथा क्रियाशीलः भवति । पुरुषः चेतनात्मा भवति । सः सर्वदा ज्ञाता भवति । सः ज्ञेयः कदापि न भवितुमर्हति। प्रकृतितः उद्भूतानि बुद्धि-अहंकारादीनि ज्ञानप्राप्तिसधनानि अचेतनानि भवन्ति । अचेतनतत्त्वं स्वस्य चेतनायाः विषयो न भवितुमर्हति । तत् स्वयम् अन्यविषयं न ज्ञातुं शक्नोति नात्मानं प्रकटीकर्तुं शक्नोति । प्रकृत्या प्रदत्तम् एतत् नामरूपशरीरं चेतनतत्वेन प्रकाशितं भवति, अतः पुरुषः ज्ञाता भवितुमर्हति, न स्वयं ज्ञेयः । द्वितीयपक्षे प्रकृतिः ज्ञेया भवितुमर्हति न ज्ञाता भवति। सांख्यदर्शनस्य एतत् विवेचनं बालप्रकृतेः अवधारणाय अत्यन्तमहत्त्वपूर्णं भजते । शिक्षकाय अयं सन्देशः भवति । यत् ज्ञानप्राप्तौ बालकस्य शरीरं तथा आत्मा उभयोः सापेक्षिकमहत्त्व वर्तते । भारतीयचिन्तनस्योपरि अयमारोपः वर्तते यत् भारतीयचिन्तनं शरीरं हेयरूपेण मत्वा तस्य उपेक्षां करोति, तथा आत्मविश्वासस्य विषये निष्प्रयोजनं भाषणं करोति, यस्य अवगमनम् अत्यन्तं कठिनं भवति । अन्यस्मिन् पक्षे भौतिकवादि दर्शनमपि एतस्मात् आरोपात् मुक्तं नास्ति, यत् एते आत्मनः उपेक्षां कुर्वन्ति, अपि च ज्ञानप्राप्तिप्रक्रियां सर्वथा भौतिकधरातलस्योपरि

संस्थाप्य पश्यन्ति । सांख्यदर्शनं मध्यममार्गं प्रस्तुतीकरोति । केवलम् आत्मा विना शरीरसहायं स्वयम् अभिव्यक्तः न भवितुमर्हति । शरीरं विना आत्मा पङ्गुः भवति । तथा निष्क्रियः भवति । द्वितीयं तु आत्मनः प्रकाशेन रहितं शरीरम् अन्धसदृशं भवति । जीवने परिपूर्णतासम्पादनाय शरीरात्मनोः मध्ये सहयोगः आवश्यकः । सांख्यदर्शनानुसारं छात्रस्य शारीरिकमानसिकवैयक्तिकबौद्धिक-आध्यात्मिकविकासकरणं शिक्षायाः महत्त्वपूर्णलक्ष्यं भवति।

**शिक्षायाः उद्देश्यानि**

सांख्यदर्शनानुसारं शिक्षायाः उद्देश्यानि द्विधा विभक्तुं शक्यन्ते, पारमार्थिकलौकिकभेदेन। भारतीय-अन्यदर्शनसदृशं सांख्यदर्शनस्यापि शिक्षायाः अनन्यतमपारमार्थिकमुद्देश्यं मोक्षप्राप्तिः। अत्र प्रश्नः उदेति मुक्तिः कथं भवति ? यथा वयं बौद्धदर्शने दृष्टवन्तः यत् वयम् अविद्या एवम् अज्ञानान्धकारे मग्ना भवेम । अनेन कारणेन वयं दुःखिनः। संसारे वयं केवलं दुःखमेव पश्यामः, अतः शिक्षायाः कार्यं मनुष्यम् अविद्यातः तथा अज्ञानात् मुक्तेः प्रापणम्। सांख्यदर्शनानुसारम् इयं सृष्टिः अथवा अस्याः लघुरूपम् इदं शरीरं तत्त्वत्रयेण निर्मितं वर्तते । यानि सत्त्वरजस्तमांसि इति व्यवह्रियन्ते । एतानि त्रीणि तत्त्वानि क्रमशः सुखदुःख-उदासीनतानां प्रतिनिधित्वं वहन्ति । प्रत्येकं जागतिकः अनुभवः शुद्धतः न सुखकारकः दुःखकारको वा, अथवा न सुखदुःखनिरपेक्षः । अपि तु प्रत्येकस्मिन् अनुभवे त्रयाणां तत्त्वानाम् सम्मिश्रणं भवति । सत्त्वबाहुल्यात् सः सुखदायी प्रतीतो भवति । यद्यपि तस्य पृष्ठभागे दुःख-उदासीनभावयोः मेलनं भवति । अनेन प्रकारेण रजोगुणबाहुल्यात् यः कोऽपि अनुभवः दुःखदप्रतीतो भवति । यद्यपि दुःखस्य पृष्ठभागे सुखतटस्थभावयोः गुप्तरूपस्थितिर्भवति ।

सत्त्वरजस्तमोगुणयुक्त : सर्वोऽपि अनुभवः वातावरणजन्यः भवति तथा एतत् शरीरं प्रभावितं करोति। आत्मा एतस्मिन् सर्वस्मिन् असंपृक्तः(Detached) भवति । परन्तु अहंकारभावकारणात् जनितजागतिकदुःखानि वयम् आत्मनः दुःखानीति चिन्तयामः आत्मजडप्रकृत्योः पार्थक्यमज्ञात्वा वयं प्रकृतिम् आत्मा इति मन्यामहे । फलतः दुःखानामनुभवं कुर्मः । प्रकृत्यात्मनोः अभेदज्ञानमेव अविद्या भवति । सांख्यैः अविद्यातः उत्पन्नानां त्रयाणां दुःखानां वर्णनं कृतमस्ति ।

प्रथमप्रकारं दुःखम् आध्यात्मिकदुःखं भवति, यस्यान्तर्गते सर्वप्रकारकशारीरिक- मानसिकदुःखानि भवन्ति । यथा- आधिः , व्याधिः, क्षुधा, क्रोधः , सन्तापः, उन्मादः इत्यादयः। द्वितीयं दुःखम् आधिभौतिकं भवति, यत् बाह्य भौतिकपदार्थानां कारणात् उत्पन्नं भवति । यथा- अकस्मात् जायमानः व्रणादिः, वृष्टिकारणात् जायमानं शैत्यं, सर्पवृश्चिकयोः दंशनादयः । तृतीयं दुःखम् आधि-दैविकं भवति , यत् बाह्यालौकिककारणेभ्यः उत्पन्नं भवति । यथा - अतिवृष्टिः, अनावृष्टिः, भूकम्पः इत्यादयः । एतेभ्यः दुःखेभ्यः विमुक्तिरेव मुक्तिः इत्युच्यते । शिक्षायाः उद्देश्यं, पुरुषाय एतेभ्यः दुःखेभ्यः विमुक्तये ज्ञानप्रदानम् । मनुष्यः स्वबुद्धिबलेन जीवने अनेकसुखसौकर्याणि सम्पादयति, परन्तु अनेन क्षणिकसुखप्राप्तिरेव भवितुमर्हति । सुखं बाह्योपादानेषु नास्ति, तत् आन्तरिकं भवति । एतत् तु आत्मज्ञानद्वारैव प्राप्तुं शक्यते । सुखदुःखे वास्तविकरूपेण शारीरिकधर्मौ भवतः । एतौ शरीरजन्यौ, मानसिकबुद्धिजन्यौ वा । सांख्यदर्शनानुसारम् आत्मभिन्नपदार्थाः आत्मनः चैतन्यात् उद्भासिताः भवन्ति । एवम् आत्मनि स्वविकारम् आरोपयन्ति । एतदेव अज्ञानमिति कथ्यते । एतत् अज्ञानमेव समस्तदुःखानां मूलकारणं भवति । दुःखेभ्यः मुक्तिं प्राप्तुं विवेकज्ञानस्य आवश्यकता वर्तते । विवेकज्ञानादेव दुःखानां निवृत्तिः अथवा मुक्तिः सम्भवति । विषयोऽयं शाब्दिकरूपेण अवगमनमात्रेण मुक्तिः न जायते, अपि तु अस्य साक्षात् अनभूतिः आवश्यकी यत् , आत्मा (अहं) शरीरेन्द्रियमनोबुद्धिभ्यः भिन्नः इति । यदा आत्मनः मोक्षप्राप्तिः भवति तदा अस्मिन् कोऽपि विकारः नायाति, यस्य कस्यापि नवीनगुणस्य अथवा धर्मस्य आविर्भावः न भवति। अस्य तत्त्वस्य साक्षात्कार एव मोक्षः भवति यत् आत्मा देशकालाभ्यां भिन्नः शरीरमनोभ्यां भिन्नः मुक्तः नित्य इति । अनेन प्रकारेण अनुभूतिप्राप्तिरेव विवेकज्ञानस्य उदयः । विवेकज्ञानस्य उत्पत्तेः अनन्तरं दुःखत्रयं स्वयमेव नश्यति।

लौकिकदृष्ट्या उद्देश्यानां निरूपणं प्रकृतितत्त्वानां विकाससन्दर्भे क्रियते । बालकस्य शारीरिकविकासान्तर्गतत्वेन तस्य कर्मेन्द्रियाणि क्रियाशीलानि भवेयुः । शिक्षाद्वारा तेषाम् अकर्मताभारात् मुक्तिरावश्यकी। ज्ञानेन्द्रियाणि ज्ञानप्राप्तौ प्राथमिकसाधनानि भवन्ति । यदि प्रत्यक्षज्ञानं दोषपूर्णं भवति चेत् मनः किं कर्तुं शक्नोति ? अतः इन्द्रियज्ञानस्य विकासोऽपि शिक्षायाः एकम् उद्देश्यं भवति। अस्य

सर्वस्योपरि बौद्धिकविकासः आयाति । बौद्धिकविकासेनैव मानवः सत्यमनुष्यः भवति । बौद्धिकविकासस्य फलस्वरूपेण व्यक्तिः स्वतन्त्रनिर्णयस्वीकरणशक्तिं प्राप्नोति । बौद्धिकविकासस्य फलतः सः शरीरेन्द्रियमनोऽहंकारादीनां दासः न भवति परन्तु तेषां स्वामी भवति । इच्छाशक्तेः स्वतन्त्रतायाश्च नियामक एव महत्तत्त्वं भवति । यस्य विवेकस्य विषयः उपरि कथितः वर्तते तस्य विवेकस्य जागृत्यै बौद्धिकविकासः आवश्यकः । संक्षेपेण शारीरिकमानसिकवैयक्तिकबौद्धिकविकासः नाम आधुनिकंशिक्षाशास्त्रे सर्वाङ्गीणविकासः सांख्यदर्शनानुसारं शिक्षायाः लौकिकमुद्देश्यं भवति ।

## विभिन्नावस्थासु पाठ्यक्रमः

सांख्यदर्शनं मनोवैज्ञानिकाधारैः निर्मितम् इत्यतः तस्यान्तर्गतपाठ्यक्रमस्य विवेचनम् अवस्थानुसारं कर्तुं शक्यते।

### १) शैशवावस्था -

अस्यामवस्थायां बालकस्य ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्च विकासः भवति, अतः अस्यामवस्थायां पाठ्यक्रमे इन्द्रियविकाससम्बन्धपाठ्यक्रमस्य प्राधान्यं दातव्यम् । अवस्थायाम् अस्यां पाठनसामग्र्यन्तर्गततत्वेन भूमिः, जलं ,प्रकाशः, वायुः, आकशः इत्यादयः स्युः । बालकस्य एतैः साकम् अधिकाधिकं सम्पर्कं प्राप्तुम् अवसरः दातव्यः तदा बालकः एतान् अधिकृत्य ज्ञानं प्राप्नोति। पञ्चमहाभूतानि तन्मात्रेभ्यः उद्भूतानि । तेषामनुभूतिः छात्रैः प्राप्तव्या भवति । द्वितीयप्रकारे अस्मिन् स्तरे रूपरसगन्धस्पर्शानां तन्मात्राणां प्रशिक्षणम् आवश्यकम्। अस्मिन् वयसि शब्दानां वृद्धिः द्रुतगत्या भवति । प्रयासेन एषा वृद्धिः इतोऽपि अधिकरूपेण कर्तव्यम् । शब्दान्तर्गततत्वेन ध्वनि-उच्चारणादीनां समावेशोऽपि भवति। वस्तूनां रूपम् आकृतिः, आकारः इत्यादीनामनुभवः रूपतन्मात्रान्तर्गतः भवति । रसतन्मात्रान्तर्गततत्वेन विभिन्नरुचीनां परिचयः तथा रसनाद्वारा पदार्थानां गुणज्ञानञ्च आयाति । गन्धान्तर्गततत्वेन घ्राणेन्द्रियजन्यानुभवाः समाविष्टाः भवन्ति । स्पर्शान्तर्गततत्वेन मृदुकठिन-अधिकन्यूनादीनामनुभवः भवति । अस्यांमवस्थायां शारीरिकविकासोऽपि द्रुतगत्या भवति । अतः शारीरिकस्वास्थ्यं व्यायामः इत्यादयः अपि अस्य स्तरस्य पाठ्यक्रमे आवश्यकविषयाः ।

**२) बाल्यावस्था -**

अस्मिन् वयसि अपि शारीरिक-ऐन्द्रियविकासः प्रवर्तते । अतः शैशवावस्थायाः कृते निर्धारितपाठ्यक्रम एव अधिकसमुन्नतरूपेण अस्यामवस्थायां स्वीकरणीया भवति । एतदतिरिक्तरूपेण मनसः विकासः अस्मिन् स्तरे वेगेन भवति । अस्मिन् वयसि बालकानां स्मरणशक्तिः तीव्रा भवति तथा कल्पना गभीरा भवति । तथ्यानां सञ्चयनाय अत्यन्तोपयुक्तं वयः भवति । अस्यामवस्थायां बालकानां "स्व" प्रत्ययस्य चिन्तनम् आरभ्यते । अत्र पाठ्यक्रमे भाषा, गणितं, सामाजिकविषयः तथा विज्ञानस्य तथ्यात्मकपक्षाणां दृढीकरणमावश्यकम् । स्मरणार्थं स्थापनीयविषयाणां कण्ठस्थीकरणम् अस्मिन् वयसि अधिकोपयुक्तं भवति ।

**३) किशोरावस्था -**

अस्मिन् वयसि 'स्वप्रत्ययः' स्थायित्वं प्राप्नोति तथा विनिश्चयकारिणी बुद्धिः जागरिता भवति । अस्मिन् स्तर पाठ्यक्रमे विवेचनात्मकविषयाणां प्राधान्यम् आवश्यकम् । बाल्यावस्थायां बुद्धेः विकासाभावात् तर्कशून्यतथ्यात्मकाना ज्ञानं प्राप्नोति । परन्तु किशोरावस्थायां तेषां विषयाणां विवेचनं तर्कसम्मतं कर्तुं शक्यते । अस्मिन् आयुषि छात्रः प्रदत्तं ज्ञानं यथा वर्तते तथैव न स्वीकरोति, परन्तु तत् सम्बन्धे निर्णयस्वीकरणकार्यमपि करोति । अस्मिन् आयुषि छात्राणाम् अवधारणानि स्थैर्यं प्राप्नुवन्ति । मौलिकतायाः आविर्भावः भवति तथा बालकः स्वकीय दृष्टिकोणनिर्माणेऽपि समर्थो भवति । अध्यापने एतेषां विषयाणां ध्यानम् आवश्यकं वर्तते ।

**४) अन्या अवस्थाः -**

विद्यालयीयशिक्षासमाप्त्यनन्तरमपि शिक्षा प्रचलन्ती भवति । परन्तु तावत्पर्यन्तं व्यक्तित्वस्य निर्माणं पूर्णं भवति। जडप्रकृतिः तथा चैतन्यं भिन्ने भवतः, इत्ययं विवेकः क्रमेण विकासं प्राप्नुयात् । अयं विवेकः जीवनस्य प्रत्येकस्मिन् क्षेत्रे तथा मनुष्यस्य प्रत्येकव्यवहारे परिलक्षितो भवेत् ।

**ज्ञानस्योत्पत्तिः**

सांख्यमते यथार्थज्ञानं प्रमा इति कथ्यते, तथा मिथ्याज्ञानम् अप्रमा भवति । सांख्यानुसारं पदार्थस्य निश्चयः एवं त्रुटिरहित-अर्थपरिच्छित्तिः प्रमा

इत्युच्यते। अर्थात् तज्ज्ञानं सत्यं भवत्ति यस्मिन् बुद्ध्याः वृत्तिः वस्तुनः रूपं सम्यगूरूपेण प्रकटयति । प्रमाज्ञानं त्रुटिरहितं गुणयुक्तं भ्रमरहितञ्च भवति । प्रमा यथार्थानुभवः भवति । यः स्मृतिभिन्नः ज्ञानेन्द्रियार्थसंयोगेन उत्पन्नं साक्षात् ज्ञानं भवति । इयं प्रमा सामान्यं भवति , वस्तुनिष्ठं भवति, सर्वासु स्थितिषु समरूपा भवति । ज्ञानप्राप्तौ त्रयाणां तत्त्वानां प्रयोगः भवति - प्रथमं प्रमाता, अर्थात् ज्ञाता यः आत्मा अथवा पुरुषः भवति तथा चैतन्यस्वरूपः भवति । द्वितीयं - प्रमेयः, नाम प्रमाविषयः। तृतीयं प्रमाणं , येन माध्यमेन प्रमाता प्रमेयं ज्ञानाति । प्रमाणं सः विधिः येन महतः रूपान्तरणं भवति ।

ज्ञानस्योत्पत्तेः सम्बन्धे सांख्यमतं , व्यवहारवादि मनोवैज्ञानिकानाम् उद्दीपन-अनुक्रिया-सिद्धान्तेन साम्यतां भजते। साख्यमतानुसारं ज्ञानं वस्तुविशेषस्य आकारम् अथवा अन्यगुणानां माध्यमेन उत्पन्नं भवति । परन्तु अयम् आकारः बहिः आगत्य बुद्धौ आरोपितो न भवति, तस्य विपरीतरूपेण, बुद्धिः कस्यापि उपयुक्त-उद्दीपनं प्राप्य वस्तुनः आकारग्रहणं करोति । विकारशीलबुद्धेः इयं रूपान्तरवृत्तिः केवलं प्रत्यक्षज्ञाने एव नास्ति, अपि तु चेतनायाः सर्वेषु रूपेषु प्राप्नोति । यथा उपरि कथितमस्ति बुद्धिः पु रुषस्य चेतनया प्रकाशिता भवति, तदा ज्ञानोत्पत्तिर्जायते । उद्दीपन-अनुक्रियासिद्धान्तात् सांख्यसिद्धान्ते भेदः अयं भवति उद्दीपन-अनुक्रियायां ज्ञानस्य गतिः बहिः अन्तः भवति, परन्तु सांख्यसिद्धान्ते इयं प्रक्रिया ज्ञातृतः ज्ञेयं प्रति प्रवर्तते ।

**प्रमाणानि**

सांख्ये त्रीणि प्रमाणानि उल्लिखितानि । प्रथमः प्रत्यक्षविधिः(Perception) , द्वितीयः अनुमानविधिः(Inference) , तृतीयः शब्दविधिः(Testimony) । उपमान(Comparison) , अर्थापत्तिः(Postulation) , अनुपलब्धिः(Non - Cognition) इत्यादिप्रमाणानि सांख्यैरुक्तत्रिषु प्रमाणेषु अन्तर्गतानि भवन्ति।

**प्रत्यक्षविधिः**

इन्द्रियार्थसम्पर्केण यत् ज्ञानं जायते प्रत्यक्षेण तद् ज्ञानमिति उच्यते ।

प्रत्यक्षद्वारा प्राप्तं ज्ञानं यथार्थं तथा साक्षात् भवति। उदाहरणार्थं कमपि मनुष्यं नेत्राभ्यां समीपे दृष्ट्वा इदं ज्ञानं भवति यत् अयं पुरुष इति तत् प्रत्यक्षज्ञानं भवति । परन्तु दूरतः दृष्ट्वा यदि सन्दिहति अयं मनुष्यो वा वृक्षो वा इति, तत् यथार्थज्ञानं न भवति , किन्तु सन्दिग्धज्ञानम् अथवा भ्रमात्मकज्ञानं भवति तत् प्रत्यक्षज्ञानमिति वक्तुं न शक्यते । प्रत्यक्षज्ञाने इन्द्रियमनोबुद्धि-आत्मेति चतुर्णां क्रियाशीलता भवति । परन्तु अन्येषु विधिषु इन्द्रियाणाम् अभावः भवति ।

प्रत्यक्षज्ञानं पूर्वानुभवस्योपरि आधारितं न भवति । कस्यापि वस्तुनः साक्षात्कारानन्तरमेव तस्य प्रत्यक्षज्ञानं भवति। अतः प्रत्यक्षज्ञानं प्रत्यक्षसाधनानि त्यक्त्वा केनापि अन्यज्ञानमाध्यमेन न प्राप्तं भवति । सांख्यमते द्विविधं प्रत्यक्षं भवति, निर्विकल्पकसविकल्पकभेदेन ।

**निर्विकल्पकप्रत्यक्षम्**

इन्द्रियार्थसम्पर्केण या अनभिव्यक्तवस्त्वनुभूतिः तत् निर्विकल्पकप्रत्यक्षमित्युच्यते । इन्द्रियप्रदत्तस्य अंशस्य मानसिकसंश्लेषण विश्लेषणादिषु इयं पूर्वावस्था भवति । इयं हि मनोविज्ञानपरिभाषा संवेदनम् (Sensation) इत्युच्यते। अस्मिन् स्तरे ज्ञेयवस्तुनः परिचयो न भवति, आभासमात्रं भवति ।

**सविकल्पकप्रत्यक्षम्**

प्रत्यक्षस्य द्वितीयावस्था सविकल्पकप्रत्यक्षं भवति । इदम् इन्द्रियप्रदत्तानाम् अंशानामुपरि मानसिक-विश्लेषण-संश्लेषण -व्याख्यानपरिणामो भवति । सविकल्पकप्रत्यक्षं वस्तुनः निश्चितं ज्ञानं, यस्मिन् वस्तुनः प्रकारगुणसम्बन्धादीनां स्पष्टावगमनं भवति । सविकल्पकप्रत्यक्षज्ञानस्य अभिव्यक्तिः उद्देश्यविधेययुक्तवाक्येषु इत्थं कर्तुं शक्यते, यथा "इयं गौः कृष्णवर्णा" ।

बालकस्य शिक्षायाः मूलाधारः प्रत्यक्षज्ञानं भवति । अनन्तरं यत् ज्ञानं भाषाधारेण प्राप्तं भवति तदर्थं येषां संज्ञाक्रियाविशेषणादीनां प्रयोगः आवश्यकः तत् सर्वं प्रारम्भे प्रत्यक्षविधिद्वारा निर्मितं वर्तते । वस्तुनः ज्ञानम् इन्द्रियसम्पर्कात् भवति तस्य शब्देन साकं तादात्म्यं स्थाप्यते , अनेन प्रकारेण भाषायाः विकासो भवति । यदा पर्याप्तशब्दभण्डारः प्रत्यक्षज्ञानद्वारा भवति, तदनन्तरं नूतनशब्दानां ग्रहणं तथा

निर्माणमपि पूर्वज्ञानाधारेण भवितुमर्हति । सर्वप्रकाराणां लाक्षणिकार्थबोधकानां शब्दभावानां प्रतीकानि तथा अन्यामूर्तविचाराः परिचितशब्दानामाधारेण भवन्ति । परन्तु आरम्भे शब्दस्य सम्बन्धः अस्य प्रतिनिधित्वेन विद्यमानेन वस्तुना अथवा क्रियया स्थापनीयः भवति । अन्यथा छात्रस्य शाब्दिकज्ञानं तु भवति , परन्तु वास्तविकबोधः न जायते । भाषाभ्यासस्य आरम्भिकविधिः प्रत्यक्षविधिः भवति । विद्यालये प्रवेशप्राप्त्यनन्तरं छात्रः पुस्तकेभ्यः शब्दज्ञानं प्राप्नोति, परन्तु शैशवावस्थायां बाल्यावस्थायाञ्च बालकः प्रत्यक्षविधिद्वारैव शब्दम् अभ्यस्यति। आरम्भिककक्षासु गणिताभ्यसनस्य प्रणाली प्रत्यक्षप्रणाली एव भवति । अङ्कानां संकेतानाम् आकृतीनां ज्ञानं यावत् इन्द्रियसम्पर्कात् न प्राप्यते तावत् पर्यन्तं गणितीयबोधो न भवति । प्रत्यक्षज्ञानाभावे गणितस्य प्रश्नः यद्यपि यान्त्रिकरूपेण परिष्कृतो स्यात् । परन्तु गणितस्य उच्चतरप्रक्रियाणाम् अवगमनार्थम् आवश्यकं धरातलं न निर्मातुं शक्यते। प्रकृतिविज्ञानभौतिकविज्ञानरसायनविज्ञानजीवनविज्ञानादीनाम् अध्ययनं विना प्रत्यक्षम् असम्भवं भवति । प्रयोगशालायामपि सर्वेषां विधीनाम् आरम्भः प्रत्यक्षज्ञानात् एव भवति, अनन्तरम् अनुमानस्य समावेशः क्रियते ।

सामाजिकाध्ययनेऽपि आरम्भिकस्तरेषु यथासम्भवं प्रत्यक्षवस्तूनां घटनानां वातावरणस्य च अनुभवप्रदानकरणे प्रयत्नः कर्तव्यः । प्रत्यक्षस्य इतोऽपि एकः प्रयोगः श्रव्यदृश्योपकरणानाम् उपयोगः। इतिहासस्य घटनाः भौगोलिकपरिस्थितयः, सौरमण्डलं, संविधानं, प्रशासनं, संचारव्यवस्थादयःअनेके विषयाः शाब्दिकप्रणाल्या पाठ्यन्ते , परन्तु दृश्यश्रव्यसाधनानां सहायेन एतेषां प्रत्यक्षीकरणं कर्तुं शक्यते । कला, उद्योगः इत्यादिविषयेषु सर्वथा प्रत्यक्षज्ञानं भवति । एतदर्थम् आरम्भात् अन्तपर्यन्तं सर्वेषु स्तरेषु प्रत्यक्षविधेः उपयोगः अनिवार्यरूपेण करणीयः भवति । अनन्तरानुच्छेदेषु विविच्यमान-अनुमानशब्दयोरपि आधारः प्रत्यक्षज्ञानमेव । प्रत्यक्षाधारेणैव अनुमानस्य प्रयोगः भवति । एवम् अनुमानविधिद्वारा प्राप्तज्ञानस्य परीक्षणाय पुनः प्रत्यक्षविधेः प्रयोगं कुर्यात् ।

**अनुमानविधिः**

यस्मिन् ज्ञातविषयस्य (हेतोः)आधारेण कस्यापि अज्ञातविषयस्य साध्यस्य ज्ञानप्राप्तिरेव अनुमानमित्युच्यते । अनुमानशब्दस्य विग्रहः अनु + मानात् इति भवति।

अर्थात् ज्ञानस्य पश्चात् इत्यर्थः । अतः अनुमानं नाम प्रत्यक्षानन्तरं जायमानं भवति । उदाहरणार्थं 'तत्र पशवः चरन्ति' अतः तत्र ग्रासः अवश्यं भवेत् । अस्मिन् उदाहरणे ग्रासार्थं पशूनां भूमौ चलनं पूर्वानुभूतं भवति , परन्तु अस्मिन् समये केवलं पशवः दृष्टाः । अनेनाधारेण भूमौ ग्रासःअनुमीयते । एतादृशप्रकारस्य अनुमानस्य न्यूनातिन्यूनं त्रीणि पदानि आवश्यकानि । प्रथमपदं साध्यं भवति, यत् उपर्युक्तवाक्येषु ग्रासः भवितव्यः इति ।

द्वितीयं पदं साधनं भवति, यत् उपर्युक्तवाक्ये पशवः चरन्ति इति । अस्य हेतुः, लिङ्गम् इत्यपि च व्यवहारः । .तृतीयपदं व्याप्तिः गोभिः ग्रासस्य भूमौ चरणरूपक्रिया सर्वदा भवति । सांख्यदर्शने अनुमानद्विविधं भवति ।

यदनुमानं शाश्वतविधिवाक्यम् (Affirmative Proposition) आश्रयति , तस्य "वीत" संज्ञा क्रियते । तथा यदनुमानं निषेधवाक्यम् अवलम्बते तत् "अवीत" इति कथ्यते ।

वीतानुमानस्य पुनः द्वौ भागौ स्तः, पूर्ववत् सामान्यतोदृष्टभेदेन । "पूर्ववत" अनुमानं तत् भवति यत् द्वयोर्वस्तुनोर्मध्ये दृष्टस्य शाश्वतसम्बन्धस्य आधारेण भवति, यथा वयं धूमदर्शनं कृत्वा अग्नेः अनुमानं कुर्मः, यतो हि यत्र धूमः भवति तत्र अग्निः भवतीति उभयोः शाश्वतसम्बन्धः वर्तते । सामान्यतो दृष्टानुमानम् एतत् भवति यत्र साध्यसाधनयोः सनातनसम्बन्धः न दृष्टो वर्तते, परन्तु लिङ्गस्य सादृश्यं तेषु वस्तुषु भवति येषां साध्येन साकं नियतसम्बन्धो भवति । यथा- अस्माकम् इन्द्रियाणि वर्तन्ते । एनं विषयं कथं ज्ञातुं शक्नुमः । इन्द्रियाणि स्वयम् अगोचराणि भवन्ति । नेत्रम् अन्यवस्तुनः दर्शनं कर्तुं शक्नोति परन्तु स्वयं नेत्रदर्शनार्थम् अस्माकं समीपे किमपि इन्द्रियं नास्ति । अतः वयम् अनुमानद्वारा इन्द्रियस्य एतादृशम् अवबोधं कुर्मः । सर्वमपि कार्यं केनापि कारणेन सम्पादितं भवति, यथा लेखनार्थं लेखनी । दर्शनमपि एकं कार्यम् , अतः दर्शनस्यापि किमपि साधनं भवितव्यम् । अनेन प्रकारेणैव श्रवणार्थं किमपि साधनम् आवश्यकम् अथवा स्पर्शकरणार्थं किमपि उपकरणमावश्यकम् । अनेन प्रकारेण इन्द्रियाणां स्थितेः ज्ञानम् अनुमानद्वारा प्राप्नुमः । अवीतानुमानं निरसनसिद्धान्तस्य (Principle of Elimination) उपरि आधारितं भवति । यदा सर्वान् विकल्पान् त्यक्त्वा अन्ते एक एव अवशिष्यते तत् प्रमाणितसत्यं

भवति । एतादृशानुमानात् प्राप्तं ज्ञानम् बहुवारं मिथ्याज्ञानमपि भवितुमर्हति ।

प्रत्यक्षविधिना यत् ज्ञानं बालकेभ्यः दातुं न सम्भवति अथवा सरलतया दातुं न शक्यते तदर्थम् अत्यधिकतया उपयुज्यमानविधिः अनुमानविधिः, भाषाध्ययने सन्दर्भानुगुणम् अर्थनिष्कासनम्, परिचितशब्दानाम् आधारेण नवीनशब्दानां ज्ञानदानम्, वक्तुः भावावगमनं, लाक्षणिकार्थानां प्रतीतिः इत्यादिकार्याणि अनुमानविधिना सम्पन्नानि भवन्ति । गणितपाठनस्य अधिकतया प्रचलितविधिः यद् वर्तते सः संश्लेषणविश्लेषणविधिः अनुमानविधेः द्वितीयरूपं भवति । संश्लेषण विश्लेषण विधावपि अनुमानस्य त्रीणि पदानि भवन्ति । यथा -

किं दत्तमस्ति ? - (साधनम्)

किम् अन्वेषणीयमस्ति ? - (साध्यम्)

केन प्रकारेण अन्वेषणीयम् ? - (हेतुः अथवा लिङ्गम्)

हर्बर्ट महाशयस्य पञ्चपदी तथा वैज्ञानिकविधेः पञ्चसोपानान्यपि अनुमानविधि प्रतिविम्बयन्ति ।

वैज्ञानिकविषयाणाम् अध्ययने प्रत्यक्षानुमानविध्योः मिश्रितोपयोगः क्रियते । प्रत्यक्षप्रणाली कुत्रचित् प्रारम्भे कुत्रचित् मध्ये कुत्रचित् सत्यापनहेतोः अन्ते प्रयुक्तः भवति । निष्कर्षनिष्कासनस्य तर्कप्रक्रियायाम् अनुमानस्य प्रयोगः अवश्यम्भावी भवति ।

**शब्दप्रमाणम्**

यस्य विषयस्य ज्ञानं प्रत्यक्षेण अनुमानेन वा प्राप्तुं नैव शक्यते तत्र शब्दप्रमाणस्य सहायं स्वीकरणीयं भवति । शब्दः कस्यापि वस्तुनः वाचकः भवति । नाम शब्दः सः सङ्केतः भवति ,, यः कस्यापि वस्तुनः अथवा क्रियार्थं प्रयुक्तः भवति । वाक्यबोधार्थं शब्दवोधः आवश्यकः। कथनस्य आशयः अयमस्ति यत् सर्वप्रकारकमौखिकलिखितवाणी शब्दप्रमाणे अन्तर्गता भवति, या आप्तपुरुषेण प्रयुक्ता स्यात् । आप्तपुरुषः विश्वासपात्रव्यक्तिः भवति । तस्य स्वविषयकज्ञानं भवति, तथा पर्याप्तानुभवः भवति । अतः अस्य वाणी आदरणीया इत्युच्यते । तथा सः विश्वासयोग्यः मन्यते । शब्दप्रमाणं सांख्यमते द्विप्रकारकं भवति लौकिकशब्दः तथा वैदिकशब्दः

इति । स्वस्य विषये निष्णातस्य सांसारिकव्यक्तेः आप्तवचनं लौकिकशब्दः इति व्यवह्रियते । सांख्यम् एनं (लौकिकशब्दं) स्वतन्त्रप्रमाणस्य कोटौ न संस्थापयति, यतो हि अयं शब्दः प्रत्यक्षानुमानयोः आधारेण भवति । वैदिकशब्दः अस्माकं कृते तत्कालीन-अगोचरविषयाणां ज्ञानं कारयति,यान् प्रत्यक्ष-अनुमान-आप्तवचनैः ज्ञातुं न शक्नुमः । वैदिकशब्दः सत्यस्य साक्षादनुभूतानां ऋषीणां शब्दः भवति । वैदिकवाक्यं भ्रान्तिरहितं तथा स्वतः प्रमाणं भवति ।

प्रत्यक्षविधिः ह्युरिष्टिकुविधिः, समस्याविधिः, परियोजनाविधिः(Project Method) इत्यादीनां सर्वेषां विधीनां प्रयोगानन्तरं शिक्षाशास्त्री एवं निष्कर्षति यत् सर्वमपि ज्ञानं प्रत्यक्षानुभवद्वारा प्रदानमसम्भवं भवति । मानवजातिः युगेभ्यः साधनाद्वारा यत् ज्ञानं संग्राह्य प्रास्थापयत् तत् सम्पूर्णज्ञानं यदि कोऽपि प्रत्यक्षानुभवद्वारा प्रेप्स्यति चेत् सर्वथा असम्भवः भवति। द्वितीयन्तु मानवजातेः अस्मात् सञ्चितराशेः बालकं द्वारे स्थापितमपि बुद्धिमत्ता न भवति । अतः यदि सञ्चितज्ञानराशिना बालकः सज्जीकर्तव्यः इति चेत्, तस्य एकमात्रसरलतमविधिः भवति शब्दविधिः । व्याख्यानं, चर्चा, पुस्तकाध्ययनं, कक्षाध्यापनं, विचारविस्तारः, व्याख्यादिविधयः शब्दप्रमाणे अन्तर्गता भवन्ति । अस्माकं शिक्षाप्रणाल्याः अयं दोषः भवति यत् अत्र केवलं शाब्दिकविधेः प्रयोगः क्रियते । तथा प्रत्यक्षानुमानविध्योः उपेक्षा क्रियते । यथा पूर्वपृष्ठेषु लिखितमस्ति शब्दप्रमाणस्य आधारः प्रत्यक्षं भवति । शब्दप्रमाणेन प्राप्तस्य ज्ञानस्य यथासम्भवं प्रत्यक्षविधिद्वारा सत्यापनम् आवश्यकम्।

**मिथ्याज्ञानस्य कारणानि**

ज्ञानप्राप्तेः उपर्युक्तविधीनां प्रयोगकरणे जागरूकता अपेक्ष्यते । ज्ञानप्राप्तिप्रक्रियायाम् अनेका असावधानताः भवितुमर्हन्ति। तथा मिथ्याज्ञानमेव सत्यज्ञानमिति मन्यते । प्रमातः विपरीतम् , अयथार्थम् . अशुद्धं, भ्रमयुक्तं तथा दूषितज्ञानम् अप्रमा इति कथ्यते ।

**संशयः -**

संशये ज्ञातुः मनः द्वयोर्विरोधितत्त्वयोर्मध्ये अस्थिररूपेण डोलायमानं भवति । प्रथमं कारणं सामान्यधर्माणां कारणात् जायमानः संशयः यथा अयं सिंहः अथवा व्याघ्रो वा । द्वयोर्मध्ये बहुत्र समानताः वर्तन्ते अतः तेषां विषये स्वाभाविकरूपेण

संशयः भवति । द्वितीयं कारणं तु अद्भुतगुणस्य प्रत्यक्षादपि संशयः भवितुमर्हति । उदाहरणार्थं चिम्पाञ्जीमध्ये मनुष्यस्य अद्भुतगुणान् दृष्ट्वा अयं संशयः भवति यत् अयं चिम्पाञ्जी उत मनुष्यो वेति । तृतीयं कारणं तु विरुद्धसाक्ष्यं भवति । अस्य तात्पर्यम् एतदस्ति यत् यदा कस्यापि विषयस्य सामान्यलक्षणेभ्यः विपरीतसाक्ष्यं मिलति चेत् व्यक्तिः संशये पतति । यथा सिंहः वृक्षम् नारोहति परन्तु यदि कदापि आरुहन् दृष्टः चेत् अयं संशयः स्वाभाविकरूपेण भवति यत् अयं सिंहो वा अथवा अन्यः कोऽपि प्राणी वा । संशयस्य चतुर्थं कारणम् अव्यवस्थितं प्रत्यक्षं भवति । जलस्य प्राप्तिः सरोवरे भवति न तु मरीचिकासु । परन्तु द्रष्टुः कृते अव्यवस्थितप्रत्यक्षं भवति । अनेनापि संशयो भवति । पञ्चमम् अन्तिमं कारणम् अनुपलब्धेः अव्यवस्था । वस्तुनः अप्राप्ते सति अयं संशयः भवति यत् ,वस्तु परन्तु प्राप्तं न भवति अथवा तस्य पूर्णाभावो वर्तते सः अनुत्पन्नः अथवा उत्पत्तिं प्राप्य निरुद्धो वर्तते इति। संदेहो द्विविधः बाह्यान्तरिकभेदेन । बाह्यसंशयः पुनः भागद्वयेन विभक्तुं शक्यते प्रत्यक्षात्मकः अप्रत्यक्षात्मकः इति ।

आन्तरिकसन्देहस्य विषयः ज्ञातुः अन्तर्भागे भवति । परन्तु बाह्यसन्देहस्य विषयः ज्ञेयवस्तुनि निहितः भवति । उदाहरणार्थं कस्यामपि वैज्ञानिकप्रयोगशालायां प्रयोगं कृत्वा एकप्रकारकपरिणामः निष्काश्यते । प्रमाणीकर्तुं तं प्रयोगं पुन आवर्तयामः । द्वितीयवारं भिन्नप्रकारेण परिणामः आयाति । अनेन तस्य मनसि सन्देहस्य उत्पत्तिर्भवति यत् कः परिणामः समीचीनः इति । बाह्यसन्देहो नाम द्वयोर्वस्तुनोर्मध्ये प्रत्यक्षरूपेण सामान्यगुणदर्शनेन यः उत्पद्यते सः। वस्तुनोः व्यवच्छेदक (Differential) गुणान् न पश्यामः । परन्तु तान् केवलं स्मरामः । तथा च क्रमेण व्यवस्थीक्रियते । यथा कमपि श्वेतचूर्णं दृष्ट्वा अयं सन्देहः भवति इयं शर्करा (वा) अयं लवणः अथवा सोडा भवति ।

**भ्रान्तिः** –अप्रमायाः एकं कारणं भ्रान्तिः भवति । सन्देहे अनिश्चयः भवति परन्तु भ्रान्तौ एकं वस्तु अन्यत् वस्तु इति निश्चितरूपेण स्वीकुर्मः । उदाहरणार्थम् – 'अयं सर्पो वा उत रज्जुर्वा ' एतादृशी स्थितिः संशयस्थितिः भवति । परन्तु रज्जुं दृष्ट्वा सर्परूपेण चिन्तनं भ्रान्तिरित्युच्यते ।

भ्रान्तेः कारणानां विश्लेषणम् आधुनिकमनोविज्ञाने अत्यन्तविशद्रूपेण कृतं वर्तते । ॠभ्रान्तिप्रत्यक्षम्ॠ इति सिद्धान्तः मनोविज्ञानस्य अतिप्रसिद्धः सिद्धान्तः वर्तते ।

**तर्कः** –अनुमानविधिप्रयोगे तर्कस्य आवश्यकता वर्तते । सुतर्कः सत्यज्ञानप्राप्तौ सहायकः भवति चेत् कुतर्कः मिथ्याज्ञानम् उत्पादयति । तर्ककरणवेलायाम् अनेका अवधानताः मनसि निधेयाः भवन्ति। तर्केण ज्ञातपदार्थात् अज्ञातपदार्थस्य अन्वेषणं कुर्मः । ज्ञातः पदार्थः आश्रयः भवति तथा अज्ञातः निष्कर्षः भवति, यमभिलक्ष्य वयं तर्के प्रवृत्तामहे । तर्कात् जायमानानाम् अनेकभ्रान्तीनां वर्णनं न्यायशास्त्रे निरूपितम् ।

**ऊहः** – सांख्यतत्त्वकौमुद्याम् ऊहायाः अर्थः अनेन प्रकारेण दत्तोऽस्ति -

"ऊहः तर्कः आगमाविरोधन्यायेनाऽऽगमार्थं परीक्षणञ्च ।"

" संशयपूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थानम् ।"

अर्थात् तर्कः आगमाविरुद्धः, न्यायेन आगमस्य अर्थपरीक्षणम्, तथा संशयात्मकपूर्वपक्ष- निराकरणेन उत्तरपक्षव्यवस्थापनम् । ऊहोऽपि संशयस्य एकः भागः । अस्य उत्कटकोटेः एव संशयः इति वक्तुं शक्यते । ऊहेन प्राप्तं ज्ञानम् अनिश्चितं ज्ञानं भवति । उदाहरणार्थं यत् किमपि गूढार्थकम् अथवा द्वयर्थकम् वाक्यं श्रुत्वा श्रोता वक्तुः तात्पर्यस्य पूर्वानुमानं प्राप्नोति । अनेन अर्थः निश्चितो न भवति यतो हि वास्तवरूपेण वक्तुः अभिप्रायः अयं भवति अथवा अन्यो वा स्यात्। अतः एतत् ज्ञानम् अनिश्चितरूपेण मन्यते ।

## अनुशासनम्

सांख्यदर्शनानुसारं विवेकज्ञानमपि मुक्तेः साधनं भवति । योगदर्शनम् एनाम् उपपत्तिं स्वीकृत्य वदति, विवेकज्ञानप्राप्तये अनुशासनस्य आवश्यकता अस्ति इति । अनुशासनप्राप्तिरेव योगदर्शनस्य विषयः । सांख्ययोगदर्शने परस्परपूरके स्तः । सांख्यदर्शनं तात्त्विकविवेचनं करोति परं योगदर्शन लक्ष्यप्राप्तेः मार्ग प्रदर्शयति।

यावत्पर्यन्तं मनुष्यस्य चित्तं निर्मलं स्थिरञ्च न भवति तावत् सः ज्ञानं प्राप्तुं न शक्नोति। शुद्धहृदयेन शान्तमनसा च ज्ञानस्य साधना सम्भवति । योगः एतादृशं साधनं भवति यस्मात् शरीरमनसोः शुद्धता तथा स्थैर्यञ्च भवति ।

बालकस्य व्यक्तित्वस्य त्रयः पक्षाः वर्तन्ते , यथा - तस्य शरीरम्, वातावरणम्, चित्तवृत्तिः(मनः, अहंकारः, बुद्धिः) तथा आत्मिकचेतना । अर्थात्

अनुशासनस्थापनाय एतेषां त्रयाणां पक्षाणां ध्यानमावश्यकं भवति - १) बालकस्य शारीरिकस्वास्थ्यं, यत् भौतिकवातावरणेन प्रभावितं भवति । २) बालकस्य मानसिकस्वास्थ्यं, यस्यान्तर्गते मनः अहंकारः बुद्धिः च आयान्ति । ३) तस्य आत्मिकस्वास्थ्यं, यस्यान्तर्गतत्वेन तस्य शुद्धचैतन्यस्वरूपस्य विकासः आयाति । योगदर्शने एतेषां त्रयाणां पक्षाणाम् अनुशासनस्य योजना प्रस्तुतीकृता वर्तते । अस्यैव अष्टाङ्गयोगः इति नाम । तानि एवं भवन्ति ।

**यमः -**

मनोवचनकर्मभिः संयमेन स्थितिः यमः इति कथ्यते । अस्य पञ्च प्रमुखाङ्गानि वर्तन्ते- अहिंसा,सत्यम्, अस्तेयः, ब्रह्मचर्यम् अपरिग्रहः, यानि जैनदर्शने पञ्चमहाव्रतानि इति मन्यन्ते । मनः वचनं कर्म च परस्परं प्रभावयन्ति । शुद्धकर्म मनः अपि शुद्धं कारयति, विशुद्धं मनः शुद्धं कर्म प्रेरयति । वयं येन प्रकारेण वाण्या व्यवहरामः तथैव अस्माकं विचारस्य निर्माणं भवति, अयं विचारः अस्माकं कर्माणि अपि अवश्यं प्रभावयति अतः मनोवचनकर्मभिः स्वस्य दुर्वृत्तीनां दमनमेव अनुशासनस्य प्रथमाङ्गं भवति।

**नियमः -**

मनुष्यः सामाजिकप्राणी । प्रत्येकं सामाजिकसंस्थायाः केचन नियमाः भवन्ति, यान् "आचाराः" इति वदामः । सामाजिकसंस्थां सुचारुरूपेण निर्वहणाय सर्वैः जनैः आचारसंहितायाः पालनम् करणीयम् । न केवलं सामाजिकजीवनं सुचारुरूपेण निर्वहणम् अपि तु स्वयं स्वस्य जीवनं नियमितुं तेषां पालनमावश्यकम् । एतत् साधुप्रवृत्तीनां निर्माणमिति च कथ्यते । योगे पञ्चनियमाः उल्लिखिताः। शौचनियमस्य अन्तर्गतरूपेण शारीरिकस्वच्छता तथा मनसः निर्मलता च अन्तर्भावः भवति। सन्तोषः मानसिकविकासस्य प्रारम्भिक-अवस्था भवति । तपसा सहनशीलता आयाति, तथा शीतोष्णसहिष्णुभावस्य अभ्यासः भवति। स्वाध्यायस्य अन्तर्गत नियमितरूपेण अध्ययनस्य अभ्यासानां समावेशः अवर्तत । प्रणिधानस्य अन्तर्गतत्वेन ईश्वरं प्रति आस्था तथा तस्य ध्यानं सम्मिलितं भवति । योगानुसारम् ईश्वरस्य प्रणिधानं मनसः अथवा आत्मनः शुद्ध्यर्थमावश्यकम् ।

**आसनम् -**

शरीरम् अस्यां स्थितौ स्थापनीयं, येन, विनाश्रमं दीर्घकालपर्यन्तं परिश्रमं तथा अध्ययनं कर्तुं शक्यते । उत्थानम् उपवेशनम्, निद्रा, चलनं,पठनं, लेखनं भोजनकरणं च उचित-आसनानाम् अभ्यासान्तर्गतत्वेन भवति। चित्तस्य एकाग्रतायै शारीरिकसंयमस्य तथा नियमनस्य यावत् आवश्यकं भवति तावत् मनसः अपि । एतेषाम् आसनानामभ्यासेन शरीरं व्याधिमुक्तं भवति । स्वस्थः विद्यार्थी अध्ययनं कर्तुं शक्नोति । उचित-आसनैः शरीरं नीरोगं, सबलञ्च कर्तुं शक्यते तथा स्नायुमण्डलम् अनेन प्रकारेण वशीकर्तुं शक्यते, तेन मनसि विकारोद्भवः न भवति ।

**प्राणायामः -**

प्राणायामद्वारा श्वासक्रियायाः नियन्त्रणं कर्तुं शक्यते । अनेन विकाराः अपि नियन्त्रिताः भवन्ति । प्राणायामक्रियायां त्रीणि अङ्गानि वर्तन्ते - १) पूरकं नाम पूर्णरूपेण वायोः स्वीकरणम्। २) कुम्भकं नाम वायोः अनतः स्थगनस्थितिः । ३) रेचकं नाम नियमितविधिना वायोः त्यागः। प्राणायामद्वारा हृदयं स्वस्थं भवति तथा शरीरमनसोः दृढता आयाति ।

**प्रत्याहारः -**

इन्द्रियाणि स्वविषयेभ्यः निराकृत्य मनसः नियन्त्रणे स्थापनमेव प्रत्याहारः । यदा इन्द्रियाणि पूर्णतः मनोवशानि भवन्ति तदा तानि स्वाभाविकविषयेभ्यः परावृत्य अध्ययने दत्तचित्तानि भवन्ति ।

उपर्युक्तानि पञ्चसाधनानि बहिरङ्गसाधनानि भवन्ति तथा व्यावहारिकशिक्षार्थम् अनुशासनस्य आवश्यकानि अङ्गानि । अनन्तरं येषां साधनानां विवेचनं करिष्यते तानि उच्चतरसिद्धिसाधनार्थं भवन्ति । तेषाम् अन्तरङ्गसाधनानि इति व्यवहारः तेषां साधनम् अत्यन्तकठिनं भवति । दार्शनिकस्य , योगिनः , वैज्ञानिकस्य, साधकस्य च एतेषां साधनानामावश्यकता विद्यते ।

**धारणा -**

चित्तस्य अभीष्टविषये स्थिरीकरणमेव धारणा भवति । सः विषयः बाह्यो वा आन्तरिको वा स्यात् । कस्यापि विषयस्योपरि दृढतापूर्वकध्यानम् एकाग्रकरणस्य शक्तिः धारणा इति व्यवह्रियते ।

**ध्यानम् -**

धारणानन्तरसोपानं ध्यानं भवति । ध्यानं नाम ध्येयविषयस्य निरन्तरमननम्। धारणायां केवलं ध्यानं स्थिरीक्रियते । परन्तु ध्यानस्य स्थितौ इयं स्थिरता अधिककालं यावत् दृढस्थितिं प्राप्नोति । ध्यानेन अधीतविषयः सुस्पष्टः ज्ञायते । अविरामध्यानेन वस्तुनः निजरूपस्य प्रकटनं भवति ।

**समाधिः -**

योगानुशासनस्य इदम् अन्तिमं सोपानं भवति । अस्यामवस्थायां मनः ध्येयविषयेण साकं लीनं भवति, तन्मयं भवति। अस्यां स्थितौ ध्यातृध्येययोर्मध्ये तादात्म्यं भवति । ध्यानावस्थायां तु ध्याता ध्येयविषयः तथा ध्यानस्य प्रक्रिया पृथग्रूपेण भवति । परन्तु समाधेः अवस्थायां त्रिषु एकाकारता सम्भवति । इय दार्शनिकयोगवैज्ञानिकसाधकानां चरमपरिणतिः भवति ।

## आधुनिकशिक्षायां साङ्ख्यदर्शनम्

अस्माकम् आधुनिकशिक्षाप्रणाल्याः पुनर्जीवनप्रदाने सांख्यदर्शनस्य महत्त्वपूर्णयोगदानं वर्तते । भारतीयदर्शनानामुपरि अयमाक्षेपः वर्तते । यत् एतेषु आत्मज्ञानस्योपरि अत्यधिक आग्रहः वर्तते तेन शरीरस्य अवहेलनं जायते । वेदान्ते अन्यभारतीयदर्शनेषु च इयं सृष्टिः शरीरश्च मायायाः उत्पाद्यमानत्वेन मन्येते , फलतः शरीरस्य उपेक्षा क्रियते, तथा आध्यात्मिकविकासस्योपरि बलं दीयते । तत् परिणामरूपेण अन्यदर्शनानि व्यावहारिकशिक्षायै किमपि योगदानं कर्तुम् अशक्तानि भवन्ति । विद्यालयीयशिक्षायाः प्रश्नाः अनुत्तरिताः भवन्ति तथा दर्शनधर्मयोर्मध्ये कोऽपि भेदः नावशिष्यते । द्वितीयं तु आदर्शवादात् अन्यपाश्चात्त्यदर्शनानि शरीरम्, इन्द्रियं, मनः इत्यादीनाम् एतादृशमहत्त्वं दीयते यत् तेन आत्मनः उपेक्षा जायते । परन्तु सांख्यदर्शनं मध्यममार्गं प्रस्तौति । तत्र बालकशरीरस्य, प्राकृतिकपरिवेशस्य तथा तस्मिन् निहितात्मनः कृतेऽपि च उचितरूपेण न्यायः प्रदीयते । सांख्यदर्शने शरीरात्मानौ, सृष्टिपरमात्मानौ च परस्परपूरकौ मन्येते । आत्मानं विना शरीरं निर्जीवं, प्रकाशरहितं तथा जडं भवति। विना शरीरम् आत्मा पङ्गुर्भवति । शरीरस्य सहायं विना आत्मा स्वस्य अभिव्यक्तिं कर्तुं न शक्नोति।

सांख्यद्वारा प्रस्तुतं बालविकासस्य विवेचनं बहुमनोवैज्ञानिकं भवति तथा बालविकासस्य दृष्ट्या अध्यापकः एकः नूतनान्तर्दृष्टिप्रदाता भवति। अस्मिन् शरीरम्, इन्द्रियाणि, मनः , अहंकारः, बुद्धिः इत्यादीनां विभिन्नज्ञानात्मक-अङ्गानां विकासस्य अवस्थाप्रकारकविंवेचनं मिलति । अधिकांशभारतीयदर्शनानि एकात्मवाददर्शनानि भवन्ति, येषु व्यक्तिः समष्टेः अङ्गत्वेन मन्यते । अन्येषु शब्देषु वदामः चेत् जीवात्मा ब्रह्मणः अंशत्वेन मन्यते । व्यक्तेः उद्गमोऽपि ब्रह्मणः भवति तथा समाहारोऽपि ब्रह्मण्येव जायते । एतादृशप्रकारस्य विचारधारा सर्वाधिकारवादस्य (Totalitarianism) कृते जन्म ददाति । सांख्यविचारधारा आधुनिकलोकतान्त्रिकदर्शनेन साकं साम्यं भजते । सांख्यदर्शने प्रत्येकं व्यक्तेः स्वतन्त्रास्तित्वं स्वीकृतं वर्तते । प्रत्येकं व्यक्तेः आत्मा पृथक् भवति तथा तस्य व्यक्तित्वम् अद्वितीयं भवति । प्रत्येकं छात्रस्य स्वस्य क्षमता, योग्यता एवं सामर्थ्यमित्यादीनाम् अनुसारं विकासं प्राप्तुम् अधिकारः वर्तते । तस्य व्यक्तित्वं तस्यैव भवति, सः अनुपमो भवति, उत्कृष्टतमो भवति । तस्मिन् स्वतन्त्रसंकल्पशक्तिः भवति । स्वस्य सृष्टेः निर्माणे तथा नियमने सः स्वतन्त्रः भवति । व्यक्तित्वस्य एतादृशं गरिममयस्वरूपं लोकतन्त्रं जीवयितुम् एवम् अनुप्राणितुम् आवश्यकं भवति ।

सांख्यद्वारा प्रतिपादितावस्थाक्रमानुसारं पाठ्यक्रमः सर्वथा मनोवैज्ञानिक-आधाराणामुपरि निर्मितः । अस्मिन् आध्यात्मिकस्य व्यावहारिकस्य च ज्ञानशाखाना प्रतिनिधित्वं मिलति ।

ज्ञानप्राप्तये येषां विधीनाम् उल्लेखः सांख्यदर्शने मिलति, ते सर्वेऽपि येन केनापि रूपेण आधुनिक-अध्यापनविधिषु प्रतिविम्बिताः भवन्ति।

सांख्यमते प्रथमपक्षे प्रत्यक्षविधेः उपरि आग्रहः कृतः इति, द्वितीयपक्षे शब्दविधेः महत्त्वं न न्यूनीकृतमस्ति।

वर्तमानभारतीयसामाजिकरीत्या पश्यामश्चेत् शिक्षायाः यादृशं समन्वयकारि विवेचनं सांख्यदर्शने मिलति तथा अन्यत्र न लभ्यते ।

*****************

## न्यायदर्शने शैक्षिकतत्त्वम्

भारतीयदर्शनेषु तर्कशास्त्रस्य न्यायशास्त्रशब्देन (Indian Logic) व्यवहारः दृश्यते । न्यायशब्दस्य अर्थः उचितः अथवा वाञ्छनीयः इति । एवं तर्कशास्त्रस्य न्यायशास्त्रमिति व्यवहारात् अस्य शास्त्रस्य आशयः सुतर्को भवतीति ज्ञायते । न्यायशास्त्रे तत्त्वज्ञानप्राप्तये उपायाः वर्णिताः । न्यायशास्त्राध्ययनात् युक्तियुक्तविचारं कर्तुम् आलोचनात्मकदृष्ट्या विवेचने च शक्तिः एधते ।

न्यायदर्शनप्रवर्तकः महर्षिः गौतमः, अक्षपादनाम्नापि प्रसिद्धो वर्तते । अतः अस्य अक्षपाददर्शनमिति नामापि वर्तते । अन्यभारतीयदर्शनेष्विव न्यायदर्शनेऽपि दर्शनस्य विभिन्नपक्षाणां साङ्गोपाङ्गवर्णनं लभ्यते । परन्तु न्यायस्य प्रमुखयोगदानं ज्ञानमीमांसाक्षेत्रे वर्तते। न्यायदर्शनस्य मुख्याः विषयाः ज्ञानम्, ज्ञानप्राप्तेः साधनम्, ज्ञानप्रक्रिया इत्यादयः । अनया दृष्ट्या न्यायदर्शनस्य शैक्षिकयोगदानं शिक्षणप्रक्रियायां भवितुमर्हति ।

**ज्ञानप्रक्रिया**

न्यायदर्शनानुसारं ज्ञानप्राप्तिप्रक्रियायां चत्वारि तत्त्वानि वर्तन्ते । प्रमाता, प्रमेयम्, प्रमाणं तथा प्रमितिः। प्रमाता नाम ज्ञानं प्राप्तुं समर्थः जिज्ञासुः, अथवा शिक्षार्थी । प्रमेयो नाम ज्ञेयविषयः । अथवा यद्विषयकमध्ययन कार्यं, स विषयः प्रमेयः । प्रमाणं प्रमेयसाधनम् । यस्य माध्यमेन ज्ञानप्राप्तिः भवति तत् प्रमाणम् । प्रमितिः नाम यथार्थज्ञानं भवति । एतत् निश्चितं त्रुटिरहितं च । पदार्थानां स्पष्टताबोधकं ज्ञानं भवति । न केवलं पदार्थानां यथार्थज्ञानप्राप्तौ सहायकं प्रमाणशास्त्रम् । परन्तु ज्ञानप्रामाण्यपरीक्षणेऽपि सहायकं भवति । न्यायशास्त्रानुसारं अस्माकं मस्तिष्के जगतः ज्ञानं यस्मिन् रूपे प्रकटितं भवति, तत् प्रायशः विश्वसनीयं (Reliable) भवति । सर्वप्रकारकं ज्ञानं प्रायः यथार्थं प्रदर्शयति । अस्माकं शरीरस्य प्राकृतिकरचना एवं भवति वयम् इन्द्रियद्वारा पदार्थस्य बोधं प्राप्नुमः। तद्वत् स्मरणे स्थापयामः, अनेन वक्तुं शक्यते यत्,यस्य मनुष्यस्य इन्द्रियाणि स्वस्थानि संवेदनशीलानि भवन्ति, एवं यस्मिन् आलोचनायाः शक्तिः भवति, सः उपर्युक्तक्रियां सम्पादयितुं शक्नोति । यद्यपि

कार्ये सावधानः तथापि यथार्थदृष्ट्या एकः निष्कर्षः अन्यनिष्कर्षात् भिन्नो भवितुमर्हति । यदा अस्माकं मनसि पदार्थस्य यथार्थज्ञानं प्राप्तुम् आकाङ्क्षा भवति तदा अस्माकं तार्किकालोचनाय एकः विषयः मिलति । (अर्थक्रियावादिशब्देषु समस्यायाः उपरि चिन्तनस्यारम्भः भवति ) यथार्थान्वेषणकार्यं तु मानवकार्यकलापेषु प्रारम्भतः वर्तते न्यायशास्त्रं यथार्थोत्पत्तिं कर्तुं न शक्नोति । परन्तु न्यायशास्त्रं तादृशवैज्ञानिकविधिः भवति , तेन याथार्थ्यम् अधिकसङ्गतं , प्रभावोत्पादकरूपं च भवितुमर्हति । अर्थक्रियावादिवत् न्यायशास्त्रं एवं मन्यते, वस्तुस्थितिः मूल्यं पृथक् पृथक् नैव भवति । एवमेव यः विधिः तथ्यान्वेषणे प्रयुक्तः स एव विधिः मूल्यान्वेषणेऽपि प्रयोक्तव्यः भवति । न्यायशास्त्रानुसारं मूल्यं तथ्यैः साकं मिलित्वैव भवति, एवं मूल्यस्याध्ययनं तथ्यैस्साकमेव कुर्यात् ।

न्यायदर्शनानुसारं वयं शून्यमस्तिष्केण आरम्भं नैव कुर्मः । अस्माकं निजानुभवस्य संस्काराणां , एवं परंपराणां च आधारेण ज्ञानम् अस्माकं कोषे आसीत् । विज्ञानस्य आगमनात्मकप्रणालीद्वारा अस्माभिः अन्तर्हितज्ञानस्य अनावरणमात्रं क्रियते, न्यायशास्त्रं नवीनज्ञानप्रदानं न करोति । परन्तु यत् ज्ञानेन अस्माकं पदार्थसम्बन्धयथार्थज्ञानं भवति, तेषामुपायानां वर्गीकरणं करोति । एते क्रमेण -

१) प्रत्यक्षम्

२) अनुमानम्

३) उपमानम्

४) शब्दः नाम आप्तप्रमाणं । एतेषां विस्तृतं विवेचनम् अत्र क्रियते ।

### १) प्रत्यक्षम् -

यत् ज्ञानं साक्षात् भवति तत् प्रत्यक्षम्, अस्य ज्ञानस्य ग्रहणे साधनरूपेण अन्यज्ञानानां आवश्यकता नास्ति। प्रत्यक्षे भेदद्वयं वर्तते । एकम् इन्द्रियजन्यं, अपरम् अन्तर्ज्ञानम् । यथा इन्द्रियजन्यज्ञानस्य अन्यज्ञानावश्यकता साधनरूपेण नास्ति, तथैव अन्तर्ज्ञानमपि सहजरूपेण साक्षादुत्पन्नं भवति । अस्यापि साधनरूपेण अन्यज्ञानस्य आवश्यकता नास्ति । शिक्षादृष्ट्या उभयोरपि तत्तत्स्थाने महत्त्वमस्ति । परन्त प्रशिक्षणम् इन्द्रियजन्यज्ञानस्यैव भवति। सहजज्ञानार्थम् अन्यप्रकारसाधना आवश्यकी भवति । गौतमः इन्द्रियजन्यज्ञानस्य परिभाषां एवमवोचत्- इन्द्रियार्थसंयोगेन यत्

निश्चितज्ञानं प्रादुर्भवति, तत् प्रत्यक्षमिति । तत् भ्रमरहितं, निश्चितमपि भवति । इन्द्रियजन्यज्ञानस्य विश्लेषणेन अस्मिन् अवस्थाद्वयं स्पष्टं दृश्यते । प्रथमावस्थायां इन्द्रियार्थसंयोगेन यत् ज्ञानं भवति, तत् निश्चितं भवति । परन्तु तदवर्णनीयं भवति । आधुनिकमनोविज्ञाने (Sensation) संज्ञयोच्यते । न्यायशास्त्रे निर्विकल्पकप्रत्यक्षमिति व्यवह्रियते । पदार्थस्य जातिः विशिष्टगुणः इत्यादिज्ञानं निर्विकल्पकप्रत्यक्षेणैव भवति । द्वितीयावस्था भवति सविकल्पकं (Perception) प्रत्यक्षम् । सविकल्पकप्रत्यक्षज्ञाने ज्ञातपदार्थस्य जातिः, तस्य गुणः इत्यादि स्पष्टं भवति । सविकल्पकप्रत्यक्षज्ञानं निर्णयात्मकम् । तत् भाषामाध्यमेन प्रकटयितुं शक्यते । निर्विकल्पकप्रत्यक्षम् इन्द्रियद्वारा गृहीताधारसामग्री (Data) मात्रम् । परन्तु सविकल्पकप्रत्यक्षे अन्तःकरणस्य भूमिका निहिता भवति । इन्द्रियद्वारा गृहीततथ्यानां विश्लेषणं वर्गीकरणं तथा संश्लेषणं मनसः द्वारा भवति । अहंकारद्वारा आत्मीकरणं, तथा बुद्धिद्वारा अस्य संज्ञानं च भवति । धर्मकीर्तिमतानुसारं प्रत्यक्षज्ञानं चतुर्विधं भवति । इन्द्रियजन्यज्ञानं, मानसिकज्ञानं , आत्मचेतना, अन्तर्दृष्टिः च इति । इन्द्रियजन्यज्ञाने इन्द्रियद्वारा कार्यं भवति । आम्रफलं दृष्ट्वा आम्रफलमिति ज्ञानप्राप्तिः इन्द्रियजन्यं ज्ञानं भवति । परन्तु स्मृतिमात्रात् कल्पना चाक्षुषः आम्रस्य स्मरणद्वारा आम्रफलज्ञानप्राप्तिः मानसिकम् । कुत इत्युक्तौ स्थूलदृष्टिः अस्मिन् ज्ञाने माध्यमं नैव भवति । मानसिकज्ञानं पश्चात् बिम्बं भवति । यत् इन्द्रियज्ञानसमनन्तरमेव उत्पद्यते । सुखदुःखयोः आन्तरिकप्रत्यक्षं ज्ञानम् आत्मचेतना इत्युच्यते । आत्मनः अस्तित्वज्ञानं भिन्नस्थितिषु दुःखादिभिन्नज्ञानद्वारा स्पष्टं भवति । एतत् साक्षात् अन्तर्ज्ञानं भवति । इन्द्रियद्वारा ज्ञानप्राप्त्यर्थम् इन्द्रियेभ्यः प्रशिक्षणमपेक्ष्यते । दोषपूर्ण-इन्द्रियाणि त्रुटेः कारणानि भवन्ति । एवं विश्वसनीयज्ञानप्राप्तौ प्रतिबन्धकं भवति । यद्यावश्यकप्रशिक्षणं इन्द्रियेभ्यः न दीयते, तदा स्वस्थेन्द्रियाण्यपि स्वविषयाभिज्ञाने ग्रहणे च असफलानि भवन्ति । प्रत्यक्षज्ञानं सम्पूर्णशिक्षायाः मूलभूतं भवति । अन्यप्रमाणैः यत् ज्ञानं प्राप्यते, तस्य पूर्वज्ञानं प्रत्यक्षविधिद्वारा भवति । अत एव अस्याः आधारशिलायाः दार्ढ्यमावश्यकम् ।

बाल्यावस्थायां भौतिकसामाजिकवातावरणस्य अवलोकनार्थमधिकाधिकावसरः प्रदेयः। पदार्थानां वस्तूनां स्वीकरणे, आनयने, दर्शने इत्यादिपरिचये च

अवसरः प्राप्तव्यः। मांटेसरी- प्रणाल्याम् एतादृशप्रशिक्षणार्थं विशिष्टोपकरणानि भवन्ति । एतादृशोपकरणानां प्रयोगेन विभिन्नेन्द्रियाणा कृते पृथक् पृथग्रूपेण, मिश्रितरूपेण च प्रशिक्षणं लभ्यते । आकृतिः , आकारः , वर्णः ,ध्वनिः, तापः, मृदुत्वं घनत्वम् इत्यादिविभिन्नदिशासु प्रत्यक्षीकरणार्थम् अनुभवः प्राप्तव्यः। प्रत्यक्षीकरणात्मकः अयमनुभवः शैक्षिकोपकरणद्वारा प्रदातव्यः । एवं जीवनस्य वास्तविकपरिस्थितिमाध्यमेनापि अनुभवः आवश्यकः । इन्द्रियजन्यज्ञाने मनोवैज्ञानिकप्रेरणाप्रतिक्रिया (Stimulus- response) सिद्धान्तोऽपि सम्भूय वर्तते । तदा तदा उद्दीपनप्रतिक्रियायाः शैक्षिकप्रक्रिया कुशलतया सम्पादिता न भवति। यस्य कस्यापि इन्द्रियस्य यत्किमपि उद्दीपनं तात्पर्यं नास्ति चेत् प्रतिक्रिया न भवति । प्रत्यक्षद्वारा ज्ञानप्राप्तौ शिक्षार्थिनः अनुप्रेरणमावश्यकं भवति । अनुप्रेरणानन्तरं छात्रः पदार्थं गहनतया अवलोकयेत् । तदा एव शिक्षार्थी पदार्थस्य साङ्गोपाङ्गज्ञानं प्राप्नुयात् । इन्द्रियप्रत्यक्षद्वारा गृहीतज्ञानस्य वास्तविकपदार्थस्य च मध्ये समनुरूपता (Congruence) आवश्यकी । अतः इन्द्रियप्रत्यक्षद्वारा प्राप्तस्य ज्ञानस्य सत्यापनम् (Verification) वास्तविकपदार्थेन अथवा घटनया साकं कार्यम् । इयं प्रक्रिया आत्मशुद्धिः (Auto-Correction) इति नाम्ना व्यवह्रियते । प्रत्यक्षज्ञाने केवलम् इन्द्रियप्रशिक्षणस्य समावेशः न भवति, परन्तु अस्य बहुविधप्रकाराः भवन्ति। भाषाध्यापनस्य प्रत्यक्षप्रणाली अस्मिन्नन्तर्गता भवति। प्रारम्भे शब्दप्रत्यक्षं (Concept) प्रत्ययज्ञानद्वारा प्रतिपाद्य अनन्तरम् अनुमानम्, उपमानं, शब्दः इत्यादिद्वारा नूतनप्रत्ययः आविष्क्रियते। मूर्तप्रत्ययानां (Concrete - Concepts) विषये प्रत्यक्षविधिः सर्वोत्कृष्टः इति मन्यते । अमूर्तप्रत्ययानां निर्माणविषये अन्येषां विधीनाम् आश्रयणं कार्यम् । प्रारम्भिककक्ष्यासु पदार्थः तस्य प्रतिनिधिशब्दः क्रिया च, तथैव तत्प्रतिनिधिक्रियावाचिशब्दगुणपरिमाणानि च एवमेव प्रतिनिधित्वरूपिविशेषणवाचिशब्दाश्च यथायोग्यं संयोज्य सम्यक् पाठनीयाः भवन्ति। यद्यपि बालकः भाषामाध्यमेन यत्किञ्चित् शृणोति, पठति, वदति अथवा लिखति तस्य प्रत्यक्षीकरणमावश्यकं भवति । साहित्यरसास्वादने अपि प्रत्यक्षानुभूतेः आवश्यकता वर्तते । प्रत्यक्षेण पदपदार्थयोः, क्रियया साकं वा सम्बन्धस्थापनं स्वाभाविकरूपेण यदि न भवति, तदा दृश्यश्रव्यसाधनानामुपयोगः प्रत्ययसम्पादने

सहायको भवति । छात्राणां वास्तविकपरिस्थितिषु समाजशास्त्रविषयकाध्ययने अपि विषयसामग्र्याः अध्ययनावसरः कल्पनीयः। अत्र भौगोलिकपरिवेशस्यावलोकनं,निर्वाचनप्रणालेः अवलोकनं, स्थानीय-ऐतिहासिकस्थलानां परिभ्रमणम् इत्यादिप्रकारकप्रत्यक्षसाधनैः, यत् तथ्यात्मकज्ञानं भवति, तत् पुस्तकवाचनं, व्याख्यानादिमाध्यमद्वारा लब्धज्ञानस्य स्थिरीकरणं दृढीकरणं (Re-inforcement) च करोति । श्रव्यदृश्यसामग्री (नाम ग्लोब्, मानचित्रं, चित्रं प्रतिकृतयः(Models) फिल्म इत्यादयः) ज्ञानस्य साक्षात्कारे सहायिका भवति। श्रव्यदृश्यसामग्र्याः उद्देश्यं न केवलमध्ययनस्य रुचिकरतासम्पादनमेव, प्रत्यक्षविधिद्वारा ज्ञानप्रदानमपि ।

वैज्ञानिकविषयबोधने प्रयुज्यमानप्रयोगात्मकप्रणाल्यापि प्रत्यक्षप्रमाणे अन्तर्गता भवति। प्रायशः वैज्ञानिकाध्ययने प्रयुज्यमानाः सर्वाः प्रणाल्यः प्रत्यक्षे अनुमाने वा समाविष्टाः एव । एवमेव प्रयोगशालाप्रणाली, कक्ष्याप्रयोगः, विश्लेषणं, संश्लेषणं, वैज्ञानिकपर्यटनम् प्रकृतिनिरीक्षणादिसर्वक्रियाः, यत्र इन्द्रियाणां, एवं मनसः च उपयोगः भवति, एताः सर्वाः प्रत्यक्षप्रमाणे अन्तर्भवन्ति । इन्द्रियैः निरीक्षणं, मनसा संश्लेषण विश्लेषणं वर्गीकरणमित्यादि प्रक्रियाद्वारा निष्कर्षसम्पादनम् प्रत्यक्षविधावेव भवति । गणिताध्यापने मूर्तवस्तूनां, वास्तविकपरिस्थितीनामुपयोगोऽपि प्रत्यक्षप्रणाल्याः अङ्गं भवति । गणितसिद्धान्तानाम् एवं गणितीयदक्षतानां विकासाय वस्तूनां, मूर्ताकृतीनां गणितीयोपकरणामुपयोगः अपेक्षितः । एवं कक्ष्याध्यापने न केवलं प्राथमिकस्तरे अपि तु उच्चस्तरेऽपि प्रत्यक्षविधिः महत्त्वपूर्णं स्थानं वहति । यद्यपि छात्रः उच्चस्तरकक्षासु प्रत्यक्षविधिद्वारा प्राप्तज्ञानस्य पूर्तिः अन्यविधिद्वारा प्राप्नोति । तथापि अन्यविधिभ्यः प्राप्तज्ञानस्य प्रमाणीकरणे प्रत्यक्षप्रणाली मूलभूता भवति । अतः शिक्षायामपि अस्य प्राधान्यं स्वाभाविकं भवति। इन्द्रियप्रत्यक्षादतिरिक्तरूपेणापि प्रत्यक्षं संभवति । अत्र प्रत्यक्षस्य ग्रहणं ज्ञानेन्द्रियद्वारा न भवति । इमं धर्मकीर्तिः आत्मचेतना एवम् अन्तर्दृष्टिः इति व्यवहरति । एतदेव अन्यनैयायिकैः अलौकिकप्रत्यक्षमिति व्यवह्रियते । तेषां मते एतत् त्रिविधं वर्तते ।

१) सामान्यलक्षणं, २) ज्ञानलक्षणं, ३) योगजलक्षणम् ।

**१) सामान्यलक्षणम् -**

सामान्यलक्षणप्रत्यक्षे सामान्यधर्मद्वारा प्रत्यक्षज्ञानं भवति । उदाहरणार्थं - वयं वदामः 'मनुष्याः मरणशीलाः' । अस्यार्थः एवं भवति । यत् वर्तमान-भूत-भविष्यरूपसर्वकालेष्वपि सर्वे मनुष्याः मरणशीलाः इति । एतत् लक्षणं समग्रमानवजातेः भवति । वयं सर्वमनुष्यमरणं न दृष्टवन्तः । अतः एतत् इन्द्रियप्रत्यक्षजन्यं न भवति । परन्तु सम्पूर्णमनुष्यजातिविषयकं यथार्थज्ञानं प्रत्यक्षद्वारा प्राप्यते इति निर्विवादांशः । मनुष्यमात्रस्येदं ज्ञानं तेषां सामान्यधर्मः मनुष्यत्वद्वारा भवति । मनुष्यत्वं तु सर्वेषु मनुष्येषु विद्यमानसामान्यधर्मः । मनुष्यत्वरूप- सामान्यधर्मानुभवस्य फलं तु मनुष्यत्वेन रूपेण निखिलमनुष्याणां ज्ञानप्राप्तिः ।

**ज्ञानलक्षणम् -**

१) तापे अत्यन्तोष्णो दृश्यते ।

२) दूर्वाङ्कुराः कोमलाः दृश्यन्ते ।

३) पुष्पं सुगन्धितं दृश्यते ।

एतेषां वाक्यानां शाब्दिकार्थं स्वीकुर्मः चेत् तापे औष्ण्यं द्रष्टुं नैव शक्यते , एवं दूर्वाङ्कुरे कोमलता पुष्पे सौरभञ्च । उष्णत्वादीनां चाक्षुषप्रत्यक्षं न भवति । वस्तुस्थित्या अतीतसमये तापे औष्ण्यस्य दूर्वाङ्कुरेषु कोमलतायाः च त्वचानुभवः वर्तते । यदा अनुभूतं तदा तेन साकं एतेषां पदार्थानां दर्शनं चक्षुषापि भवति । एवं प्रकारेण मनसि वर्णस्पर्शयोः वर्णगन्धयोः सम्बन्धः स्थाप्यते । तेन कारणेन, दूरात् पुष्पस्य वर्णदर्शनसमये तस्य गन्धस्यापि प्रत्यक्षम् अनुभूयते । उक्तोदाहरणे गन्धस्य प्रत्यक्षम् अतीतगन्धस्मरणस्योपरि आधारितं भवति । अर्थात् नेत्रद्वारा गन्धप्रत्यक्षं वा उष्णप्रत्यक्षं वा अतीतज्ञानाधारेण भवति । अतः एतादृशप्रत्यक्षं ज्ञानलक्षणप्रत्यक्षमित्युच्यते ।

**योगजलक्षणम् -**

इदं प्रत्यक्षं देशकालमतिक्रामति । अनेन भूतभविष्यद्गूढसूक्ष्मनिकटस्थ-दूरस्थानां सर्वप्रकारवस्तूनां साक्षादनुभवो भवति । ये लोभ-मोह-माया-ईर्ष्या-क्रोधादि-विकारेभ्यः मुक्ताः भवन्ति, तेषामेवायमनुभवः भवति, यतो हि विकार एव देशकालादिसीमोत्पादकः भवति । निरन्तरयोगाभ्यासेन इमाम् अलौकिकयौगिकशक्तिं प्राप्तुं शक्नुमः ।

प्रथमद्विप्रकारकस्य अलौकिकप्रत्यक्षस्य विकासं छात्रेषु आनेतुं शक्यते। परन्तु योगजप्रत्यक्षं कठिनं भवति । अस्य क्षेत्रं विद्यालयीयशिक्षा नास्ति । बालकेभ्यः योगाभ्यासप्रदानं सामान्याध्यापकसामर्थ्यस्य विषयो न भवति । परं एवं प्रयत्नः कर्तुं शक्यते । येन छात्राः शनैः शनैः योगजप्रत्यक्षस्य दिशि विकासं प्राप्नुयुः ।

**अनुमानम् -**

यद्यपि ज्ञानप्राप्तेः आधारशिला प्रत्यक्षज्ञानं भवति । परन्तु सर्वप्रकारकं ज्ञानं प्रत्यक्षद्वारा सम्पादयितुं नैव शक्यते । वैज्ञानिकविधावपि प्रत्यक्षानुमानयोः मिश्रणं भवति । प्रत्यक्षज्ञानाधारेण नवीनज्ञानोत्पत्तिः तथा विकासः अन्यविधीनां द्वारापि भवति । प्रत्यक्षविधेः पूरकविधिः अनुमानविधिः । एवं कथनं युक्तं भवति अनुमानविधौ प्रत्यक्षविधेः विस्ताररूपं द्रष्टुं शक्यते । अनुमानशब्दस्यार्थज्ञानेन एतत् स्पष्टं भवति । अनुपश्चात् नाम पूर्वज्ञानानन्तरं जायमानं ज्ञानम् अनुमानं इति कथ्यते । उदाहरणार्थम्- 'आकाशः मेघावृतः। अतः वृष्टिर्भविष्यति' वृष्टेः सम्भावना पूर्णज्ञानाश्रिता भवति । यदा यदा आकाशः मेघावृतः तदा वृष्टिः इति दृष्ट्वा तेन मेघानां वृष्टेः च मध्ये कश्चन व्याप्तसम्बन्धः (Universal Realationship) दृष्टः । स एव अनुमानस्य आधारो भवति। एवं प्रकारेण अनुमानमिति अस्य विधेः नाम वर्तते , यत्रोभयोः पदार्थयोर्मध्ये व्याप्तिरूपसम्बन्धस्थापितः वर्तते, तत्र एकेन पदार्थकारणेन अन्यस्य वस्तुनः ज्ञानं भवति । अनुमाने न्यूनातिन्यूनं त्रयः अवयवाः भवन्ति । उदाहरणं- 'चन्द्रमा निर्जीवपदार्थः तत्र प्राणवायोरभावात्'। अस्मिन् वाक्ये त्रयः अवयवाः पदत्रयं वा वर्तते । चन्द्रमा -पक्षः । यतो हि तद्विषयकविचारः भवति। निर्जीविता- साध्यः । अयं विषयः साधनीयः वर्तते, यत् चन्द्रमायां जीवनमस्ति न वेति, अतः अयं साध्यः । प्राणवायोरभावात् हेतुः । उपर्युक्तसाध्यस्य निश्चयज्ञानार्थं साधनं उक्तलिङ्गं भवति ।

विचारप्रक्रियायां प्रथमतः हेतुरहितपक्षज्ञानमावश्यकम् । तत् चन्द्रमायां प्राणवायोरभावः। तदा हेतुसाध्ययोः व्याप्तिज्ञानम् । यथा- जीवनरूपप्राणवायुः आवश्यकः । यत्र यत्र जीवनं भवति, तत्र प्राणवायोः अस्तित्वं विद्यते । अन्ते अयं निश्चयः भवति साध्यस्य सम्बन्धः पक्षे वर्तते । उपर्युक्तविचारात् वयम् अनुमानाधारेण एवं निश्चिन्मः, चन्द्रमा निर्जीवपदार्थः इति । उपर्युक्तपदत्रयस्य क्रमबद्धसारिण्याम्

आगमननिगमनविधौ प्रयोगं कर्तुं पञ्चावयवा : भवन्ति । युक्लिड् महोदयस्य ज्यामितौ प्रमेयस्य अथवा उपपत्तेः सिद्धये कृतानां पञ्चपदानां प्रयोगः नैयायिकैः उल्लिखितः । न्यायशास्त्रानुसारं स्वप्रयासद्वारा स्वस्य प्रतिपत्तये उपर्युक्तत्रयाणां पदानां (पक्ष-साध्य-हेतूनां) प्रयोगः आवशयकः। परन्तु अन्येषां बोधनाय पञ्चावयवानां आवश्यकता वर्तते।

| **अवयवाः** | **अवयववाक्यानि** |
|---|---|
| १) प्रतिज्ञा | पर्वतो वह्निमान् |
| २) हेतुः | धूमात् |
| ३) उदाहरणम् | यो यो धूमवान् सोऽग्निमान् यथा महानसः । |
| ४) उपनयः | तथा चायं (पर्वतो धूमवान्) |
| ५) निगमनम् | तस्मात्तथा ( अतः पर्वतः वह्निमान्) |

स्वयम् अध्ययनार्थं केवलं एतावत् पर्याप्तं भवति , यत् पर्वते धूमः अस्ति । यत्र धूमः तत्रावश्यम् अग्निः भवति । अतः पर्वतः वह्निमान् इति । अन्यस्मै प्रतिपत्तये यत् पूर्वमुक्तं तत्सर्वस्य कथनम्। अनन्तरं तत् प्रतिपादनं कारणसहितं ब्रूयात् । उदाहरणद्वारा प्रतिपादितविषयस्य स्पष्टीकरणम्। अनन्तरम् उक्तकारणस्य पुनरावृत्तिं कृत्वा स्वमतस्य निगमनं कथयेत् । तर्के उक्तपद्धतिः निगमनविधेः उदाहरणं भवति । अधुना शिक्षाक्षेत्रे निगमनप्रणाल्याः स्थाने आगमनप्रणाल्याः प्रयोगः दृश्यते । केषुचित् विषयेषु निगमनपद्धतिरपि वर्तते । परन्तु आगमनप्रणाल्याः अनन्तरं निगमनपद्धतिद्वारा ज्ञानस्य दृढीकरणमावश्यकं भवति । आगमनपद्धतेः विवेचनमपि न्यायशास्त्रे वर्तते । आगमनविधौ बालकः सक्रियारूपेण ज्ञानसम्पादनं करोति । आगमनविधेः विकसितं रूपं जान् डीवी महाशयस्य वैज्ञानिकविधौ लभ्यते ।

न्यायशास्त्रे अनुमानम् त्रिप्रकारकं भवति । पूर्ववत् शेषवत् , सामान्यतो दृष्टं च । पूर्ववत् तथा शेषवदनुमानं, कार्यकारणसम्बन्धात् भवति । सामान्यतो दृष्टमनुमानं कार्यकारणद्वारा नैव भवति । त्रयाणां संक्षेपविवरणं अत्र क्रियते -

**पूर्ववत्** - वर्तमाने विद्यमानकारणात् भविष्यत्कालीन कार्यस्य अनुमानम् । यथा आकाशे मेघोन्नतिं दृष्ट्वा इह वृष्टिः भविता इति । एतत् पूर्ववदनुमानं भवति ।

**शेषवत्** - वर्तमानकार्यात् अतीतस्य कारणस्यानुमानम् । यथा - दह्यमानगृहाणि दृष्ट्वा अस्य कारणस्य अन्वेषणं क्रियते यत् येषु गृहेषु अग्निः आसीत् ।

उपर्युक्तयोरनुमानयोः मध्ये या व्याप्तिः प्रसक्ता वर्तते तस्यां साधनसाध्ययोर्मध्ये कारणकार्यसम्बन्धः वर्तते ।

**सामान्यतोदृष्टम् -**

अस्मिन्ननुमाने कार्यकारणसम्बन्धरूपव्याप्तिः न भवति । परन्तु उभययोः पदार्थयोः विद्यमाननियतसाहचर्येण एकं दृष्ट्वा अन्यस्योहः । यथा आकाशे चन्द्रं विभिन्नस्थानेषु दृष्ट्वा अस्य गतिम् अनुमानं कुर्मः । यद्यपि प्रत्यक्षेण वयं चन्द्रगतिं न पश्यामः । परन्तु अन्यपदार्थैः साकं सम्बन्धेन स्थानपरिवर्तनम् अनुमीयते । अतः एवमनुमानं कर्तुं शक्यते चन्द्रस्य स्थानपरिवर्तन कारणात् अस्य गतिः वर्तते ।

**शैक्षिकमहत्त्वम् -**

यस्य इन्द्रियद्वारा प्रत्यक्षीकरणं सम्भवति, तेषु विषयेष्वेव प्रत्यक्षप्रमाणं भवति । यत्र साक्षादिन्द्रियसम्बन्धः न भवति, तत्र अन्यविधीनां प्रयोगः आवश्यक एव । वैज्ञानिकविधौ प्रयुज्यमानः एकविधिः अनुमानविधिः वर्तते । भौतिकसामाजिकविज्ञानयोः अध्यापने अनुमानविधेः प्रयोगः प्राचुर्येण दृश्यते । छात्रेषु विचारशक्तेः उद्दीपनम् अनुमानविधिं विना न सम्भवति । अनुमानविधौ नैके प्रकाराः सन्ति। प्रत्यक्षविधिना साक म् अनुमानविधेः संयोग एव समस्याविधिः अथवा प्रयोगात्मकविधिः इत्युच्यते। प्रोजेक्टप्रणाली-क्रीडाप्रणालीत्यादिप्रकारकसव-प्रकारकक्रियाविधीनां मध्ये प्रत्यक्षानुमानयोः मिश्रणं भवति। अनुमानप्रयोगस्य प्रयत्नकरणेनैव चिन्तनक्रिया प्रभावकारिणी भवति । गणिते प्रयुज्यमानविश्लेषणसंश्लेषणप्रक्रिया अनुमानविधेः द्वितीयप्रकारः भवति । अस्यां प्रक्रियायाम् उभयोः ज्ञाततत्त्वयोः व्याप्याधारेण तृतीयाज्ञाततत्त्वस्य अनुमानं क्रियते।

समाजशास्त्राध्ययने वयं ज्ञातपरिस्थितीनाम् आधारेण सामाजिकगतिविधेः विश्लेषणं कुर्मः। अनेन प्रकारेण इतिहासाध्ययने ज्ञातघटनानां लक्षणानां, परिस्थितीनामाधारेण घटनाकारणानाम् अथवा तात्कालिकनागरिकतायाश्च अनुमानं क्रियते । अनुमानविधेः महत्त्वं सर्वविषयकाध्यापने वर्तते । अनुमितविचाराणामाधारेण किल वयं छात्रविचारशक्तेः उद्दीपनं कुर्मः। तथा अध्ययन-अध्यापनक्रियायाम् अनुमानस्य क्रियाशीलभागग्रहणं वर्तते ।

**अनुमानप्रयोगे अवधेयांशाः**

अनुमानविधिः तर्कपरको विधिः । अस्योचितरूपेण उपयोगः न क्रियते चेत् विधेः हानिः भवति । एतादृशभीतिः सामाजिकाध्ययनेषु विशेषरूपेण भवति, किमर्थमित्युक्तौ अस्मिन् प्रमाणे सर्वदा प्रत्यक्षद्वारा प्राप्तपरिणामस्य सत्यापनं कर्तुं नैव शक्यते । न्यायशास्त्रे कुतर्कद्वारा प्राप्तपरिणामानां हेत्वाभाससंज्ञा विधीयते । न्यायशास्त्रे पञ्चहेत्वाभासाः वर्तन्ते ।

**१) सव्यभिचारः** - अस्मिन् अनुमाने हेतोः प्रस्तुतीकरणम् एवं भवति, यत् अनेन एकस्मात् अधिकप्रकारपरिणामाः सम्भवन्ति। उदा- सर्ववस्तूनां शाश्वतस्थित्यै प्राणवायुः आवश्यकः भवति ।

अयं हेतुः सव्यभिचारः। अनेन निर्जीववस्तूनामपि प्राणवायोः आवश्यकता प्रमाणिता भवति, तेन सजीवनिर्जीवयोः भेदो न स्यात् । वास्तवरूपेण वाक्यमेवं भवितव्यम् । सर्वजीवितवस्तूनां स्थित्यै प्राणवायुरावश्यकः इति ।

**२) विरुद्धः** - अत्र एतादृशतर्को भवति, येन स्वीयप्रतिज्ञायाः अपि खण्डनं भवति । उदा- प्राणवायुः हानिकरः सर्वेषां प्राणिनां जीवनाधारत्वात् । यदि प्राणवायुः जीवनाधारः भवति , तदा हानिकरः कथं भवेत् ? उभयोः विरुद्धतर्कः वर्तते ।

**३) सत्प्रतिपक्षः** - प्रतिज्ञायाः तुल्यं प्रतिज्ञाभावसाधकं हेत्वन्तरं यत्र भवति, सः सत्प्रतिपक्षः। तेन परिणामरूपेण किमपि न सिध्ययति । उदा- शब्दः नित्यः श्रावणत्वात् इत्यत्र शब्दः अनित्यः कार्यत्वात् इति । उभयोरुदाहरणाभ्यां कोऽपि परिणामो न सिद्ध्यति।

**४) असिद्धः** - यत्र हेतोः सिद्ध्यर्थमपि अन्यप्रमाणस्य आवश्यकता भवति सः । उदा- कागजपुष्पं सुरभिः प्राकृतिकपुष्पतुल्यत्वात् । अस्मिन् उदाहरणे कागजपुष्पं प्राकृतिकपुष्पसदृशं भवतीत्यत्र किमपि प्रमाणं नास्ति ।

**५) बाधितः** - अस्मिन् अनुमाने हेतुः एकः पक्षस्थापनं करोति, परन्तु, तद्विपरीतसिद्धिः अन्यप्रमाणद्वारा भवति चेत् अयं हेतुः बाधितः । यथा - वह्निः अनुष्णः पदार्थत्वात् । उक्तोदाहरणे वह्नेः (औष्ण्यं ) अनुष्णाभावत्वं प्रत्यक्षप्रमाणेन सिद्ध्यति, यतो हि वह्नेः औष्ण्यात् ।

एवम् अनेकप्रकारकहेत्वाभासाः वर्तन्ते । अनेन अध्यापकैः ज्ञातव्यं यत्, पर्याप्तानाम् एवं प्रामाण्यानां प्रमाणानाम् अभावे निष्कर्षसम्भवः न भवति ।

**उपमानम् -**

यस्य कस्यापि ज्ञातपदार्थस्य सादृश्यात् अन्यपदार्थस्य ज्ञानं प्राप्तं भवति, तत्साधनम् उपमानं, तुलना वा भवति । उपमानविचारेऽपि द्वौ अवयवौ स्तः । १) ज्ञेयपदार्थस्य ज्ञानं २) सादृश्यस्य प्रत्यक्षं पूर्णं ज्ञानं च यदि सादृश्यज्ञानम् अपूर्णम्, अपर्याप्तं च भवति, तदा ज्ञेयपदार्थस्य ज्ञानमपि त्रुटिरहितं न भवति । केचन नैयायिकाः शब्दपदार्थयोः सम्बन्धम् उपमानमिति वदन्ति। अत्र पदार्थस्य ज्ञानं सादृश्यकारणात् समानताकारणात् वा उत्पन्नं भवति । उदा- कस्यापि पुरुषस्य दूरदर्शिन्याः (टेलिविजन्) ज्ञानं नास्ति, परन्तु दूरवाण्याः (Radio) चलच्चित्रस्य ज्ञानं भवति, तत्सादृश्येन दूरदर्शिन्याः परिचयं दातुं शक्यते । उक्तसादृश्याधारेण दूरदर्शिन्याः दर्शनानन्तरं सः दूरदर्शिनी इति ज्ञानं प्राप्नोति । एतत् ज्ञानम् उपमानमाध्यमेनोत्पन्नं भवति। केषुचित् भारतीयदर्शनेषु उपमानं स्वतन्त्रप्रमाणरूपेण नाभ्युपगतं वर्तते । तेषां मते उपमानद्वारा प्राप्तं ज्ञानम् अनुमाने वा शब्दे वा अन्तर्भवति।

**शब्दः -**

एतावत्पर्यन्तं उल्लिखितप्रमाणानि ज्ञानप्राप्तौ प्रत्यक्षमूलानि वर्तन्ते । परन्तु शब्दप्रमाणं तु ज्ञानप्राप्तेः परोक्षविधिः भवति । सर्वं ज्ञानं न इन्द्रियानुभवजन्यं, नानुमानतर्कजन्यं वा । ज्ञानप्राप्तौ एतादृशप्रकारः वर्तते यः इन्द्रियात् अनुमानात् वा न भवति । एतादृशज्ञानप्राप्तौ एकमात्रविधिः शब्दविधिः । अस्माकं जीवनमत्यन्तं लघु भवति । अतः सर्वप्रकारकं ज्ञानं प्रत्यक्षानुभवद्वारा प्राप्तुं नैव शक्यते इति प्राच्यपाश्चात्यशिक्षाशास्त्रिणां सम्मतोऽयं विषयः । अपि च कथं मानवजातेः विकासः भवति । तद्वत् ज्ञानराशिरपि एधते । कस्यचित् पुरुषस्य स्वजीवनकाले सञ्चितराशेः प्रत्यक्षविधिना ज्ञानप्राप्तिः कठिनैव न, किन्तु असम्भवा। धरातले प्राचीनज्ञानस्य विकास एव नवीनज्ञानं भवति । एवं विद्यालयस्य पवित्रदायित्वं 'सञ्चितज्ञानराशिं युवस्तराणां पर्यन्तं प्रापणम्' अस्य राशेः वृद्ध्यर्थं युवस्तराणां कृते आवश्यकदक्षतानां प्रसादनम् । सञ्चितज्ञानराशेः सङ्क्रमणं शब्दविधिद्वारा अधिकसरलरूपेण द्रुतगत्या भवति । यत् ज्ञानम् अस्माभिः श्रुत्वा, पुस्तकं पठित्वा च प्राप्यते तत् शब्दप्रमाणे

अन्तर्भवति । शब्दद्वारा, वाक्यद्वारा वा यत् वस्तुविषयकज्ञानं भवति, तत् शब्दप्रमाणमित्युच्यते। सर्वविधमौखिकं पुस्तकसङ्गृहीतं च ज्ञानं यथार्थज्ञानं न भवति। येषां प्रस्तुतज्ञानस्य अनुभूतिः भवति तथा यस्य वाणी विश्वासयोग्या वर्तते, तादृशपुरुषाणां शब्दः प्रामाणिको मन्यते। प्रत्येकं लेखकस्य अथवा शिक्षकस्य वाणी यथार्था अथवा विश्वसनीया न भवति। परन्तु स्वविषये निष्णाताध्यापकस्य , शोधकर्तुः, अनुसन्धातुः अथवा विदुषः वाणी तथा रचना विश्वसनीयेति मन्यते । भारतीयभाषासु एतादृशाप्तवाणी कुत्र भवति, तस्य आङ्गलभाषायां 'आथेटिक स्टेट्मेन्ट्' इत्युच्यते ।

शब्दप्रमाणे भेदद्वयं वर्तते। यथा दृष्टार्थादृष्टार्थभेदेन। दृष्टार्थशब्दो नाम तादृशः येन वस्तुनां ज्ञानं प्राप्यते, यस्य प्रत्यक्षीकरणं कर्तुं शक्यते । साधारणमनुष्यस्य तथा महात्मनां वचनं, न्यायालये साक्षीवचनं , कर्षकस्य कृषिसम्बन्धज्ञानं, विद्वद्भिः लिखितग्रन्थः , विदुषां भाषणं, विद्वद्गोष्ठीनां निष्कर्षः, दृष्टार्थप्रमाणे अन्तर्गतं भवति। यतो हि अस्य (प्रमाण्यं) सत्यापनं कर्तुं शक्यते। अदुष्टवस्तूनां ज्ञानप्रतिपादकः शब्दः अदृष्टार्थशब्दः इत्युच्यते । अस्य प्रत्यक्षीकरणं नास्ति । धर्मग्रन्थेषु विद्यमान आत्म-परमात्मसम्बान्धिनी व्याख्या, परमाणुविषयकवैज्ञानिकं वचनं , नैतिकतासम्बन्धधार्मिकप्रवचनादिः अदृष्टार्थे अन्तर्गताः भवन्ति । शब्दविधेः प्रयोगः अस्माकं अध्यापनप्रणाल्यां प्राचुर्येण दृश्यते। प्रश्नोत्तरचर्चा, व्याख्या, विचारविस्तृतिः इत्यादयः शब्दप्रमाणे अन्तर्गताः भवन्ति । पर्यवेक्षिताध्ययनप्रणाल्यापि (Supervised Study Method) शब्दप्रणाली एव । कक्ष्याध्यापने मौखिकशब्दस्य श्रवणद्वारा ज्ञानप्राप्तिः भवति । पर्यवेक्षिताध्ययने लिखितशव्दवाचनद्वारा ज्ञानप्राप्तिः भवति। शब्दप्रणालीद्वारा ज्ञानसङ्क्रमणवेलायां सावधानचिन्तनम् अत्यन्तमावश्यकम् । विद्यार्थिने भाषणेन अथवा व्याख्याद्वारा यत् तथ्यं प्रदीयते तत् यथार्थं भवितव्यम् । अध्यापकः पूर्वसन्नाहेन सत्यविषयवस्तूनामेव छात्रणां पुरतः प्रस्तुयात्। अन्यथा ज्ञानं यथार्थविरहं, अपूर्णं तथा मिथ्यात्मकं भवेत्। पर्यवेक्षिताध्ययने येषां पुस्तकानां, पत्रिकाणाम्, अध्ययनं क्रियते तेऽपि विश्वसनीयाः स्युः। तेषां लेखकः विश्वसनीयः तथा प्रामाणिकः स्यात्। लेखकस्य कथनं तस्याभिप्रायः च पक्षपातरहितः च स्यात् । टिप्पणी (Notes) -सारपुस्तकानि इत्यादीनि यथार्थज्ञानपदानि नैव भवन्ति। यतो तेषां रचयिता क्वचित् विश्वसनीयः, एवम् आप्तः न स्यात्। शब्दप्रमाणस्य

एकं शैक्षिकमभिप्रेतं वर्तते । शब्दप्रमाणद्वारा प्रत्ययस्य एवम् अर्थस्य विकासः भवति । मातृभाषायाः तथा अन्यभाषाणाम् अध्यापनसमस्याः अपि शब्दप्रमाणेन साकं संयुक्ताः वर्तन्ते । बोधने तथा अभिव्यक्तौ माध्यमसम्बन्धसमस्याः शब्दप्रमाणेन संयुक्ताः भवन्ति ।

शब्दः नाम अक्षरमेलनम् । शब्देन अभिधाद्वारा लक्षणाद्वारा वा पदार्थसङ्केतः भवति । प्रत्येकं शब्दः कश्चिदर्थं बोधयति। पदपदार्थयोर्मध्ये कश्चन सम्बन्धः भवति । वाक्यं नाम सार्थकपदानां समूहः । वाक्यस्थपदानाम् अर्थबोधनद्वारा अस्माकं वाक्यार्थज्ञानं भवति । वाक्यार्थसम्पादने चत्वारः हेतवः वर्तन्ते । ते क्रमेण -आकांक्षा, योग्यता,सन्निधिः तात्पर्यं च।

**आकाङ्क्षा -**

वाक्यनिहितपदेषु अर्थबोधने एकं पदम् अन्यस्यापेक्षां वाञ्छति । (तत् पदाभावे वाक्यस्य पदेषु मध्ये अन्वय एव न भवति) इयमेवाकांक्षा इत्युच्यते । वाक्ये किमपि पदम् अनावश्यकरूपेण न भवति । एकस्य पदस्याभावे अथवा व्यतिरेकप्रयोगे च सम्पूर्णवाक्यार्थबोधः न सिद्धयति । यावत् एकं पदम् अन्येन पदेन साकं न सम्बध्नाति, तावत् तत् सम्पूर्णवाक्यं न भवति ।

**योग्यता -**

वाक्यस्थपदद्वारा येषां वस्तूनां बोधः भवति, तेषु वस्तुषु परस्परान्वये कोऽपि विरोधः न स्यात्. अयं विरोधाभावः योग्यता इत्युच्यते । उदा- पर्वतसदृशगतिशीलो भव । अस्मिन् वाक्ये पदेषु योग्यताभावः वर्तते । किमर्थमित्युक्ते पर्वतः गतिशीलता च परस्परविरोधरूपेण भवतः ।

**सन्निधिः -**

वाक्यस्थपदेषु एकस्यान्येन साकं सामीप्यं (समीपस्थितः) सन्निधिः इत्युच्यते । एकपदानन्तरम् अन्यपदकथने लेखने वा अधिकः विरामः न भवितव्यः तेनाभीप्सतार्थज्ञानं न सिद्धयति । नाम प्रहरे प्रहरे उच्चारितानां पदानां मध्ये सन्निधिः नैव भवति । उदा- श्वः ......वयं........गृहे.......भविष्यामः। उपर्युक्तवाक्ये आकांक्षा, योग्यतापि वर्तते । परन्तु पदमध्ये आवश्यकापेक्षया अधिकः विरामः वर्तते तस्मात् वाक्यार्थे बोधो न भवति ।

**तात्पर्यम् -**

वाक्येन पदेन वा यादृशार्थबोधने वक्तुः इच्छा अथवा अभिप्रायः वर्तते, तत् तात्पर्यमित्युच्यते । एकमेव पदं विभिन्नेषु स्थलेषु भिन्नार्थद्योतकं भवति । तादृशविशेषस्थलेषु पदार्थं वक्तुः अभिप्रायः प्रकरणं च ज्ञातव्ये भवतः । उदा- यजमानी भृत्यम् उद्दिश्य - 'भवान् मुक्तो भवति ' इत्यत्र मुक्तः इत्यर्थः । भृत्यकार्यात् मुक्तः इत्यर्थः, न तु बन्धनात् अथवा स्वतन्त्रकरणं वा । शब्दप्रमाणस्य उपर्युक्तविश्लेषणेन अभिप्रेतार्थः एवं द्योतकः भवति , यत् छात्रेषु उचितरूपेण संपेषणकलायाः विकासस्य करणावश्यकता वर्तते । अध्यापकः सम्प्रेषणकलायां (Art of communication) पारंगतः स्यात् , अन्यथा सः तद्विषयं प्रभावोत्पादकरीत्या प्रस्तुतीकर्तुं न शक्नोति । यदि छात्रेषु सम्प्रेषणे दुर्बलता स्यात् छात्रः स्वाभिप्रायं प्रभावरूपेण न प्रस्तुतीकरोति कदाचित् भिन्नार्थं च जनयति । वक्तुः तात्पर्यावगमनार्थं समूहगत्यात्मकता (Groups Dynamics) सिद्धान्तः उपयोगी भवति । दोषपूर्णसम्प्रेषणक्रियाकारणात् अनेकप्रकारभ्रान्तीनामुत्पत्तिः भवति ।

**अप्रमाकारणानि -**

न्यायशास्त्रे अप्रमाज्ञानोत्पत्तौ कारणानां विवेचनं विस्तृतरूपेण कृतं वर्तते । अप्रमाज्ञानं, तस्य ज्ञानस्य भेदानां परिचयः अध्यापकस्य, एवमध्येतॄणाम् कृते च उपयोगि भवति । अनेन ज्ञानेन अप्रमाज्ञानस्य प्रमात्मकज्ञानरूपेण स्वीकरणरूपदोषः न भवति । अप्रमात्मकज्ञानस्य चत्वारि कारणानि वर्तन्ते । स्मृतिः, संशयः, भ्रमः, तर्कः च ।

**स्मृतिः -**

कालदृष्ट्या ज्ञानं द्विधा विभक्तं भवति । वर्तमानकालिकं ज्ञानम् अनुभवद्वारा प्राप्तं भवति, तथा भूतकालिकं स्मृतेः आधारेण भवति । पूर्वप्राप्तानुभवे स्मरणात्मकं ज्ञानं भवति । पूर्वानुभवः यथार्थश्चेत् स्मृतिरपि यथार्था भवति । अनुभवः अयथार्थश्चेत् स्मृतिः अयथार्था भवति । स्मृतिजन्यज्ञानस्वीकरणसमये इदमवधेयं पूर्वानुभवस्य पुनरावृत्तिः स्मृतिद्वारा भवितव्या ।

**संशयः -**

यस्य कस्यापि ज्ञानस्य निश्चयः न भवति चेत् तत् संशयात्मकं ज्ञानं भवति । सः संशयः प्रमाबाधितो भवति । संशयः अनेककारणैः उत्पद्यते ।।

१) पदार्थगुणसाम्यात् । (उदा-इयं गौः अथवा वृषभो वा)

२) अस्पष्टगुणदर्शनात् । (स्थाणुर्वा पुरुषो वा)

३)परस्परविरोधवाक्यप्रतिपादनात् । (हरिद्राघाटी युद्धस्थलसम्बन्धे द्वयोः इतिहासकारयोः मतभेदः)

४) प्रत्यक्षज्ञानस्यानियमितता। (धूमो वा तुषारो वा)

५) समीचीनदृष्टेरभावात्। (नीलवर्णस्य हरिद्वर्णवत् दर्शनम्)

६) विस्मृतिकारणात् । (उदा- दृश्यमानपक्षिणः नाम नीलकण्ठो वा रक्तपक्षो वा)

संशयः अनुसन्धानस्य प्रेरणां ददाति । यतो हि यत् विषयकं ज्ञानम् अस्माभिः न प्राप्तम् , तज्ज्ञातुम् अभिलाषः मानवेषु सहजरूपेण भवति । अनुमानात् प्राक् एतत् भवति । ज्ञाननिश्चयानन्तरं नश्यति ।

**भ्रान्तिः -**

(भ्रमा) संशये सति निश्चयात्मकं ज्ञानं (यथार्थं वा अयथार्थं वा) न भवति परन्तु भ्रमत्मकज्ञाने तु निश्चयरूपेण मिथ्यात्मकज्ञानस्यारोपः भवति । उदा- रज्जुदर्शनेन, परस्परगुणसाम्यात् अयं रज्जुः व सर्पो वा इति ज्ञानं संशयात्मकं ज्ञानं भवति । परन्तु रज्जुं दृष्ट्वा अयं सर्पः इति ज्ञानप्राप्तिः भ्रान्तिः भवति । भ्रमा अयथार्थज्ञानं भवति ।

**तर्कः -**

अस्य विवेचनं हेत्वाभासान्तर्गत्वेन कृतं वर्तते । यदा तर्कः कुतर्को भवति, तदा यथार्थज्ञानप्राप्तौ बाधकं भवति ।

**शैक्षिकमहत्त्वम्**

न्यायशास्त्रे यथार्थज्ञानप्राप्तौ विभिन्नस्रोतसां, भिन्नविधीनां च कथनं वर्तते । न्यायशास्त्रे प्रयुक्तविधयः स्वशिक्षार्थं प्रयोक्तुं शक्याः । एवम् अन्येभ्यः शिक्षादानाय अपि उपयुक्ताः भवन्ति। चिन्तनप्रक्रियायाः विश्लेषणं न्यायशास्त्रे उपलभ्यते । पाक्षिकरूपेण एतत् मनोवैज्ञानिकाधारेण भवति । आधुनिककाले शिक्षणपद्धतौ अस्माभिः उपयुज्यमानप्रत्यक्षप्रणाली, आगमननिगमनप्रणाली, प्रयोगात्मकप्रणाली, प्रोजेक्ट्विधिः, संश्लेषणविश्लेषणविधिः, चर्चाविधिः, स्वाध्यायविधिः इत्यादयः भिन्नविधयः न्याये विभिन्नप्रमाणेषु अन्तर्गताः भवन्ति । प्रत्यक्षपरोक्षप्रणाल्योः एतादृशसुन्दरः समन्वयः प्रायः अन्यत्र द्रष्टुं नैव शक्यते ।

*****************

६

# वेदान्ते शिक्षातत्त्वम्

भारतीयचिन्तनस्य चरमः उत्कर्षः वेदान्तदर्शने मिलति । वेदान्तशाखायाः आदिमः प्रवर्तकः शङ्कराचार्यः। तदनन्तरं यावल्लेखनमभवत् तावत् वेदान्तस्य शाखात्वेन उपशाखात्वेन वेदान्तस्यैव पुनर्व्याख्यात्वेन मन्तव्यम् । शङ्कराचार्यवेदान्तदर्शनमेव अद्वैतवेदान्तः इत्युच्यते। वेदान्तदर्शनस्य अन्यशाखायाः प्रवर्तकः रामानुजाचार्यः, या शाखा विशिष्टाद्वैतमिति उच्यते। एते शाखे वेदान्तस्य सीमान्तदृष्टिकोणं प्रस्तुतः । एते शिक्षायां प्रमुखं स्थानं वहेते । एतत् शाखाद्वयमतिरिच्य शुद्धाद्वैतं द्वैतादैतमिति अनेकाः शाखाः प्रादुर्बभूबुः । यासां प्रभावेण उपासनायाः नूतनविधीनां विकासः अभवत् । शिक्षायाः दृष्ट्या अन्यशाखानामपि प्रभावः अधिकः एवास्ति । अस्मिन् अध्याये अद्वैतविशिष्टाद्वैतयोः दृष्ट्या एव विचारः क्रियते ।

**शिक्षायाः उद्देश्यानि**

अन्यभारतीयदर्शनवत्, वेदान्तदर्शनानुसारमपि शिक्षायाः एकमेव लक्ष्यं भवति । यत् विद्यार्थिनाम् अज्ञाननाशपूर्वकं ज्ञानप्रदानम् । येन ते विद्याऽविद्ययोः भेदं ज्ञात्वा सत्यं किं मिथ्या केति जानीयुः, अपि च स्वान्तर्निहितानन्तज्ञानस्य शक्तेश्च परिचयं प्राप्नुयुः । अविद्यानिवृत्त्या मुक्तिः मिलति परन्तु शिक्षायाः कार्यं भवति, भाविजीवने अज्ञानात् शनैः शनैः मुक्तिं प्रापय्य सद्जीवनयापनार्थं यत् ज्ञानमावश्यकं तत् विवेकज्ञानं विकसने सक्षमकरणम् । सा अविद्या का ? यस्याः निवृत्तिः ज्ञानेन सम्भवति ? वेदान्तानुसारं अविद्यायाः कारणं, जगतः स्वयं पूर्णमिति चिन्तनं, जगदाधारत्वेन स्थितबाह्यसत्तायाः अज्ञानम् । वयं नामरूपात्मकमिदं शरीरं स्वयम्पूर्णं (Self - Sufficient) व्यक्तित्वमिति अभिमन्यामहे, परन्तु शरीरे निहिताम् आत्मशक्तिं, ब्रह्म इति या उच्यते, तां न जानीमः । ये सृष्टौ अनेकतां भिन्नतां विविधतां पश्यन्ति । ते परम् अस्याम् अनेकतायां निहिताम् एकतां न पश्यन्ति । एषैव अविद्या, एतदेव अज्ञानं, यत् शिक्षायाः प्रयत्नेन, ज्ञानप्रक्रियया शनैः शनैः मार्जयितुं शक्यते।

शङ्कराचार्यमतानुसारेण वयं सर्वे अनन्तशक्तेः (Infinite Power) स्रोतांसि स्मः , वयं दिव्यदृष्टिसम्पन्नाः (Divine Vision) स्मः । वयम् अनन्तज्ञानयुक्ताः स्मः । परन्तु अविद्यायाः कारणात् अनन्तज्ञानं, दिव्यदृष्टिं, अनन्तशक्तिं च अज्ञात्वा, स्वयमपूर्णः, अज्ञानी, सीमितदृष्टिमान् , निर्बलः इति मन्यते । शिक्षा अविद्यानिवृत्तिपूर्वकं सदज्ञानं प्रति प्रेरयति । दृष्टिसीमां निवारयति, शक्तिहीनतां नाशयित्वा अनन्तशक्तिं प्रददाति । शङ्कराचार्यमतानुसारं मानवस्य आत्मैव ब्रह्म, तयोः मध्ये द्वैतभावः नास्ति । अस्मिन् सृष्टौ विद्यमानाः आत्मानः वस्तुगत्या एक एव इति । दृश्यमानप्रपञ्चोऽपि भ्रान्तिरेव वस्तुतः सृष्टेः अन्तर्विद्यमानं ब्रह्म वयं न पश्यामः अपि तु अविद्याजनितभ्रमकारणात् , ब्रह्मणः विक्षिप्तरूपं सृष्टिमेव पश्यामः । अस्माकं दुःखानां कष्टानां च कारणं इदमेवाज्ञानं येन वास्तविकं ब्रह्म अदृष्ट्वा तस्य विकृत (Distorted) रूपं पश्यामः ।

रामानुजाचार्याः अमुमेव विषयं पृथग्रूपेण प्रस्तुवन्ति । तेषामभिप्रायेण प्रपञ्चः सत्यं जीवानामनेकता च, परं सर्वं ब्रह्मणः अंश एव एतान् स्वयं पूर्णम् अनेके इति ज्ञानमेव अविद्यायाः कारणम् , यथार्थस्तु सृष्टिः जीवश्च एकस्यैव ब्रह्मणः विशिष्टं रूपम् । रामानुजानाम् अभिप्रायेण ज्ञानप्राप्त्यनन्तरमपि वयं पूर्णाः न भवामः, परं वास्तविकसत्तायाः परिचयं प्राप्नुमः,अविद्याजनितक्लेशैः मुक्तिं च प्राप्नुमः । मुक्तिप्राप्त्युपायत्त्वेन वेदान्ते चत्वारि सोपानानि उक्तानि । अत्र स्मरणीयमिदं साधनचतुष्टयस्य १० अध्याये वर्णितविज्ञानमय कोषम् प्रारभते इति । शङ्कराचार्यमतानुसारेण ब्रह्मज्ञानस्याधिकारी सः , यः साधनचतुष्टयं प्राप्नोति ।

**नित्यानित्यवस्तुविवेकः** – मुमुक्षवे परमावश्यकता अस्ति नित्यानित्ययोः पदार्थयोः विवेकपूर्वकं भेदग्रहणसामर्थ्यम् । अत्र पदार्थान्तर्गतजगद्ब्रह्मणोः भेदः शरीरात्मनोः भेदः, शरीरपरमात्मनोः ऐक्यं, साध्यसाधनयोः भेदः इत्येते अन्तर्भवन्ति ।

**इहामुत्रफलभोगविरागः** – विवेकपूर्णज्ञानप्राप्त्यनन्तरं तृष्णात्यागः आवश्यकः । लौकिकालौकिकभोगाः बहवः सन्ति । येषाम् आसक्तिः वा इच्छा एव व्यक्तिम् असंयमितं करोति । लक्ष्यं प्रति गमनं क्लेशकरं भवति । अतः द्वितीयं साधनं भवति – लौकिकालौकिकभोगकामनायाः पूर्णनाशः ।

**"शमदमादिसाधनसम्पत्"** अस्मिन् षट्प्रकारकसंयमः आयाति। आकाङ्क्षायाः त्यागानन्तरं इन्द्रियं, मनः आदि शारीरिकाङ्गानामुपरि नियन्त्रणकरणसमस्या भवति, या मनुष्यं भोगप्रवृत्तं करोति। शमः नाम- मनसः संयमनम् । दमः - इन्द्रियाणां नियन्त्रणम् । तृतीयोपायः उपरतिः, नाम निहितकर्माणां विधिपूर्वकपरित्यागः । शरीरस्य शीतोष्णादिकष्टेषु सहनभाव एव तितिक्षा भवति , अयं चतुर्थः प्रकारः । पञ्चमः प्रकारः समाधानं , अर्थात् शब्दादिविषयेभ्यः निगृहीतमनसः श्रवण.-मनन-निदिध्यासनादीनां, तदुपकारकविषयाणां चिन्तने निरन्तरस्थितिः । गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा भवति । अयं षष्ठः प्रकारः ।

**मुमुक्षुत्वम् –** उपर्युक्तस्य साधनत्रयस्य प्राप्त्यनन्तरं साधकेन लक्ष्यप्राप्तये - दृढसंकल्पः करणीयः । विना संकल्पमध्यवसायः न भवति, अध्यवसायस्याभावे लक्ष्यप्राप्तिः न शक्यते । एतत् लक्ष्यं मुमुक्षुत्वम् अर्थात् मोक्षस्य इच्छा । उपर्युक्तसाधनचतुष्टयमेव शिक्षायाः ध्येयम् इति वक्तुं शक्यते ।

वेदान्ते विदेहमुक्तेः साकं जीवन्मुक्तेरपि कल्पना कृता वर्तते । अत्र मोक्षप्राप्त्यनन्तरमपि शरीरं (तिष्ठति) परन्तु मुक्तात्मा स्वयं स्वकीयं शरीरं न मनुते । ज्ञानप्राप्त्यनन्तरम् अयं संसारः न नष्टो जातः परं संसारस्य तृष्णाः तं न मोहयन्ति । शरीरस्य सर्वे व्यापाराः तथैव चलन्ति । सः भोजनमपि करोति, व्यापारमपि करोति, परिवारेऽपि वसति । समाजे स्वस्य दायित्वं निर्वहति, परन्तु सर्वकार्यव्यापारेषु विवेकस्याविर्भावो भवति । सः संसारे विद्यमानोऽपि निर्लिप्तो विद्यते । यद्यपि मुक्तात्मनः कस्मिन्नपि वस्तुनि आकाङ्क्षानास्ति, परन्तु निर्लिप्तभावेन सः कर्म अवश्यं करोति कर्मफलविषये अनासक्तः भवति । अस्य कर्मणा ईप्सितफलसिद्धौ हर्षः नास्ति, अकल्प्यपरिणामे विषादो नास्ति । कर्मफलोत्पन्नाः लाभः, हानिः, हर्षः, विषादः इत्यादयः तं न प्रभावयन्ति । शुद्धचित्तस्य , निष्कामस्य, मुक्तपुरुषस्य जीवनं समाजाय आदर्शो भवति । सत्कर्म तस्य व्यक्तित्वस्य सहजः स्वभावः । तस्य व्यवहारे, आचरणे वा असमीचीनता न भवितुमर्हति । तस्य व्यक्तित्वस्य एतद् रूपान्तरणमेव मुक्तिः ।

मुक्तात्मा सर्वेषु प्राणिषु आत्मनः स्वरूपं पश्यति । अतः तस्य भेदभावो न विद्यते । जगतः प्रलोभनानि तं न वञ्चयितुं प्रभवन्ति । यतः सः तेषां मिथ्याज्ञः ।

**व्यावहारिकजीवने वेदान्तः**

शैक्षिकोद्देश्यानाम् उपर्युक्तवर्णनम् अनेकवारं धार्मिकोद्देश्यैः साकं मेलनं प्राप्नोति । एतानि वास्तविकजीवने अव्यावहार्याणीति मत्वा एतेषां विषये अस्माभिः उपेक्षाभावः प्रदर्श्यते। शङ्कराचार्यैः विवेचितजगतः स्वरूपं सम्यग् नावगतं चेत् मनुष्यः निष्क्रियो भवति । 'ब्रह्म सत्यं जगन्मिथ्या' इत्यस्य शाब्दिकव्याख्यां स्वीकृत्य वयं भ्रान्तौ पतामः । यदि जगन्मिथ्या तर्हि जीवने अध्यवसायस्य आवश्यकता का ? शिक्षाद्वारा मनुष्यम् अविवेकिपशुजीवनात् उद्धृत्य चिन्तनप्रधानं मनुष्यं कुर्मः । अतः शिक्षाभावे मनुष्यः पशुतुल्यो भवति, तादृशमुपरि आनीय विवेकरूपेण जीवनयापनकलायाः बोधनमेव शिक्षायाः उद्देश्यम्। वेदान्तानुसारं शिक्षायाः उद्देश्यं जीवने उन्नतादर्शानुरूपेण पुनः निर्माणकलायाः अभ्यासः । जीवनं निष्क्रियमकृत्वा उन्नतं, पूर्णं च करणम् । यदि जीवनसंघर्षदृष्ट्या वेदान्तिकोद्देश्यानां विवेचनं क्रियते चेत्, वनस्पतिजीवनं प्राणिजीवनं, मनुष्यजीवनमिति जीवनसंघर्षसम्बन्धविभिन्नप्रकाराः द्रष्टव्याः। पशुजीवनाय भोजनप्राप्तिः, शक्तिसम्पादनं, शत्रुनाशः, आत्मरक्षा इत्यादीनि जीवनसंघर्षमूल्यानि भवन्ति । मनुष्यजीवनाय एकता, त्यागः, निःस्वार्थवृत्तिः इत्यादिमूल्यानि जीवनसंघर्षस्य प्रकारः। यावत् सर्वेषु प्राणिष एकः आत्मा वसति इति सूत्रं जीवनाराध्यं न भवति, तावत् एतेषां मूल्यानां प्राप्तिः न भवितुमर्हति।

**छात्रस्वरूपम् –**

अद्वैतवेदान्तानुसारम् अस्याः सृष्टेः मूलभूतम् एकमात्रसत्यं ब्रह्म । परम् अस्माकम् अज्ञानेन जनितभ्रान्तिकारणात् इदं भिन्नरूपेण दृश्यते । अस्याः भ्रान्तेः उत्पादकं तत्त्वं मनुष्यसंदर्भे अविद्या, तथा इयं शक्तिः ब्रह्मणः सन्दर्भे मायारूपिणी शक्तिः या एकम् अनेकरूपेषु प्रस्तौति। विद्यार्थी शरीरात्मनोः संयोगेन निर्मितः इति ज्ञातव्यः , परं यच्छरीरं वयं प्रत्यक्षेण पश्यामः, तत् भौतिकसृष्टेः एकः अंशः, यथा भौतिकसृष्टिः अविद्यायाः अथवा मायायाः उत्पत्तिः, तथा इदं शरीरमपि मायायाः सृष्टिः भवति । वस्तुतः आत्म-ब्रह्मणोर्मध्ये कोऽपि भेदः नास्ति, एतदेव तत्त्वमसि अर्थात् जीवात्मा परमात्मा अभिन्नः इति कथ्यते । अद्वैतवेदान्ते आत्मनि भिन्नत्वं नाभ्युपेयते । प्रकारान्तरेण कक्ष्यायां विद्यमानेषु सर्वेषु छात्रेषु एक एव आत्मा वसति । वयं तेषु यं भेदं पश्यामः , सः बाह्यः, कर्मजनितः, शरीरसम्बन्धी भवति ।

अध्यापकः याम् अनेकतां स्वछात्रेषु पश्यति, सा अपि अध्यापकस्य अपूर्णज्ञानकारणादेव। यस्मिन् अध्यापके, प्रत्येकं व्यक्तौ वा निहिताहम्भाव एव भिन्नतायाः जनकः। योऽध्यापकः अद्वैतविचारधारां स्वीकरोति, सः सर्वान् छात्रान् समानरूपेण पश्यति । सर्वेषु एकात्मनः दर्शनं करोति । विद्यालये छात्रेषु भिन्नजातयः, धर्माः, वर्णाः, आयूंषि भवन्ति । छात्राणां शरीराकृतिषु भेदाः दृश्यन्ते, परन्तु सर्वे एते भेदाः बाह्या एव । एतेषु सर्वेषु एकमेव ब्रह्म वसति।

अद्वैतवेदान्तानुसारं प्रत्येकं बालकः अनन्तशक्तेः अनन्तज्ञानस्य च भण्डारः वर्तते । कर्मजनितफलानुसारं तस्मिन् शारीरिक-ऐन्द्रिय -मानसिक-बौद्धिकभेदाः दृश्यन्ते। एते भेदाः बालकानां तटस्थलक्षणं , तेषु स्वरूपलक्षणं न विद्यते । यथा छात्राणां विषये शिक्षकस्य अवधानं वर्धते तथा भेदाः न्यूनाः भवन्ति । यदा शिक्षकः पूर्णतां प्राप्नोति तदा भेदाः तिरोहिताः भवन्ति। ऐक्यं शिष्यते । छात्रस्य एषा अद्वैतकल्पना सूक्ष्मा, गभीरा च वर्तते , अत एव विरलाः एव शिक्षकाः एव तां ज्ञातुं शक्नुवन्ति , तेषु शक्तेषु न्यूनाः एव व्यवहारपथे आगच्छन्ति । यावत्पर्यन्तम् आत्मानुभूतिः न भवति ,तावत्पर्यन्तं जगत् दृश्यते, वास्तवमिति मन्यते च । कक्ष्यायां पठन्तः ३०-४० छात्राः सर्वे परस्परं भिन्नाः एव दृश्यन्ते, अपि च तेषु निहितां समानतां स्वीकृत्यापि ते पृथगिति मत्वा एव पाठनीयाः, पृथगेव मूल्याङ्कनमपि कुर्यात् । एतादृशं व्यावहारिककाठिन्यं परिकल्प्यैव शङ्कराचार्यः आत्मपरमात्मनोः विषये स्तरद्वयस्य चिन्तनं कृतवान् । स्वरूपलक्षणे सर्वे भेदाः, अनेकत्त्वं च। परन्तु यावत्पर्यन्तं शिक्षकछात्रौ व्यावहारिकजीवने वसतः जीवनव्यापारं च कुरुतः तावत्पर्यन्तं सृष्टिमपि सत्यमिति, सृष्टेः अङ्गभूतं शरीरं, अनेकजीवानाम् अस्तित्वमपि सत्यमिति ज्ञातव्यं भवति । व्यावहारिकदृष्ट्या जीवभिन्नस्य सर्जनकर्तुः ईश्वरस्य कल्पना आवश्यकी, तमेव दृश्यप्रपञ्चस्य स्रष्टा इति मन्तव्यम्। अत एव प्रत्येकं बालकः भिन्नः इति मत्त्वा तस्य व्यक्तित्त्वस्य अधोलिखितपक्षाणां विषये अवधातव्यं भवति-

१) बालकस्य नाम रूपशरीरम् ।

२) सृष्टिः वा भौतिकवातावरणं, यत् बालकस्य शारिरिकं मानसिकं च विकासं प्रभावयति ।

३) आत्मा, यः ब्रह्मणः अंशः ।

श्रीरामानुजः पारमार्थिकदृष्टिं विहाय व्यावहारिकदृष्टिम् एव स्वीकरोति । तेषां मतानुसारेण बालकस्य शरीरम् आत्मा च सत्यमेव । जीवस्य स्वतन्त्रास्तित्वाभावात् , तस्य ईश्वरादेव उद्‌गमसम्भवात् आत्मपरमात्मनोः अभेदः सिद्ध्यति । रामानुजानाम् अनुसारेण ब्रह्म चिदचित्तत्त्वयोः सङ्गमः तदेव सत्तावत् अर्थात् तदतिरिक्तानां वस्तूनां सत्तैव नास्ति । परन्तु तस्मिन् चिदचिदौ वास्तविकरूपेण विद्येते । अतएव रामानुजानामद्वैतं विशिष्टाद्वैतमिति उच्यते । यतो हि ब्रह्म एकमपि चिदचिदोः अंशयोः विशिष्टयुक्तं वर्तत इति । श्रीरामानुजमतानुसारेण प्रत्येकं बालकस्य एकं यथार्थशरीरं, अपरः तदन्तर्निहितः आत्माऽपि यथार्थः । एते प्रत्येकं बालकस्य सत्ताम् अङ्गीकुर्वन्ति । प्रत्येकं बालकस्य स्वतन्त्रास्तित्वं वर्तते । तस्य स्वतन्त्रेच्छाशक्तिः अद्वितीयव्यक्तित्त्वं च वर्तते। एतेषाम् आधारत्वेन दैवीसत्ता विद्यते । शरीरम् आत्मा च ईश्वरनिर्मितत्वात् तस्यांशावेव। अत एव उभेऽपि पवित्रे दैवी च वर्तते । इदं शरीरमेव देवालयः, यत्र देवताविग्रहः विराजन्ते । शरीरमिदं अशुद्धं रोगिणं स्थापयामश्चेत्, तदावृतात्मनः प्रकाशः अवरुद्धो भवति । इन्द्रियजनितविकाराः: मानसिकविकाराः (ईर्ष्या, द्वेषः, लोभः, मोहः इत्यादयः) दुर्विचारश्च इदं नामरूपात्मकं व्यक्तित्वं मलिनं करोति, आत्मनः प्रकाशमपि अवरुणद्धि । प्रत्येकं बालकः ईश्वरस्यांशः, इति इदं नामरूपात्मकं शरीरस्य मलिनकरणम् ईश्वरस्य अपमान एव। रामानुजाः बालकम् अपूर्णं मन्वते । परन्तु निरन्तरं पूर्णतां प्रति गमनार्थं क्षमतायुक्तः इति च । शङ्कराचार्याणां इव रामानुजाचार्याः बालकस्य पूर्णतावस्थाप्राप्तिं नाङ्गीकुर्वन्ति । यदि तादृशी अवस्था प्राप्यते चेत् प्रगतिः स्थगिता भवति । परन्तु अपूर्णतायाः पूर्णत्वं प्रति गमनं निरन्तरप्रक्रिया अस्ति सर्वे अपूर्णाः मिलित्वा अपि पूर्णवत् न भवेयुः । केवलं ब्रह्मैव पूर्णम् , तस्यांशाः प्रजाः सर्वदा अपूर्णाः एव वर्तन्ते । पूर्णत्वं प्रति गमनस्य अवकाशः सदा वर्तते ।

श्रीशङ्कराचार्यस्य व्यावहारिकं दृष्टिकोणं श्रीरामानुजस्य विचारः च प्रायः एकवत् भाति। व्यक्तित्त्वसंरचनाः दृष्ट्या उभयोः विचारयोः ऐक्यं दृश्यते ।

सांख्यदर्शनवत् अद्वैतवेदान्तोऽपि इमां मनोवैज्ञानिकीं संरचनां ज्ञानेन्द्रियेषु, पञ्चकर्मेन्द्रियेषु मनसि बुद्धौ च मनुते । वैयक्तिकतायाः (Individuality) आधारः न आत्मा परन्तु नैतिकी व्यवस्था एव, या व्यवस्था विद्याकर्मप्रज्ञानसम्मेलनेव

भवति । पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि, मनः अत्यन्तसूक्ष्मं परिच्छिन्नं च पदार्थाः। येषां विकासः शारीरिकवृद्ध्या सह भवति । शरीरेन्द्रियाणां नियन्ता जीवः यः कर्मणः कर्ता तथा फलभोक्ता अस्ति। उपनिषदाम् आधारेण शङ्कराचार्याः अपि चैतन्यस्य अवस्थाचतुष्टयस्य विवेचनं चक्रुः, यत् मनोविश्लेषणवादिमनोविज्ञान-द्वारा कृतसंरचनापेक्षया गभीरः वर्तते ।

चेतनायाः प्रथमावस्था जाग्रदवस्था, यत्र इन्द्रियेभ्यः , मनसा च पदार्थस्य अनुभवं प्राप्नुमः। द्वितीया स्वप्नावस्था, यत्र इन्द्रियाणि निष्क्रियाणि भवन्ति, मन एव सक्रियं भवति। जाग्रदवस्थायाम् इन्द्रियेषु कृतसंस्कारः एव स्वप्नावस्थायां मनसः अनुभवं प्रति कारणं भवति । सुषुप्त्यवस्थायां वा निद्रावस्थायां मनसः कार्यमपि न वर्तते, परं चेतना क्रियाशीला भवति । सुषुप्तावस्थायां व्यक्तित्वस्य मूलस्वरूपं प्रकटीभवति । परं इयं न मुक्तावस्था । आत्मानुस्मरणं तदानीमपि वर्तत एव । अन्तिमा तु तुरीयावस्था भवति, स्थित्या समाधिरित्यपि उच्यते। अत्र व्यक्तिः शरीरमनोबुद्धिभ्यः ऊर्ध्वं ज्ञात्वा स्वेच्छया आत्मशान्तौ लीयते। फ्रायड् महोदयस्य 'सुपर् इगो' वत् वेदान्तेऽपि 'साक्षी' इत्यस्य कल्पना कृता । यः व्यक्तित्वस्य निर्माणे महत्त्वपूर्णभूमिकां निर्वहति । व्यक्तित्वविकासस्य एषः विचारः अध्यापकाय महत्त्वं वर्तते । यतो हि विद्यालयेषु वयं विज्ञानमय आत्मनः पर्यन्तम् एव व्यक्तित्त्वविकासनं कर्तुं शक्नुमः । अतः शरीरेन्द्रियादीनां कार्यज्ञानमावश्यकम् । वेदान्ताधारेण नामरूपात्मशरीरं, जीव - मनुष्याणां च व्यक्तित्वम् अविद्याजनितत्वात् उपेक्षणीयमिति यः कोऽपि निश्चिनोति चेत् सः निर्णयः दोषपूर्णः एव भवति। पूर्वोक्तरीत्या एषः व्यक्तित्वस्य स्वपदार्थः (Individual Self) तथा एतस्य सर्वाणि अङ्गानि अविच्छिन्नरूपेण ब्रह्मणा सह सम्बद्धानि एव । गीतायाम् उक्तरीत्या प्रत्येकं व्यक्तिः ब्रह्मणः साक्षात् रूपम् अर्थात् प्रत्येकं बालकः ईश्वरस्य अवतारः । श्रीरामानुजाः गीतायाः इमं विचारं स्वीकुर्वन्ति, स्वीकृत्य च वेदान्ते यः अध्यापकः विश्वसिति, तेन अपेक्ष्यते यत् सः छात्रान् ईश्वरस्य अवतारमिति मत्वा तेषां व्यक्तित्वस्य गौरवं कुर्यादिति। बालकस्य व्यक्तित्वं प्रति अपमानः 'स्वान्तर्निहितब्रह्मणः वा ईश्वरस्यैव अपमानः' इति ।

बुद्धिसहाय्येन प्रत्येकं बालकः स्वतन्त्ररूपेण निर्णेतुं समर्थः भवति । अध्यापकः तेषा स्वतन्त्रनिर्णायकशक्तिं अभिवर्धयति । तेन व्यक्तित्त्वनिर्माणं

सम्यग्भवति । वैदान्तिकाध्यापकः स्वसिद्धान्त छात्राणामुपरि न आरोपयति, परं तेषां पुरतः विकल्पं प्रस्तौति । प्रस्तुत्य च छात्रेभ्यः स्वबुद्धिमनुसृत्य निर्णेतुम् अवसरं ददाति । एष एव सिद्धान्तः अनुशासनसमस्यानां निराकरणेऽपि प्रयुज्यते । विशिष्टाद्वैतद्वारा प्रतिपादितछात्रसंकल्पना अधो लिखिताः अधिकतया व्यावहारिकी लोकतन्त्रीया च वर्तते । विशिष्टाद्वैतद्वारा चिन्तिताः छात्रसंकल्पनाः लोकतन्त्रेण अनुमोद्यन्ते ।

१) प्रत्येकं छात्रस्य स्वतन्त्रास्तित्वं वर्तते ।

२) प्रत्येकं छात्रस्य व्यक्तित्वं महत्त्वपूर्णं, संश्लिष्टं च वर्तते ।

३) व्यक्तिः समष्टेः(Collectivity) उपरि वर्तते, यतो हि समष्टिः व्यक्तेरेव प्रातिभासिकं (Appearance) रूपम् ।

४) प्रत्येकं छात्रस्य स्वतन्त्रेच्छाशक्तिः वर्तते । यस्याः रक्षणम् आवश्यकम् ।

५) छात्राः सर्वे समानाः, तत्र जातिवर्णादीनां कृते अवसरः नास्ति । शरीरेन्द्रियमनोबुद्धीनां भेदः कर्मजनितः इति नाशयितुं न शक्यते । परं जातिः, धर्मः, देशः, भाषा इत्यादीनां भेदः मानवनिर्मितः इति मानवसहायेन नाशयितुं शक्यते ।

६) प्रत्येकं व्यक्तिः अग्रेसर्तुं शक्नोति । विकासस्य अनन्तावकाशः प्रत्येकस्मिन् वर्तत एव ।

**शिक्षकः-**

अद्वैतवेदान्तानुसारं शिक्षकः सत्तायाः अनुभूतिवान् , जीवन्मुक्तश्च भवेत् । यः बद्धः, अविद्याग्रस्तः सः अपरमविद्यायाः बन्धनात् कथं मोचयति ।

रामानुजमतानुसारेण संसारेऽस्मिन् पूर्णः यः कोऽपि नास्ति । मुक्तावस्थायामपि अपूर्णता वर्तते एव । अतः अध्यापकः पूर्णज्ञानी भवेदिति वक्तुं न शक्यते । परं स अपूर्णः सन् शिक्षार्थिनामपेक्षया पूर्णः भवति । ज्ञानस्याचारस्य च दृष्ट्या सः तथा पूर्णः भवेत् विद्यार्थिनः तं ज्ञानस्य साक्षात् रूपेण स्वीकुर्युः । शिक्षणग्रहणसमये अध्यापकस्य व्यक्तित्त्वं छात्राः स्वीकुर्युः इति नियमः भवति ।। अतः अध्यापकस्य व्यक्तित्त्वं तथा भवेत् यथा छात्राः श्रद्धालवः भवेयुः । तस्य शिक्षकस्य ज्ञानं पूर्ण भवेत् विचारः स्पष्टः भवेत् येन छात्राणां संशयानां निवारणं कर्तुं शक्नोति ।

विद्यार्थिनः अध्यापकं प्रत्यक्षरूपेण परोक्षरूपेण च अनुसरन्ति । अतः अध्यापकस्य भाषा, व्यवहारः इत्यादयः छात्रेभ्यः अनुकरणीयाः भवेयुः । वेदान्तमतानुसारं शिक्षाप्राप्त्यर्थं गुरुरेकः अनिवार्यः । अत्यन्तकुशलमतिः व्यक्तिः अपि गुरुणा विना सम्यक् शिक्षां ग्रहीतुं न शक्नोति । उपनिषत्सु उपवर्णितस्य आदेशस्य व्याख्यानं कुर्वता शङ्कराचार्येण उक्तं अध्यापकः प्रत्येकं विद्यार्थी एतादृशाध्यापकात् शिक्षा प्राप्तव्या । अध्यापकः स्वस्थः संयमीछात्रं प्रति प्रेमवान् स्यात् । उत्तरग्रन्थे विचारितरीत्या शिक्षणप्रक्रियायां श्रवणस्य प्रमुखं स्थानम् आवहति। श्रवणं नाम न केवलं पुस्तकगतविषयस्य श्रवणमेव परन्तु अध्यापकस्य समीपे स्थित्वा तेन सह विचारविमर्शद्वारा ज्ञानप्राप्तिरपि अन्तर्भवति ।

श्रीरामानुजाः शिक्षकस्य योग्यताः धर्मस्य ज्ञानं , तस्यानुपालनम् इति मन्वते । शिक्षकदैनिकचर्यामपि महत्त्वपूर्णामिति मन्वते । सा दैनिकचर्या, निरन्तराध्ययनम् अध्यापनस्य पूर्वयोजनादीनां समावेश इति । बालकानां व्यक्तित्त्वस्य सम्मानम् अपि अध्यापकः कुर्यात् । तान् आत्मवत् ज्ञात्वा क्रमशः भिन्नतायाम् ऐक्यं द्रष्टुम् अभ्यासः कर्तव्यः ।

यथा अध्यापकस्य अनुभवः एधते तथा सोऽपि पूर्णताम् आप्नोति । पूर्वं तस्मै प्रत्येकं विद्यार्थी भिन्नः इति दृश्यते । शनैः शनैः सः छात्रेषु समूहगतं ऐक्यं पश्यति । तथा भेदः लुप्यते, सर्वे छात्राः समानाः इति दृष्टुं शक्नोति । प्रथमं सः अध्यापकः बालकान् शरीरद्वारा जानाति । परं यथा सः पूर्णतां प्रति सरति तथा तान् आत्मानं पश्यति । तादात्म्यावस्थाम् अनुभवति च ।

**पाठ्यक्रमः –**

श्रीशङ्कराचार्याः सत्तां त्रिधा विभज्य प्रदर्शयन्ति -

१) क्षणिकविषयाः, जाग्रदवस्थायाम् अनुभवबाध्याः, कल्पनाः, भ्रमः स्वप्नविषयाः अत्र अन्तर्भवन्ति ।

२) सः विषयः यः व्यावहारिकजगति दृश्यते, परिवर्तयति च । नित्यव्यवहारेषु आगम्यमानाः विषयाः अनुभवाः । तार्किकदृष्ट्या ते विषयाः विरोधात्मकाः, वा बाधिताः, अतः सत्यमिति न वक्तुं शक्यते ।

३) शुद्धसत्ता या सर्वत्र प्रतीयते । अबाधिता, बाधितकल्पना शून्या च भवति ।

अत्र ब्रह्मज्ञानमन्तर्भवति । प्रथमप्रकारः प्रातिभासिकसत्ता, द्वितीयः व्यावहारिकः, तृतीयः पारमार्थिकः इत्युच्यते । ।

शङ्कराचार्यणामनुसारेण शिक्षणपठ्यक्रमे उपर्युक्तानां तिसणाम् अपि सत्तानां समावेशः भवति। सः पाठ्यक्रमः समग्रं सत् न द्योतयति समग्रमूसत् च न द्योतयति, परं सदसद्विलक्षणत्वेन वर्तते।

यद्यपि अद्वैतवेदान्तः केवलब्रह्मज्ञानमेव सत्यमिति बोधयति । तथापि जगतः ज्ञानं मिथ्या इति मत्वा उपेक्षा न क्रियते । श्री शङ्कराचार्याः प्रापञ्चिकं ज्ञानं व्यवहारिकदृष्ट्या सत्यमेव परं पारमार्थिकदृष्ट्या मिथ्या इति मन्वते ।

तेषां मतानुसारेण सांसारिकज्ञानमिदं , यत्र सर्वेषां विषयाणां कारणं जगदिति उच्यते सत्यमेव । यथा कारणरूपब्रह्मसत्ता त्रिकालेषु सत्यं भवति, तथा सत्तारूपेण जगत् अपि सत्यमेव कार्यकारणयोः अभिन्नत्वात् । (ब्र. सू.-२/१/१६)

अद्वैतवेदान्तदृष्ट्या पाठ्यक्रमस्य विभागद्वयं युक्तियुक्तं भवति । -

१) आत्मनः ब्रह्मणश्च ज्ञानेन सम्मिलितः पारमार्थिकविषयः ।

२) संसारज्ञानार्थम्, अत्र सम्यग्रूपेण समावेशनार्थं ये विषयाः आवश्यकाः तैः संयुक्तः व्यावहारिकविषयः ।

अद्वैतविशिष्टाद्वैतयोः दृष्टिकोणं पश्यामश्चेत् पाठ्यक्रमे व्यावहारिकस्य , आध्यात्मिकस्य च विषयस्य उचितं स्थानं स्यात् । अद्वैतस्यानुसारेण अनादिपारमार्थिकज्ञानस्य मूल्यं सततपरिवर्तनशीलव्यावहारिकज्ञानस्यापेक्षया गुरुः वर्तते । साहित्यं , दर्शनं , कला, धर्मश्च आत्मज्ञानस्य प्रतिनिधयः , अतः पाठ्यक्रमे एतेभ्यः उच्चस्थानं स्यात् । तदनन्तरं तर्कसम्मतविषयाः, तर्कः, गणितं , भौतिकविज्ञानं सामाजिकज्ञानं च स्थानं प्राप्नुवन्ति । अत्र सदसतोः मिश्रणस्य सत्त्वात् । नित्यपरिवर्तनशीलभौतिकवस्तूनां स्थूलं ज्ञानम् अवरः इत्युच्यते, सामान्यीकृतत्वाभावात् तर्कसम्मताभावात् सापेक्षिक- स्थायित्वाभावाच्च ।

विशिष्टाद्वैतमार्गे यथाकथमपि यं कमपि ज्ञानमाश्रयामश्चेत् कारणब्रह्मणः ज्ञानं प्राप्नुमः। पूर्वोक्तरीत्या विशिष्टाद्वैतानुसारं ब्रह्मणः अङ्गद्वयं वर्तते चिदचिदिति, द्वयमपि सत्यमेव । अचित् तत्त्वेन निर्मितस्य सृष्टिज्ञानेन प्रारम्भं कुर्मः चेत् अपि अन्ते ब्रह्म प्राप्नुमः । ब्रह्मणः प्रारम्भं कुर्मश्चेत् ब्रह्मणः इमां यथार्थसृष्टिं

तस्याः ज्ञानं च प्राप्नुमः । अतः ज्ञायते पारमार्थिक -व्यावहारिकमिति पक्षद्वयमपि मूल्यवदिति । सांसारिकं वा व्यावहारिकं ज्ञानं अत्योन्नत्यर्थम् एव प्रयोक्तव्यं न सृष्टेः शोषणार्थम् । इदं विचित्रजगत् अस्य निधयः, प्राणिजगत्, समाजः मानवीयोपलब्धयश्च ब्रह्मणः अभिव्यक्तिरेवेति , छात्रेभ्यः सांसारिकज्ञानद्वारा ज्ञापनीयम् । पवित्रमिदं जगत् , आत्मनः अधिष्ठानम् ब्रह्मसाक्षात्कारसाधनम् । उपासनायाः माध्यमं इदं न शोषणस्य । यदि अध्यापनं सम्यक् भवति तर्हि छात्राः सृष्टेः कारणं (ब्रह्म) अन्वेष्टुं प्रभवन्ति । द्विप्रकारकमपि ज्ञानं लक्ष्यप्राप्तये साहाय्यं विदधाति।

अभिरुचिसंस्कारयोः आधारेण छात्राणां विभागद्वयं कर्तुं शक्यते । बाह्यरुचिमन्तः, आभ्यन्तररुचिमन्तश्चेति। बाह्यरुचिमद्भ्यः लौकिकज्ञानेन शिक्षणं सम्यग्भवति । आभ्यन्तररुचिमद्भ्यः आध्यात्मिकपाठ्यक्रमः सम्यग्भवति। रुच्याधारेण पाठ्यक्रमस्यारम्भः भवति-। परम् अन्ततो गत्वा द्विप्रकारकः पाठ्यक्रमः अपि परस्परं सम्मिलति । प्रथमप्रकारके पाठ्यक्रमे सृष्टिज्ञानद्वारा ब्रह्म अन्विष्यते, द्वितीये ब्रह्मणः अभिव्यक्तिरूपे सृष्टौ अध्ययनं भवति।

## शिक्षणविधयः

ज्ञानप्राप्तेः प्रथमम् उपकरणं भवति इन्द्रियम्, यत् बाह्यकरणम् इत्युच्यते । परन्तु इन्द्रियप्रदत्तस्य विश्लेषण-बोध-सङ्कल्प-निर्णयादिकार्यार्थम् अस्ति करणं यत् अन्तःकरणमित्युच्यते । अन्तःकरणं न इन्द्रियम् । इन्द्रियाणि शरीरे बाह्याङ्गवत् दृश्यते । परम् अन्तःकरणं न स्थूलमङ्गम् । अन्तःकरणं पारदर्शकम् अत एव दर्पणवत् पदार्थः प्रतिबिम्बते, तथा पदार्थं च जानाति । आत्मा अन्तःकरणं प्रकाशयति , तं एव प्रकाशम् उपयुज्य पदार्थं जानाति । अन्तःकरणं परिणमते वा रूपान्तरं प्राप्नोति । तेन रूपान्तरेणैव पदार्थः ज्ञातुं शक्यते, तदेव रूपान्तरं वृत्तिरिति निर्दिशन्ति । शङ्कराचार्यः अन्तःकरणस्य वृत्तिचतुष्टयं निर्दिशति । (१) संशयः (२) निश्चयः (३) गर्वः (४) स्मरणम् इति । संशयः अथवा अनिश्चयवृत्तिमदन्तःकरणं मनः इत्युच्यते , निश्चयरूपवृत्तिमदन्तःकरणं बुद्धिः केवलं चैतन्यं ज्ञातुं न शक्यते । परं अन्तःकरणमाध्यमेन तत् संज्ञानं कर्तुं शक्यते । प्रत्येकं व्यक्तेः अन्तःकरणं भिन्नं भवति । अत एव संज्ञानमपि भिद्यते । पदार्थस्य संज्ञाने व्यक्तिषु भेदः अन्तःकरणस्य भिन्नत्वादेव दृश्यते ।

**प्रमाणानि -**

शङ्कराचार्याः त्रीणि स्रोतांसि अवदन् । प्रत्यक्षम्, अनुमानं, शब्दश्चेति । ततः आगताः, उपमानं, अर्थापत्तिः , अनुपलब्धिः इति त्रीणि स्रोतांसि समयोजयन् । स्मृतिः अत्र नान्तर्भवति , स्मृत्या नूतनज्ञानस्य प्राप्त्यभावात् ।

**प्रत्यक्षम्-** प्रत्यक्षस्रोतसा इन्द्रियाणां क्रियाद्वारा पदार्थज्ञानं भवति । इन्द्रियप्रत्यक्षे पदार्थस्य कारकस्य इन्द्रियस्य च सम्पर्कः भवति । यदा वयं वस्तु पश्यामः तदा अन्तःकरणं वस्तुविशेषं प्रति प्रवर्तते, स्वप्रकाशेन तद्वस्तु प्रकाशयति , पदार्थरूपेण परिणमते च । तस्य संज्ञानं करोति । इदं संज्ञानं दृष्टिसंज्ञानं, श्रवणसंज्ञानं, गन्धसंज्ञानं, स्पर्शसंज्ञानं स्वादसंज्ञानमिति कथ्यते । इमानि संज्ञानानि इन्द्रियजन्यानि । इन्द्रियातीतप्रत्यक्षमप्यस्ति। यथा आकाङ्क्षा, हर्षः, पीडा इत्यादयः। इमानि इन्द्रियाजन्यानि, ज्ञेयवस्तुनः ज्ञानं इन्द्रियसन्निकर्षाभावादेव जन्यत्वात् । प्रत्यक्षविधिना संज्ञानप्राप्त्यर्थं ज्ञेयवस्तु प्रत्यक्षविध्युपयुक्तं भवेत् । अहम् अस्ताचले सूर्यसुषमां पश्यामि । अस्मिन् वाक्ये अस्ताचले सूर्यः दृश्यते चेत् इन्द्रियजज्ञानं, परं तस्य सुषमा न इन्द्रियजन्या उक्ते द्वे वस्तुनी प्रत्यक्षेण ज्ञातुं शक्येते, परन्तु शुभाशुभे प्रत्यक्षयोग्ये न।

प्रत्यक्षविधिना बालकेभ्यः शब्द-प्रत्यय-प्रतीकादीनां निर्माणम् अध्यापनीयम् । विज्ञानानां समेषाम् अध्ययनमध्यापनं च प्रत्यक्षविधिना क्रियते । सांख्यदर्शनावसरे अस्य विस्तरः प्रस्तूयते। वेदान्तस्य इन्द्रियाजन्यं प्रत्यक्षं साहित्यकलादीनाम् अध्यापनेऽपि प्रयोक्तुं शक्यते । इन्द्रियाऽन्यप्रत्यक्षेण भावानामनुभूतिर्भवति ।

**अनुमानम् -**

अनुमानं नाम लिङ्गेन अन्यवस्तुज्ञानं प्रप्यते इति । यतो हि द्वयोः व्याप्तिसम्बन्धः वर्तते । अनुमानप्रक्रियायां पदत्रयं वर्तते । पक्षः(Minor terms), साध्यं (Major terms), हेतुः साधनं वा लिङ्गम् (Middle Terms) । यस्य सम्बन्धेन अनुमीयते सः पक्षः। पक्षसम्बन्धेन यत् साध्यते तत् साध्यम् । येन माध्यमेन पक्षस्य सम्बन्धेन साध्यं साध्यते तल्लिङ्गम् । पर्वतः धूमवान्, अतः पर्वतः वह्निमान् । अत्र पर्वतः पक्षः वह्निः साध्यम्, लिङ्गं धूमः। हेतुसाध्ययोः यः व्यापकः सम्बन्धः वर्तते तेन अनुमानं क्रियते । अयमेव सम्बन्धः व्याप्तिरित्युच्यते । वेदान्तस्यानुसारम्

अतीताव्याभिचारी साहचर्यस्य अनुभवमनुसृत्य व्याप्तिस्थापनं भवति । पूर्वं यदि वस्तुनोः साहचर्यं दृष्टं चेत् , अर्थात् तयोः एकत्र दृष्टं चेत् तर्हि तयोः व्याप्तिसम्बन्धः उच्यते, परन्तु तस्य सम्बन्धस्य अपवादः न स्यात् ।

अनुमानस्य प्रयोगः प्राचुर्येण क्रियते । वेदान्तस्यानुसारं व्याप्तौ आगमनस्य निगमनस्य च अन्तर्भावः भवति । विज्ञानगणितसमाजशास्त्राणाम् अध्ययने निगमनात्मकस्य आगमनात्म कस्य च यथोचितं प्रयोगः करणीयः। अयं न्यायदर्शने विस्तरेण प्रतिपादितः ।

**आगमः -**

अद्वैतवेदान्तानुसारम् आगमः वा शब्दः ज्ञानप्राप्तेः स्वतन्त्रं स्त्रोतः । परन्तु शब्दस्य तात्पर्यस्य प्रमाणान्तरेण बाधः न स्यात् । शब्दान्तरेण वदामश्चेत् शाब्दिकज्ञानस्य दार्ढ्यं यदि भवति तर्हि प्रमाणान्तरेण (ज्ञानप्राप्तेः अन्येन स्त्रोतसा) भवेत् । यथा पूर्वमेव आग्रहपूर्वकं उक्तं, सर्वस्याऽपि ज्ञानस्य जीवनस्य अल्पेऽवधौ प्रत्यक्षप्रणाल्यैव साक्षात्कारः न सम्भवति । पूर्वतनैः अर्जितज्ञानस्य अनुभवस्य च संचितरूपं वेदेषु मिलति । आगमः नाम न केवलं वेदः अर्थशास्त्रं परन्तु सर्वमपि ज्ञानमन्तर्भवति यत्र ज्ञानं सिद्धान्तरूपेण (Theory) सञ्चितम् अस्ति । एतादृशज्ञानस्य सापेक्षिकस्थायित्वं वर्तते । बहूनि ज्ञानानि शाश्वतानि भवन्ति । यानि सार्वकालिकानि सार्वत्रिकाणि भवन्ति । कानिचन परिवर्तनशीलानि भवन्ति । वेदान्तानुसारं स्थायिज्ञानं शब्दविधिद्वारा दातव्यम् ।

**अनुभवः -**

पूर्वोक्तैः प्रमाणैः प्राप्तज्ञानादपरापि स्थितिर्वर्तते , सा अनुभवः इत्युच्यते । ज्ञानस्य सर्वास्वपि स्थितिषु ज्ञातृ-ज्ञेय-ज्ञानानां भेदः वर्तत एव, यावत् तेषाम् अभेदः न सिद्ध्यति तावत् ज्ञानस्यानुभूतिः न भवति । अनुभवः इत्यस्यां स्थितौ त्रयाणाम् एकाकारः वर्तते । इयं स्थितिः वाचः विचारात् अतीता । अस्य ज्ञानस्य प्राप्त्यनन्तरं वयं दैवी अस्तित्वेन पूरिताः भवेम । एतादृशी स्थितिः जीवने बहुवारं क्षणिकतया आगच्छति , यदा वयं ध्यानावस्थिता भवेम , वा सौन्दर्यानुभूतिं प्राप्नुमः । यदा एतादृशं ज्ञानं स्थायि भवति तदा मनुष्यः जीवन्मुक्तः इत्युच्यते। परन्तु एतादृशाः अल्पकालिकाः अनुभवाः अपि जीवनं प्रभावयन्ति । छात्राः एतादृशान् अवकाशान् लभेरन् , यदा ते

इन्द्रियजन्यज्ञानं, अनुमानात्, तर्कात् वा मननं कृत्वा स्वयम् अनन्तज्ञाने तथा लीयमानाः भवेयुः यथा ज्ञानादिभेदाः कञ्चित् क्षणपर्यन्तं नाशं प्राप्नुयुः। कला -साहित्य- ध्यान- नाटक- सङ्गीतादिना एतादृशं सहजज्ञानम् अर्जितुं शक्यते । अनुभवः कल्पना वा दिवास्वप्नो वा नास्ति। अनुभवे सत्तासाक्षात्कारः भवति । सत्यस्य साक्षात्कारः अयं, न नूतनांश कल्पनामत्रम् ।

**अधिगमे तर्कः -**

यद्यपि उपर्युक्तः अनुभवः सर्वोच्चः तथापि प्रत्यात्मकस्पष्टता (Conceptual) तेन मिलति। प्रत्येकस्मिन् युगे नवीनप्रत्ययानां निर्माणं भवति । पुरातनप्रत्ययानां नवीनसन्दर्भेषु व्याख्यानं क्रियते । तदर्थं तर्कस्य आवश्यकता वर्तते । सत्यस्य उद्घाटनार्थं परस्पराविरोधसिद्धान्तः स्वीकर्तव्यः (Principle of non-contradiction) । आगमेन ग्रन्थेन वा प्राप्तस्य ज्ञानस्य परीक्षाणार्थमपि तर्कः आवश्यकः, तर्कः तीक्ष्णम् अस्त्रं, यत् अपरीक्षितं विषयं पार्श्वे स्थापयति । परं सः तर्कः तादृशः सर्जनात्मकः सिद्धान्तः सत्यस्य तथ्यानां चयनं कृत्वा सशक्तरूपेण प्रस्तौति।

अस्मिन् लोकतान्त्रिके युगे तर्कबुद्धिपरस्य मनोवृत्तेः विकासः आवश्यकः । परन्तु प्रत्येकं विषये सन्देहः जीवनं नाशयति केचन विषयाः तर्कद्वारा विवेक्तव्याः केचन विश्वसनीयाः, केचन अनुभोक्तव्याः भवन्ति । शिक्षणविधौ सर्वेषाम् अपि स्थानमस्ति । श्रीशङ्कराचार्याः त्रयाणाम् अपि महत्त्वम् अङ्गीकुर्वन्ति, ज्ञानप्राप्तये त्रयाणाम् अपि स्थानं प्रादुः।

**ज्ञानस्रोतांसि -**

उपनिषत्सु वर्णितानां ज्ञानप्राप्तिसाधनानां विवेचनं शङ्कराचार्यैः कृतमस्ति । यदि शब्देन वा आगमेन प्राप्यते तर्हि तदर्थं त्रयः विचाराः आवश्यकाः । प्रथमः श्रवणम् गुरुमुखात् श्रुत्वा ज्ञानस्य सञ्चयनमित्यर्थः । श्रवणे पठनमपि अन्तर्भवति । पुस्तकेषु सञ्चितं ज्ञानं पठित्वा ज्ञानप्राप्तिः प्रथमं सोपानम् । केवलपठनेन श्रवणेन वा तथ्यानि एकत्र कर्तुं न शक्यते । परन्तु तेषां ज्ञानमपि आवश्यकम्। ज्ञानस्य आत्मसाक्षात्करणार्थं युक्तियुक्ततया विचारः आवश्यकः । अनेके संशयाः भवन्ति । अध्यापकैः सह विचारं विमृश्य संशयानां निवारणं साध्यम् । सहपाठिभिः विचारविमर्शनेन अपि संचितज्ञानस्यावबोधः कर्तुं शक्यते । इदमेव साधन मननमित्युच्यते।

तृतीयं निदिध्यासनमित्युच्यते । प्रत्ययनिर्मितं , अवबोधात्मकं च पुनः पुनः विचारणीयम्। प्राप्तज्ञानस्य जीवनोपयोगितया उपयोगः अपि अन्तर्भवति । मौखिकं ज्ञानं व्यक्तित्वस्य अङ्गं स्यात् । अवस्थाम् इमां निदिध्यासनम् इति निर्दिशन्ति ।

**अनुशासनम् -**

अध्ययनस्य सञ्चालनार्थम् अनुशासनमावश्यकम् । यावत् मनः संयमितं न भवति, तावत् एकाग्रता न सिद्ध्यति , एकाग्रतां विना अध्ययनम् असाध्यमेव । वेदान्ते बालप्रकृतेः चतस्रः अवस्थाः उपवर्णिताः । क्षिप्तः प्रथमावस्था इत्युच्यते । अस्यामवस्थायां यस्मिन् कस्मिन्नपि कार्ये अध्ययने वा एकाग्रतया उपवेशनम् असम्भवमेव। अवधानम् इतस्ततः गच्छति । बालकः एकस्मिन् कार्ये निरतः रुचिकरं कार्यान्तरं पश्यति चेत् प्रारब्धं कार्यं विहाय तत्र गच्छति इति लौकिकप्रसिद्धम् । इयम् अन्तःकरणस्य चञ्चलावस्था ।

मूढः इति द्वितीयावस्था । अत्र सर्वथा छात्रः इन्द्रियाधीनः भवति । स्वस्य स्वस्मिन् नियन्त्रणं न वर्तते। इन्द्रियाण्येव तस्य व्यवहारं नियन्त्रयन्ति । इन्द्रियेभ्यः यानि कार्याणि सुखदानि भवन्ति तान्येव अनुष्ठीयन्ते । अध्ययनार्थं प्रतिकूलेयं स्थितिः अनुशासनदृष्ट्या निम्नतमा इत्युच्यते ।

तृतीया विक्षिप्तावस्था । अत्र सीमिततया इन्द्रियाणां नियन्त्रणं भवति । बालकः स्वेच्छापूर्वकम् अध्ययनं करोति । यद्यपि इन्द्रियाणि विषयान् प्रति प्रेरयति तथापि सः बालकः आत्मशक्त्या अध्ययने ध्यानं करोति । अस्यामवस्थायाम् अल्पकालिकं ध्यानं वर्तते । बहुकालपर्यन्तम् अवधानस्य स्थिरत्वं छात्रेभ्यः दुष्करमेव भवति । इन्द्रियाणि तं पुनः पुनः आकर्षन्ति । स्व पर योः मध्ये आकर्षणस्य स्थितिरेव विक्षिप्तावस्था इत्युच्यते ।

एकाग्रतावस्था चतुर्थः । यत्र इन्द्रियमनो-बुद्धिषु आत्मनः नियन्त्रणं भवति । व्यक्तिः स्वस्य नियामकः नियन्ता च वर्तते । अनात्मतत्त्वानि तं न उपसर्पन्ति । अस्यां स्थितौ व्यक्तिः यदिच्छति तदेव करोति, इन्द्रियाणि मानसिकविकारः, वा कुतर्कः तं न भ्रामयति । किं करणीयं, किं न करणीयं, इदंपापम् इदंपुण्यम् इत्यादयःप्रश्नाः लुप्यन्ते । तस्य आत्मनः प्रकृत्यनुसारं आचारः भवति । सहजतयैव सः सत्यशिवसुन्दरैः युज्यते । इयम् अनुशासनस्य उच्चास्थितिरित्युच्यते।

बालकान् अनुशासितुं द्वयोः तत्त्वयोः साहाय्यं मिलति । अध्यापकस्य मार्गदर्शनं , ज्ञानं च इति । श्रुति -स्मृत्यादिषु ग्रन्थेषु प्रतिपादितनियमेभ्यः बालकः सदाचारं जानाति । अध्यापकस्याचारः सदाचारस्य उदाहरणं प्रस्तौति । सदाचारविषये संशयः उदेति चेत् अध्यापकस्याचारः एव मार्गं दर्शयति । वेदान्ते अनुशासनं नाम आत्मानुशासनमेव। अध्यापकः श्रुतिः स्मृतिः समाजः इत्यादीनां मार्गदर्शनं कर्तुं शक्नोति परन्तु आग्रहरूपेण अनुशासितुं न शक्नोति । एवं कृतं चेत् तत् शासनमेव भवति, न संयमः । वेदान्तस्याध्यापकः छात्रान् ब्रह्ममयान् मनुते । तस्य संकल्पे बुद्धिविषये च अत्यन्तविश्वासं प्रदर्शयति, अत एव छात्रेभ्यः शारीरिकं दण्डं वा अपशब्दं वा प्रयोक्तुं सः न शक्नोति । एवम् अपशब्दप्रयोगः स्वान्तर्निहितब्रह्म प्रति अपशब्दप्रयोगस्य समानत्त्वात् । वेदान्तशिक्षकस्यानुसारं छात्राः कदापि दुष्टप्रकृतयः न भवन्ति । अतः तेभ्यः निर्णयं कर्तुं अवकाशः प्रदेयः इति । सः शिक्षकः स्वच्छात्राणां संकल्पशक्तौ विश्वसिति । तेन यदि छात्रेभ्यः निर्णयस्वीकारार्थम् अवकाशः प्रदीयते तर्हि स्वीकृतः निर्णयः न्यायपूर्णः भवतीति मन्यते । अनुशासनम् अध्ययनाध्यापनयोः समीचीनतया चालयितुं एव न प्रयुज्यते, अपि तु बालकेषु सदाचारस्य अङ्कुरार्पणार्थमपि । नैतिकजीवनं, अनुशासितजीवनं दर्शनक्षेत्रे समानमर्थं भजते । वेदान्तानुसारं नैतिकजीवनस्य वा अनुशासितजीवनस्य परिभाषा अपि ज्ञातव्या । प्राणिसङ्कुलेषु मानवप्राणिने एव नैतिकजीवनमावश्यकम् । बुद्धिप्रकर्षात् सः चिन्तनं कर्तुं शक्नोति, तस्मिन् पूर्णापूर्णयोः वा अनन्ताल्पजीविनोः तत्त्वे विद्यते । सः जानाति अहम् अनन्तस्य अपूर्णावस्थायाम् अस्मि इति । यद्यपि कर्मजनितप्रभावात् अपूर्णशरीरे बद्धः तथापि सत्यं शिवं सुन्दरम् इत्याद्यनन्तादर्शयुक्तः एव । तस्यादर्शस्य अभिव्यक्त्यर्थं तस्य मनसि आकाङ्क्षाः उद्भवन्ति । यावत् सत्यमित्यादितत्त्वानां प्राप्तिः न भवति तावत् तस्य मनसि, क्लेशः, निराशा, खेदः . पीडाः भवन्ति । परन्तु यथा यथा पूर्णतां प्रति सरति तथा तथा आनन्दस्य परिमाणं वर्धते। पूर्णतां यदा प्राप्नोति तदा परमानन्दस्य स्थितिम् अपि प्राप्नोति। मानवः त्यागः सेवा- परोपकारं कर्तुं न जीवति परं स्वयम् आनन्दस्य वर्धनाय जीवति ।

यथोक्तरीत्या मुक्तावस्थायां पापपुण्ययोः, शुभाशुभयोः भेदः नश्यति । एतादृशात्मानुभूत्यर्थं नैतिकजीवनमावश्यकं भवति । नैतिकजीवनं तादृशीं स्थितिं

प्राप्तुमुपकरोति। येन कर्मणा सत्यप्रकटनं भवति तदेव सत्कर्म, कुकर्म सत्यमावृणोति । जीवनं सुन्दरतया निर्वोढुं येन उपकारः मिलति तत् शुभं , तद्विपरीतम् अशुभम् । वेदान्ती संसारः ब्रह्ममयः इति मनुते । अतः समस्तं प्राणिकुलं प्रेम्णा पश्यति । सर्वेषां कृते सः दयां, करुणां, ममतां च प्रदर्शयति। अहङ्कारेण, तृष्णया च शान्तिः न मिलति परन्तु विश्वस्य अभ्युदयार्थं कृतसमर्पणेन मिलति । अहङ्कारः अधिकं पापं भवति । प्रेमा, करुणा च महत् पुण्यम् । अहङ्कारवर्धकनाम् इन्द्रियाणां नियन्त्रणमावश्यकम् । सामाजिकहितेन सह वैयक्तिकहितं च विचिन्त्य लक्ष्यप्राप्तये अग्रेसरः भवामः । अहङ्कारस्य स्थाने विजयाय, प्रतिरोधस्य स्थाने क्षमायै, पारिवारिकहितस्य स्थाने विश्वप्रेमभावनायाः स्थानं प्रदेयम् । कर्तव्यस्य स्वतः मूल्यं नास्ति । कर्तव्यमाध्यमेन वयं सामाजिकस्वेन सह वैयक्तिक स्वस्य तादात्म्यं कुर्मः । अत एव शङ्कराचार्याः प्रचलितसामाजिककर्तव्यानां निर्वाहः नैतिकजीवनाय आवश्यकमिति मन्वते । संयम - दान-त्याग- तपसि सामाजिकचारित्रं दृढयन्ति । एतानि कर्तव्यानि मानवं स्वार्थात् प्रमादात् जुगुप्सया च मोचयन्ति । शान्तिं च प्रददति यः शान्तेः अध्येतुमावश्यकः अस्ति । शङ्कराचार्याः योगशास्त्रोक्तशमदमादियोगिकक्रियाणां महत्त्वं स्वीकुर्वन्ति । योगशास्त्रोक्तानि अन्तरङ्गबहिरङ्गसाधनानि वेदान्तम् अङ्गीकरोति । तेषामनुसारेण योगाभ्यासेन इन्द्रियाणि बाह्यवस्तुभ्यः आकृष्य ज्ञानप्राप्त्यर्थं केन्द्रीकर्तुं शक्यन्ते ।

**आधुनिकशिक्षा -**

भारतीयचिन्तनपथि वेदान्तमेव अन्तिमं चिरकालिकम् इति उच्यते । श्रीशङ्कराचार्याणां रामानुजार्याणां च चिन्तनं यत्र क्वापि वेदान्तस्यैव व्याख्यान्तरम् । आधुनिकभारतनिर्मातृषु गान्धिः टागोरः, विवेकानन्दः, इत्यादयः प्रमुखाः एतेषां दर्शनं वेदान्तदर्शनमेव । यत् गान्धिप्रभृतिभिः भारतीयाशिक्षासु प्रभावः उत्पादितः तत् वेदान्तस्यैव प्रभावः इत्युक्तिः उचितमेव भवति । आत्मा ब्रह्मवत् सर्वशक्तिमान् , सर्वज्ञः, सर्वदर्शी इति विश्वासेन विना लोकतन्त्रस्य मूलाधिकारः व्यक्तेः गरिमा (Dignity of the individual) मूल्यं जहाति । अध्यापकस्य कृते बालकस्य व्यक्तित्त्वमादृत्य व्यवहारः वेदान्ते एव प्रतिपाद्यते । अन्येषु दर्शनेषु एवं दृढरूपेण उक्तिः दृश्यते वा ? यदि शिक्षायां लोकतान्त्रिकभावनायाः चरितार्थः करणीयः चेत्

वेदान्तदर्शनमावश्यकमेव । लोकतन्त्रस्य अन्यदादर्शद्वयं समानता, स्वतन्त्रता च । यावत् सर्वेषु ब्रह्मसाक्षाकारः अध्यापकेन न क्रियते तावत् सर्वान् छात्रान् समानतया द्रष्टुं दुष्करमेव । शिक्षायां समानतायाः आदर्शस्य क्रियान्वयः करणीयः चेत् वेदान्तस्य उच्चादर्शः स्वीकरणीय एव । अद्य स्वतन्त्रताशब्दस्य दुरुपयोगः दृश्यते । स्वतन्त्र इति उच्छृङ्खलता एव सर्वत्र दृश्यते, यतोहि एकस्य स्वातन्त्र्यं अन्यस्मै शापवद्भवति । अद्य स्वातन्त्र्यस्य अर्थः नियन्त्रणाभावः इति प्रचालितः । एतादृशमानसिकवृत्तेः वृद्ध्या अनुशासनाभावः एव वर्धते । वेदान्तेन स्वतन्त्रता ऽनुशासनयोः घनिष्ठः सम्बन्धः उच्यते, वेदान्ते स्वतन्त्रताप्राप्तये प्रथमसोपानमेव आत्मसंयमः इति एव वक्तव्यम् । वैदान्तिकस्वतन्त्रता न अवरा, परन्तु मुक्तेः अपररूपः यां प्रति मानवः निरन्तरं सरति । अद्यतनयुगेऽपि शिक्षायाः कृते मार्गदर्शनार्थं स्वतन्त्रसंयमयोः समन्वयः आवश्यकः ।

लोकतन्त्रस्य अपरः आदर्शः शिक्षावसराणां समानता । यद्यपि संविधानेन सर्वेभ्यः समानशिक्षां. प्रतिभाशालिबालकेभ्यः भिन्न शिक्षां च न विधीयते तथापि व्यवहारः तथैव वर्तते । यद्यपि दण्डनीत्यनुसारेण सर्वे बालकाः समानाः तथापि विद्यालयेषु भेदः दृश्यत एव । शिक्षायां समानः अवकाशः सर्वेभ्यः न मिलति । जनानां समानतायाः विचारस्य दार्शनिकदृष्ट्या भावात्मकदृष्ट्या च ग्रहणम् आवश्यकम् । सर्वेषु एकमेव ब्रह्म वर्तते, अतः सर्वे समानाः बालकाः इति विचाराः यावत् अस्माकं जीवनस्य अङ्गं न भवति तावत् व्यवहारेषु असमानता दृश्यत एव। अयमेव विचारः बन्धुता (Fraternity) इत्यस्मिन् आदर्शे अपि समन्वेति । वेदान्तः जीवनं श्रेष्ठं कर्तुं व्यक्तित्वविषये बलं प्रददाति । शिक्षादर्शः मनुष्यं पाशवीयप्रवृत्तिभ्यः मोचयित्वा मानवीयगुणैः योजयति । वेदान्तस्य अनया दृष्ट्या अनुपमं योगदानं भवति ।

*******************

७

# जैनदर्शने शिक्षातत्त्वम्

भारतीयदार्शनिकचिन्तनधारायां पर्याप्तं स्वातन्त्र्यं वर्तते । प्रायशः भारतीयदर्शनस्य मूलचिन्तनं वेदेभ्यः एव लभ्यते । साक्षात् वेदः दर्शनविषयो न भवति, तथापि षडास्तिकदर्शनेषु चिन्तनक्षेत्रे (आलोचनाधारायां ) वेदस्याधिकारः दृश्यते एव । लोकायतजैनबौद्धदर्शनानि वेदस्य प्रामाण्यं न स्वीकुर्वन्ति । लोकायतदर्शनस्य कोऽपि मूलग्रन्थो नैवोपलभ्यते, अतः लोकायतदर्शनविषये अस्माकं परोक्षज्ञानमेव वर्तते । अपि च अस्माकं संस्कृतिः लोकायतदर्शनात् भिन्ना, अतः शिक्षाक्षेत्रे अस्य प्रभावः स्पष्टतया द्रष्टुं नैव शक्यते । जैनबौद्धदर्शनयोर्मध्ये केवलं क्रमबद्धतत्त्वज्ञानमेव न परन्तु समस्तधार्मिकपद्धतीनां विकसितशिक्षाप्रणालीनामपि योगदानं वर्तते । जैन-बौद्धचिन्तनधाराः अस्माकं देशे सांस्कृतिकपरम्परासु समन्वितास्सन्ति । अत एव अद्यापि जैनचिन्तने विश्वासिनः तदनुरूपजीवनयापनकर्तारश्च अस्मिन् देशे लक्षशः जनाः विद्यन्ते । अतः जैन-बौद्धशिक्षादर्शनयोः विवेचनकारणं युक्तियुक्तं भवति । कालक्रमानुसारेण जैनदर्शनस्य स्थानं प्रथमं भवति । अतः प्रथमतया जैनदर्शनं तदनन्तरं बौद्धदर्शनस्य च विवेचनं क्रियते ।

## शिक्षायाः परिभाषा

जैनदर्शनानुसारं यज्ज्ञानं व्यक्तेः सज्जीवनाय प्रेरयति सा विद्या इति । ज्ञानक्रमः सांसारिको धार्मिको वा, उत व्यावसायिको वा यदि सः व्यक्तेः तथा समाजाय च हितावहः भवति चेत् तं शिक्षाङ्गत्वेन परिगणयामः । नो चेत् न । यत् ज्ञानं मनुष्यस्य सच्चरित्राय प्रेरयति तत्सर्वं ज्ञानम् उपयोगि भवति ।

## शिक्षायाः उद्देश्यानि

अन्यभारतीयदर्शनवत् जैनदर्शनेऽपि शिक्षायाः उद्देश्यं व्यक्तेः कृते मुक्त्यर्थं प्रवृत्तिसंपादनम् । एवमेव अस्मिन् दर्शने आत्मपुद्गलयोर्मध्ये भेदमज्ञात्वा उभयोः एकत्वेन चिन्तनमेव बन्धनकारणम् । जैनदर्शनानुसारं जीवः स्वकर्मानुसारं पुद्गलेन आवृतः भवति । एतादृश जीवपुद्गलयोः संयोग एव बन्धनस्य कारणं भवति । एवं जीवपुद्गलयोः वियोग एव मोक्षः । क्रोधः, मानं, माया, लोभः इत्यादि कुप्रवृत्तयः पुद्गलकणान् आकर्षन्ति। अतः एते कषायाः इति व्यवह्रियन्ते । एते बन्धनकारणानि

भवन्ति । एतेषा कषायाणां कारणम् अस्माकम् अज्ञानमेव । अर्थात् आत्मानात्मद्रव्ययोः यथार्थज्ञानाप्राप्तिकारणात् अस्माकं मनसि क्रोधः, मानं, माया, लोभादिप्रवृत्तयः सक्रियाः भवन्ति । ज्ञानप्राप्तिद्वारा अज्ञानस्य नाशं कर्तुं शक्यते । एतादृशयथार्थज्ञानस्य सम्यग् ज्ञानमिति व्यवहारः । जैनदर्शनानुसारं शिक्षायाः लक्ष्यं सम्यग् ज्ञानप्राप्तिः । सम्यग् ज्ञानम् असंदिग्धं, दोषरहितं च भवति । केवलसम्यग्ज्ञानप्राप्तिमात्रेणैव मोक्षप्राप्तिः न भवति सम्यग्ज्ञानं मुक्तेः मार्गं प्रशस्तं करोति । सम्यग्ज्ञानम् आत्मानात्मनोः शरीरजीवयोः सदसतोः मध्ये भेदं स्पष्टयति । परन्तु अनेन व्यक्तित्वे सन्तुलनं न भवति । सम्यग्ज्ञानेन व्यक्तित्वस्य केवलम् एकपक्षीयविकासो भवति । जैनदर्शने सम्यग्ज्ञानेन साकं सम्यग्दर्शनस्य तथा सम्यक्चरित्रस्यापि विकासकरणे समानरूपं बलम् अदात् । सम्यग्ज्ञानप्राप्त्यर्थं जैन-आगमेषु गुरुवाक्ये च श्रद्धा आवश्यकी । श्रद्धैव सम्यग् दर्शनमिति उच्यते । सम्यग्दर्शनस्याभिप्रेतार्थः व्यक्तित्वस्य भावात्मकपक्षस्य उचितविकासः । तर्कबुद्धिपरं ज्ञानं मनुष्यं केवलं शुष्कचिन्तकं करोति । एतदतिरिच्य तर्कबुद्धिपरकं ज्ञानं दुर्व्याख्याम् अपि कर्तुं शक्नोति एवं तस्य दुरुपयोगोपि भवितुमर्हति । सम्यग्दर्शनं ज्ञानं सद्वृत्तिभिः संयोजयति । सम्यग्दर्शनस्य एकं कार्यं ज्ञानं प्राप्तुं जीवान् ग्रहणशीलरूपेण (Receptive) करणम् । द्वितीयं - व्यक्तिं सत्कर्मणि प्रेरयति । सम्यग्ज्ञानम् अध्ययनद्वारा प्राप्तुं शक्यते । परन्तु सम्यग्दर्शनस्योदयः तदा भवति यदा अज्ञानं प्रति, अकरणीयकर्म प्रति च विरक्तिः भवति । एष विराग एव जैनदर्शस्य शब्दावल्यां " निर्जराः" इत्युच्यते । श्रद्धा अन्धविश्वासः नास्ति । परन्तु पूर्णस्य एवं युक्तियुक्तस्य तत्त्वज्ञानस्य प्रतीतिः । विषयसम्बद्धे किञ्चिज्ज्ञानप्राप्त्यनन्तरमेव श्रद्धोत्पन्ना भवति । आधुनिकमनोविज्ञानानुसारम् अपि यावत् बौद्धिकदृढविश्वासः(Intellectual Conviction) न भवति, तावत् पूर्णज्ञानं प्राप्तुं प्रेरणापि न भवति । विना बौद्धिकं दृढविश्वासं नूतनज्ञानं व्यर्थं भवति । पौनःपुन्येन मननात् विश्वासः एधते । एवं पूर्णज्ञानस्य प्राप्त्यनन्तरं विश्वासोऽपि पूर्णो भवति ।

सम्यग्ज्ञानसम्यग्दर्शनयोः समाहारः सम्यक् चरित्रे भवितव्यः । अहितकार्याणां निवारणं हितकार्याचरणं च सम्यक् चरित्रमित्युच्यते । अस्मिन् ज्ञानश्रद्धयोः परिणतिः आचरणे भवितव्या। एवं च जैनशिक्षायाः उद्देश्यमस्ति यत्

यस्मिन् सम्यग् ज्ञानप्रतीतिः, श्रद्धा, भावनोन्मेषः, सम्यक्चरित्रे ज्ञानम् एवं विश्वासस्य परिणतिः भवति, तादृशस्य व्यक्तित्वस्य समुचितरूपेण विकासकरणम्। यस्यां व्यक्तौ पूर्वोक्तसमन्वितविकासः भवति तस्याः व्यक्तेः व्यवहार निम्नाङ्कितलक्षणानि द्रष्टुं शक्यन्ते।

१) पञ्च महाव्रतपालनं तस्य जीवनाङ्गरूपेण करणम् । पञ्च महाव्रतानि यथा -

(क) मनसा, वाचा. कर्मणा वा हिंसा न कार्या ।

(ख) विचारे, वाण्यां, व्यवहारे च सत्यस्य पालनम् ।

(ग) स्थूलरूपेण सूक्ष्मरूपेण वा चौर्यं न कार्यम् ।

(घ) सर्वप्रकारभोगेषु संयमनम् । तथा इन्द्रियलोलुपतायाः नियन्त्रणम् ।

(ङ) विषयेषु आसक्तेः त्यागः । एवं वस्तुसंग्रहनियन्त्रणम् ।

२) चलने, कथने, उत्थाने, उपवेशने, भोजनकरणादिसर्वप्रकारजीवनव्यापारेषु सतर्कताव्यवहारः। येन अन्यजीवस्य हिंसा नैव भवेत्।

३) मनसि, वचने, कर्मणि च संयमनम् ।

४) दशप्रकारधर्मैः गुणैः जीवनं परिलक्षितं भवेत् । दश धर्माः यथा - क्षमा, कोमलता, सरलता, सत्यं, शौचं (पवित्रता), संयमः, तपः, त्यागः, निर्ममत्वं, ब्रह्मचर्यं च ।

५) जीवस्य तथा संसारस्य च विषये वास्तवज्ञानं भवितव्यम् तत्सम्बन्धबौद्धिक-अवधारणा स्पष्टरूपेण स्यात् ।

६) क्षुत्-पिपासा-शैत्यमुष्णतादीनां कारणीभूतानां कष्टानां सहिष्णुता ।

७) जीवने समता, निर्मलता, निर्लोभवृत्तिः तथा सच्चारित्रकगुणाः आवश्यकाः ।

**छात्रस्वभावः**

संसारे सर्वप्राणिषु मनुष्यः उत्कृष्टतमः । कथमित्युक्तौ एक इन्द्रियवान् जीवः निम्नतमवर्गीयः। तथा पञ्चेन्द्रिययुक्तः प्राणी उच्चतमः इति। मनुष्यस्य पञ्चेन्द्रियेभ्यः अतिरिक्तरूपेण एकं षष्ठम् इन्द्रियं मनः अपि वर्तते । अतः पञ्चेन्द्रिययुक्तेषु प्राणिष्वपि मानवः सर्वश्रेष्ठः । अन्यप्राणिनां व्यवहारः क्षुधा-भयम्-जुगुप्सादिसहजप्रवृतिभ्यः नियन्त्रितः न भवति। परन्तु मानवशिशुः मनसा युक्तत्वात् तस्य व्यवहारस्य नियन्त्रणं कर्तुं शक्यते । अतः शिक्षया तस्य व्यक्तित्वाय सज्जीवनाय प्रेरणं कर्तुं शक्यते ।

बालकस्य व्यक्तित्वं द्वाभ्यां तत्त्वाभ्यां निर्मितं भवति । एकं तु चेतनवान् आत्मा, यत् जैनैः जीव इति अथवा जीवात्मा इत्युच्यते । तथा द्वितीयं शरीरम् । चैतन्यम् अथवा जीवात्मा समग्रशरीरे व्याप्तो भवति । अन्यभारतीय-आस्तिकदर्शनवत् जैनदर्शनेऽपि आत्मा शरीर-इन्द्रियादिभ्यः अतिरिक्तः एकः चेतनसत्तात्मकः पदार्थः ।

बालकस्य शरीरं तस्य पूर्वजन्मसु सञ्चितकर्मविपाकं भवति । जैनदर्शने शरीरनिर्माणकारणीभूतं भौतिकतत्त्वं पुद्गलः इति व्यवह्रियते । आधुनिकभौतिकविज्ञानसमान जैनानाम् अपि अयं संसारः अनेकपौद्गलिक (भौतिक) परमाणुभिः निर्मितः भवति। अन्यप्रकारेण वदामः चेत् बालकस्य शरीरं तस्य वातावरणं च अनेकपौद्गलिकपरमाणूनां मिश्रणं भवति । जैनदर्शने कर्माण्यपि पुद्गलरूपेण मन्यन्ते । एवं मानवः यत् कर्म करोति तत्कर्मसम्बद्धः पुद्गलः जीवमावृणोति । तथा अनन्तरजन्मनि उक्तकार्मिक(कर्मजन्य) पुद्गलेभ्यः निर्मितस्य शरीरस्य जीवात्मा धारणं करोति । एतत् कर्मणः शरीरमेव स्थूलशरीरस्य रूपग्रहणं करोति । जीवस्य प्रवृत्तिः तेन प्राप्तशरीरानुसारं भवति । तस्मिन् जीवः स्वयमेव स्वस्मिन् लिप्तो भवति । सर्वबालकानां आत्मा समानः नित्यः । अनया दृष्ट्या सर्वे बालकाः शिक्षकाय तुल्याः परन्तु तेषु ये भेदाः दृश्यन्ते ते कर्मजनिताः तथा शरीरस्य लक्षणं भवति । शरीरजनितमन्तरमपि बालकशिक्षां प्रभावयति । शारीरिकशक्तिः सर्वेषां समाना न भवति । सर्वेन्द्रियाणि सर्वच्छात्राणां एकप्रकारेण संवेदनशीलानि न भवन्ति । सर्वेषां छात्राणां बुद्धिः तुल्या न । पूर्वजन्मसञ्चितकर्मकारणं सर्वेषां बालकानां विकासः तुल्यं न भवितुमर्हति । एतादृशकर्मजन्य-असमानताः मनसि निधायैव अध्यापकः प्रत्येकं बालकाय पाठ्यसामग्र्याः संयोजनं करोति । शिक्षणविधिरपि प्रत्येकं बालकस्य प्रकृतेरनुरूपं भिन्नभिन्नरूपेण स्यात्, यतो हि कश्चन बालकः स्थूलमाध्यमेन ज्ञानं प्राप्नोति, अन्यः तर्कद्वारा एकस्मै छात्राय अधिकसमयः आवश्यकः, अन्यस्मै न्यूनः । एतादृशभिन्नताः स्वीकृता अध्यापकेन न विस्मर्तव्यमस्ति यत् तेषु विद्यमानं चेतनत्वं समानमिति । वेदान्तवत् आत्मनः समानतायां विश्वासं कुर्वन्तः अपि आत्मनः भेदम् अङ्गीकुर्वन्ति । जैनाः प्रत्येकं छात्रस्य अद्वितीयव्यक्तित्वं स्वीकुर्वन्ति । प्रत्येकं बालकस्य स्वकीयं शरीरं, स्वतन्त्र-आत्मा, स्वकीयं व्यक्तित्वं, स्वकर्म, स्वयं निर्णयश्च भवति । स्वस्य भाग्याय स्वयमेव एकमात्रनियन्ता एवं नियामकः भवति , नान्यः

कोऽपि ब्रह्मरूपसत्ता । नायमन्येन निर्मितः, तस्य कर्मणां नियन्त्रणार्थं कोऽपि अन्यः नास्ति । अयम् अन्यं प्रति उत्तरदायी न भवति । यस्य कस्यापि आदेशात् भयाद्वा कर्म न करोति । अयं स्वतन्त्रः इच्छाशक्तिमान् च । स्वयमेव निर्णयान् स्वीकरोति । अस्य स्वतन्त्ररूपेण चयनं कर्तुं सामर्थ्यं भवति । छात्र एव कर्मणः कर्ता भोक्तापि । छात्रस्वतन्त्रतायाः एतादृशश्रेष्ठं दिग्दर्शनम् अन्यत्र नैवोपलभ्यते । जैनदर्शने विश्वासी शिक्षकः छात्रस्य व्यक्तित्वे एतादृशस्वतन्त्रतायाः संरक्षणं करोति । बालकेषु स्वतन्त्रनिर्णयस्वीकरणसामर्थ्यस्यापि विकासं करोति । ज्ञानमात्मनः लक्षणं भवति । जीवात्मानं तस्य ज्ञानात् पृथक् कर्तुं न शक्यते । ज्ञानं किमपि बाह्यवस्तु न भवति । शिक्षाद्वारा जीवात्मनि अन्तर्हितपुदगलेभ्यः आवृतस्य ज्ञानस्य क्रमशः अनावरणमात्रं कर्तुं शक्यते । नूतनस्य ज्ञानस्य उद्भवः न भवति । विद्यार्थी अनन्तज्ञानयुक्तः वर्तते । शिक्षाद्वारा वयं शनैः शनैः तस्य ज्ञानस्य अनावरणं कृत्वा अन्तर्निहितं ज्ञानं प्रकाशयामः। जैनदर्शने द्वयोः प्रकारयोः छात्रयोः विवेचनं कृतं वर्तते। एकस्मिन् स्तरे विद्यार्थी श्रमणः इत्युच्यते। अन्यस्मिन् स्तरे विद्यार्थी श्रावकः । शिक्षायाः प्रयोजनं श्रमणछात्रस्य आत्मकल्याणाय भवति । अस्मै कठोरसंयमस्य व्यवस्था क्रियते । श्रमणात् एवम् अपेक्ष्यत यत् यदि सः किञ्चित् अभ्यस्यति तस्य स्पष्टः प्रतिबिम्बः तस्य व्यवहारे मिलेत् । सः ' महाव्रती' इत्युच्यते। अन्यस्य श्रावकस्य तु अणुव्रती व्यवहारः । शिक्षितव्यक्तेः यानि लक्षणानि उद्दिष्टानि वर्तन्ते तानि सर्वाणि श्रमणे भवितव्यानि । पञ्चव्रतानामुल्लेखः उपरि कृतः वर्तते , तस्य अक्षरशः परिपालनं श्रमणाय आवश्यकं भवति । श्रमणस्य जीवनं न स्वार्थाय किन्तु समाजाय समर्पितं भवति । एवं सः समाजहिताय जीवति । तथा परोक्षरूपेण स्वस्य आत्मोन्नतिमपि करोति ।

श्रमणस्य शिक्षा पारमार्थिकी भवति । श्रावकशिक्षा सांसारिकजीवनस्य पवित्रतायै जीवनाय च भवति । श्रावकः 'अणुव्रती' इत्याहूयते । अर्थात् तस्य व्रतं श्रमणव्रतापेक्षया सरलं भवति । श्रावकस्य शिक्षा सुखमयगृहस्थजीवनयापनाय भवति । श्रावकेण अध्यापकस्य अपेक्षा अत्र क्रियते, येन केनचित् प्रकारेणापि जीवनयापनं कुर्वति तस्मिन् पञ्चव्रतानि सूक्ष्मरूपेण अथवा सीमितरूपेण वा प्रतिबिम्बितानि स्युः। अयम् अस्मिन् प्रपञ्चे वसति, अतः तस्य जीवने सर्वदा हिंसायाः दूरीकरणं न शक्यते, परन्तु सीमितुं शक्यते । इत्थम् अनावश्यकहिंसां प्रतिदिनं यां वयं

कुर्मः ततः दूरे भवितव्यम् । एतद्वचनं सत्यम्, आस्तेयं, ब्रह्मचर्यम्, अपरिग्रहः इत्यादि विषयेषु समन्वितं भवति । श्रमणः सन्यासी भवति, अतः सदा सत्याचरणमावश्यकम् । चौर्यात् दूरे भवितव्यम् । ब्रह्मचर्यं पालयति । केनापि प्रकारेण धनसम्पत्तिः न स्थापनीया । परन्तु श्रावकः पूर्णरूपेण मनसा, वाचा, कर्मणा एतेषां व्रतानां पालनं न करोति । सः विनोदेन शिष्टाचारमुक्तः सन् मिथ्यां वदति। अल्पचौर्यं करोति च, गृहस्थो भवति , धनसम्पत्तिमपि स्थापयति । अणुवतिपुरूषादेतदपेक्ष्यते यत् तेन किमपि मिथ्याचरणं न करणीयम् येन तस्यात्मनः एवम् अन्यपुरूषाणां हानिः भवति । तेन प्रामाणिकगृहस्थेन निषिद्धं चौर्यं न कर्तव्यम् । सः समाजोचितनियमैः विवाहितपतिपत्नीरूपेण जीवनयापनं कुर्यात् । तथा अन्यपुरुषस्त्रीणामपि यौवनभावनायाः संयमनं कुर्यात् । सः गृहसम्बद्धसम्पदादीनां स्वामी भवतु , परन्तु तेषां संग्रहणं स्वेच्छया सीमितं कुर्यात् । श्रावकात् एतदपेक्ष्यते यत् सः तस्य पारिवारिकसामाजिकराजनैतिकव्यावसायिक- जीवनस्य सर्वस्तरेषु अहिंसा, सत्यम्, अस्तेयं, निर्लोलुपता अपरिग्रहः इत्यादिभिः परिलक्षितः स्यात् । उदाहरणरूपेण अस्तेयव्रतं स्वीकुर्मश्चेत् छात्रभूमिकायां सः अन्यस्य अनुकरणं न कुर्यात्, व्यापारिभूमिकायां सः स्वल्पतोलनं न कुर्यात् , स्वल्पं न मापयेत् , चौर्यं न कुर्यात् , पदार्थेषु मिश्रणं न कुर्यात् , राजनैतिकभूमिकायां मतदातृणां कृते उत्कोचं न दद्यात्, यस्य कस्यापि पुरुषस्य प्रामाणिक-अधिकारस्य हननं न कुर्यात् । एतादृशव्यवहार एव अणुव्रतिव्यवहारः अथवा श्रावकस्य व्यवहार इति मन्यते ।

जैनदर्शने छात्रेभ्यः अत्यन्तकठोरानुशासनस्य आवश्यकता उक्ता वर्तते । जैनदर्शने एवं मन्यते यत् यदा ग्रहणशीलता भवति तदा ज्ञानप्राप्तिः भवति । जैनदर्शने शिष्यात् गुरुं प्रति समर्पणभावः अपेक्षितः । विद्यां प्राप्तुं प्रथमनियमः एवमस्ति, छात्रः विनीतः स्यात् । अविनीतः उच्छृङ्खलव्यवहारी, गर्वितः शिष्यः सुचारु रूपेण शिक्षां प्राप्तुं न शक्तो भवति । उत्तराध्ययनसूत्रेषु शिक्षार्थिनां कृते निम्नाङ्कितगुणाः वर्णिताः वर्तन्ते ।

शिक्षार्थी एवं भवितव्यः, यः गुरूजनानां न्याययुक्तवाक्यानां परिपालनं कुर्यात्, यः उपदेशदानेन कुपितः न भवेत्, यस्मिन् सहिष्णुता स्यात्, एवम् अज्ञानपुरुषैस्साकं हास्यविनोदकरणेन स्वयम् उपहासपात्रः न भवेत् । शिष्यस्य उत्थाने उपवेशन प्रश्नकरणादिसर्वव्यवहारेषु शिक्षकेण साकम् उचितशिष्टाचारस्य पालनं कुर्यात् ।

उत्तराध्ययनसूत्रेषु विनीतछात्रस्य निम्नाङ्कितानि १५ लक्षणानि कथितानि वर्तन्ते । तानि यथा-

१) गुरुजनैः साकं विनम्रतया वार्तालापं कुर्यात् ।

२) तेषामपेक्षया अधस्ताद् उपवेशनेऽपि चापल्यं न प्राप्नुयात् ।

३) निष्कपटभावेन व्यवहारः कर्तव्यः ।

४) परिहासः न करणीयः एवमस्मिन् अनावश्यक रुचिं न प्राप्नुयात् ।

५) गुरूजनानाम् अपमानं न कुर्यात् ।

६) कलहोत्पादकव्यवहारं न कुर्यात् अर्थात् कलहप्रकृतिः न भवेत् ।

७) मित्रत्वस्य निर्वाहः कार्यः ।

८) ज्ञानप्राप्तौ गर्वोन्मत्तः न भवेत् ।

९) गुरुजनदोषान् न पश्येत् ।

१०) मित्राणामुपरि क्रोधं न कुर्यात्

११) अप्रियमित्रादपि गुणः ग्राह्यः, तथा परोक्षेऽपि तस्य प्रशंसां कुर्यात् ।

१२) वाग्युद्धशारीरिकयुद्धाभ्यां दूरे भवितव्यम् ।

१३) शिष्टाचारपालनमावश्यकम् ।

१४) आवश्यकादरः स्थापनीयः ।

१५) इन्द्रियाणां नियन्त्रणमावश्यकम् ।

उपर्युक्त सूचीपठनेन एवं ज्ञायते यत् जैनदर्शने छात्रव्यक्तित्वस्य समादरः क्रियते चेदपि तस्य पूर्णसमर्पणस्य अपेक्षा वर्तते । उपर्युक्तच्छात्रलक्षणानि आधुनिकमनोवैज्ञानिकशिक्षणप्रक्रियायाः अनुकूलानि न भवन्ति । विनीतशिष्यस्य यत् स्वरूपं जैनदर्शने दत्तमस्ति तद्, अधिनायकवादिसामाजिकव्यवस्थायां समीचीनं भवति चेदपि लोकतान्त्रिकशिक्षणप्रक्रियायां स्वाभाविकजिज्ञासा, वादविवादः, पारस्परिकव्यवहारे निर्भीतिः इत्यादिविषयाः अविनयस्य चिह्नानि इति न मन्यन्ते, अपि तु शिष्यस्य सहजगुणाः मन्यन्ते ।

**गुरोः स्वरूपम् -**

छात्रे विद्यमानस्तरभेदवत् शिक्षकेष्वपि स्तरद्वयं वर्तते । यः छात्रेषु अनुशासनम् एव चरित्रनिर्माणं पश्यति सः आचार्यः इति । एवं द्वितीयशिक्षकः यः

अध्ययनाध्यापनकार्यं करोति सः उपाध्यायः इति उच्यते। अध्यापककार्यार्थं लक्षशः शिक्षकाः आवश्यकाः । एतावदुत्कृष्टचरित्रवताम् अधिकसंख्याकानां शिक्षकाणां लब्धिः अत्यन्तकठिना भवति। भारतीयदर्शने एतत् मन्यते यत् यस्य चरित्रं निष्कलङ्कं न भवति सः शिष्याणां कृते सच्चरित्रस्य शिक्षां दातुं न शक्नोति । आचरणदृष्ट्या पूर्णशिक्षकाः केचन एव लभ्यन्ते, परन्तु शिक्षार्थिनः अनेके वर्तन्ते, येषां शिक्षणम् अत्यावश्यकम्। जैनदर्शने आध्यात्मिकशिक्षायाः इव व्यावहारिकशिक्षायाः अपि महत्त्वं दत्तमस्ति। तत्तच्छाखायां निष्णातत्वं प्रत्येकमध्यापकस्यापि कदाचिद् दुर्लभम्। अतः अनेकविशेषज्ञाः शिक्षकाः आवश्यकाः। एतादृशैः सर्वव्यावहारिक कारणैः शिक्षकेषु द्विधा विभागः कर्तव्यः। उपाध्यायः स्वस्य विषये निष्णातः स्यात्। एवं छात्रभ्रमाणां शङ्कानाञ्च समाधाने समर्थः स्यात् । उपाध्यायेषु निम्नाङ्कितगुणाः अपेक्षिताः वर्तन्ते ।

१) उपाध्यायः शास्त्रस्य विशिष्टशाखायां निष्णातः स्यात्। एवम् अन्यज्ञानशाखास्वपि अनभिज्ञो न स्यात् नाम अन्यविषयेषु सामान्यज्ञानं भवेत् ।

२) अध्यापकस्य अध्यापनशैली एवं भवितव्या यत् छात्राणां शङ्कानां निवारणं कुर्यात्, तद्वारा अध्यापितविषयः छात्रैः आत्मसात्कृतो भवेत् ।

३) अस्याचरणं सामान्यमनुष्यापेक्षया उन्नतरूपेण स्यात् । एवं छात्रैः अनुकरणीयं स्यात्।

आचार्यः सदाचारस्य प्रतीकः भवति अतः अस्य चरित्रं निष्कलङ्कं भवेत्। अतः आचार्यः निम्नाङ्कितगुणैर्युक्तो भवेत् ।

१) पञ्चमहाव्रतानि तस्य जीवनस्य अङ्गरूपेण स्युः । सर्वतो भावेन महाव्रतानां पालनकर्ता स्यात्।

२) आचारदृष्ट्या तस्य आचरणं समाजसम्मतं धर्मसम्मतञ्च स्यात् । अयं सदाचरणस्य मूर्तिः भवेत् ।

३) अस्य इन्द्रियाणामुपरि नियन्त्रणं भवेत्। अर्थात् अयं जितेन्द्रियः स्यात्।

४) तेन चतुर्णां कषायाणां, नाम क्रोध- मान- माया लोभादीनां सर्वथा त्यागः अपेक्षितः।

५) अयं सर्वान् कामान् त्यक्त्वा ब्रह्मचारी भवेत् ।

६) जीवनस्य व्यवहारः मनसा, वचसा कर्मणा च संयमितः स्यात् ।

७) चलनं, भ्रमणं, कथनं , भोजनकरणम् इत्यादि सर्वजीवनव्यवहारेषु सतर्कतायाः अवलम्बनं कुर्यात् ।

८) आचरणे ज्ञाने वाण्यां शरीरे बुद्धौ इति सर्वासु दृष्टिषु तस्य व्यक्तित्वं प्रभावशालि स्यात् । किमर्थम् इत्युक्तौ सः शिक्षार्थिनां श्रद्धापात्रं भवेत् । अन्यथा छात्रान् अनुशासितुं न शक्यते ।

**पाठ्यांशः -**

जैनदर्शने ज्ञानस्य अत्यन्तं महत्त्वपूर्णस्थानं दत्तमस्ति । दशमकालिकसूत्रेषु उक्तमस्ति यत् -'मनुष्येण प्रथमतः ज्ञानं प्राप्तव्यम् । तदा सः अहिंसापालनं कर्तुं शक्नोति । अज्ञानिव्यक्तिः पापपुण्ययोः, करणीयाकरणीययोः भेदं न जानाति । तदा समीचीनरूपेण आचरणं सः कथं कर्तुं शक्नोति ।'

जैनदर्शने आत्म-जगतोः वास्तविकता स्वीकृता वर्तते । अतः शैक्षिकपाठ्यक्रमे सांसारिकाध्यात्मिकयोः उभयोः विषययोः उचितं स्थानं प्रदातव्यमस्ति । जगत्सम्बन्धिनी या व्याख्या जैनानां षड्द्रव्यनिरूपणे मिलति , तस्यां वैज्ञानिक-आध्यात्मिकतयोः उचितः समन्वयः द्रष्टुं शक्यते। जगतः इयं व्याख्या एकत्र याथार्थ्यं वहति अन्यत्र आदर्शयुक्ता वर्तते । पुद्गलजीवयोः, आत्मजगतोः सत्यत्वं नित्यत्वञ्च अङ्गीकृतमपि एका उच्चादर्शजीवनस्य परिकल्पना कृता वर्तते । जैनपाठ्यक्रमे एकत्र अस्य जगतः वास्तविकज्ञानम्, जीवनस्योत्कर्षाय तस्य रहस्यानाम् उद्घाटनम्, एवं जीवनस्य सौकर्याणाम् अन्वेषणाय तस्योपयोगश्च कर्तुं आग्रहः कृतः। द्वितीयन्तु समीचीनजीवनरक्षणार्थं तथा सौकर्यमाध्यमेन भविष्यत्क्लेशानां त्यागकरणेऽपि आग्रहः प्रदर्शितः ।

पाठ्यक्रमीयविषयाणां विवेचनकरणात् प्राक् जैनानां षड्द्रव्यनिरूपणस्य संक्षिप्तपरिचयः आवश्यकः । जैनदर्शनं यथार्थवादि (Realist) तथा बहुसत्तावादि (Pluralist) वर्तते । अस्य मतानुसारं जगतः अन्तिमसत्ता किमपि एकतत्त्वं नास्ति - न ब्रह्म, न प्रकृतिः, न किमपि भौतिकतत्त्वम्। जैनमतानुसारम् जगदिदम् अनेकद्रव्याणां मिश्रणात् उदभूतम्। द्रव्याणि मुख्यतः श्रेणीद्वयरूपेण विभक्तुं शक्यन्ते । तयोर्मध्ये एकं द्रव्यं जीवः, द्वितीयम् अजीवः । प्रत्येकं सजीवद्रव्यं शरीरम् आत्मा इति द्वाभ्यां तत्त्वाभ्यां निर्मितं भवति। अजीवतत्त्वं पुनः पञ्चभागेषु विभक्तं

भवति । कैश्चित् अजीवतत्त्वैः अथवा जडतत्वैः शरीरस्य, अस्य वास्तवजगतः च निर्माणं भवति । तत्त्वान्तरेण बाह्यपरिस्थितेः निर्माणं भवति ।

षड्तत्त्वानां वर्गीकरणम् एवं भवति । द्रव्ये प्रथमतया द्वौ विभागौ वर्तेते - अस्तिकायः अनस्तिकायः इति । कालातिरिक्तानां सर्वद्रव्याणाम् अस्तित्वं शरीरवत् आकाशे वर्तते । कुत इत्युक्तौ कालः स्थानबद्धः न भवति । दृष्टिगोचरः न भवति, परन्तु अनुमानात् अस्य सिद्धिः भवति । अन्येषां सर्वेषां द्रव्याणां भविष्यत् परिणामः, क्रिया, नवीनता, प्राचीनता, परिवर्तनं च, कालस्य कारणात् सम्भवति । कालः एकम् अखण्डद्रव्यं भवति , अतः अयमस्तिकायेषु नान्तर्भवति । अस्तिकायेषु पुनः जीवाजीवभेदेन द्वौ भेदौ वर्तेते । जीवात्मनः निवासस्थानं रङ्गस्थली च इदं जगत् भवति, यत् कालातिरिक्त -चतुष्प्रकारैः अन्याजीवतत्त्वैः निर्मितं भवति । जगतः प्राथमिकतत्त्वं पुद्गलः भवति, यस्य संयोगः विभागश्च भवितुमर्हति । पुद्गलस्य अत्यल्पभागः परमाणुः इति कथ्यते । द्वयोः अथवा तदधिकपरमाणूनां संयोगात् संघातः भवति । पुद्गलस्य चत्वारः गुणाः वर्तन्ते - स्पर्शः, रसः, गन्धः, रूपश्च । एते गुणाः परमाणुषु संघातेषु च वर्तन्ते । जडपदार्थस्य (पुद्गलस्य) जीवानाञ्च स्थानप्रदानकरणतत्त्वस्य आकाशः इति नाम। द्रव्यानां शरीरिकविस्तारः आकाशद्वारैव सम्भवति । धर्मः जीवपद्गलयोः गतिप्रदानं करोति, तथा अधर्मः उभयोः स्थिरतां ददाति । अस्माकं चलनं, भ्रमणं, मत्स्यानां तरणं, वायोः अग्रे गमनं, प्रकाशस्य व्यापकता च धर्मद्रव्यकारणात् भवति। एवं गतिशीलवस्तुनां निरोधनरूपकार्यम् अधर्मस्य भवति । जैनमतानुसारं जीवः सदा नित्यः भवति, संसारस्तु नित्यः अनित्योऽपि भवति । प्रत्येकं वस्तुनि द्वे लक्षणे स्तः - स्वरूपलक्षणं गुणलक्षणञ्च । स्वरूपलक्षणस्य दृष्ट्या संसारः नित्यः भवति कुत इत्युक्तौ षट् तत्त्वानि सदा भवन्तीति । परन्तु गुणलक्षणदृष्ट्या एतेषु परिवर्तनं सर्वदा भवति, अतः संसारः अनित्योऽपि । अयं विचारः शरीरधारिमनुष्ये द्रष्टुं शक्यते। मनुष्यस्य आत्मा नित्यो भवति । अस्य शरीरं परिवर्तते, अतः अनित्यं भवति । षड्द्रव्याणां संक्षेपविवेचनानन्तरं पाठ्यक्रमस्य विवेचनं युज्यते जैनमतानुसारं पाठ्यक्रमीय विषयाणां वर्गीकरणं निम्नाङ्कितरूपेण भवति

## पुद्गलस्य अध्ययनम्

अस्मिन् भौतिकविज्ञानस्य अध्ययनमपि आयाति । भौतिकविज्ञानं न केवलम् अस्य भौतिकजगतः सूक्ष्मतायाः अवगमने सहायकं भवति, अपि तु भौतिकजगता साकं मनुष्यस्य सामञ्जस्यसम्पादनेऽपि सहायकं करोति । भौतिकपदार्थानां संघातात्, एवं मनुष्यस्य अध्यवसायस्य फलस्वरूपेण नवनिर्माणं भवति। अतः यान्त्रिकीविद्या विभिन्नप्रकारकशिल्पादि-कलाकौशलानामध्ययनं पुद्गलाध्ययनान्तर्गतत्वेन आयाति।

पुद्गलस्याध्ययनं स्थितिविज्ञानरूपेण (Statics) गतिविज्ञानरूपेण (Dynamics) च कर्तुं शक्यते । जैनदर्शने एतयोः धर्माधर्मौ इति व्यवहारः। पुद्गलस्य समावेशः एवं विस्तारः आकाशे अथवा शून्ये भवति । अतः शून्यविज्ञानस्य (Space-Science) अध्ययनमपि जगतः अध्ययने सम्मिलितं भवति । एतस्य अन्तर्गतत्वेन ब्रह्माण्डस्य अध्ययनमपि भवति । सर्वेषां जीवनां शरीरं पुद्गलेन निर्मितं भवति । तस्मात् शरीरं भविष्यं परिवर्तनं पौद्गलिकपरिवर्तनम् इत्युच्यते । मनुष्यशरीरस्य, अन्यप्राणिनां बाह्यशरीरस्य च भविष्यत्परिवर्तनानाम् अध्ययनमपि अस्मिन्नन्तर्गतं भवति । द्वि-त्रि-चतुर-इन्द्रियैः युक्तानां कीटक लूता पतङ्गादीनां शरीररचनायाः अध्ययनमपि पुद्गलस्य अध्ययनत्वेन गण्यते । जैनदर्शने वनस्पतिषु भूमौ, अग्नौ, जले वायौ च जीवः अङ्गीक्रियते । तथा तेषां शारीरिकसंरचनायाः कल्पनाऽपि कृता वर्तते । उक्ततत्त्वानाम् अध्ययनमपि शिक्षाक्रमस्य आवश्यकं भवति । कालस्य अध्ययनान्तर्गतत्वेन इतिहासः, सामाजिकपरिवर्तनं, भौतिकपरिवर्तनम् इत्यादीनां समावेशः भवति । जैनदर्शने कालद्रव्यस्य स्वतन्त्ररूपेण अध्ययनमपि महत्त्वं वहति।

## आत्मनः अध्ययनम्

मनुष्यस्य आत्मा मनुष्यस्य अन्यप्राणिभिः साकं सम्बन्धः, मनुष्यस्य प्राकृतिकवातावरणे, मानवीयवातावरणे च स्थानं, मानवीयसंस्थाः आत्मानं शरीरेण साकं बन्धनकरणतत्त्वानि, मनोविज्ञानं, मनुष्यस्य धर्मः, नैतिकजीवनं, मनुष्यस्य कर्तव्यानि, मनुष्यस्य भाग्यम् इत्यादिविषयाणां समावेशः जीवस्य अध्ययने भवति । यद्यपि रायपसेनी सूत्रेषु कलायाः शिल्पस्य च उल्लेखो लभ्यते, परन्तु इयं प्रतीतिः वर्तते यत् जैनपाठ्यक्रमे एतयोः स्थानं न परिगणितं वर्तते । जैनपाठ्यक्रमस्य

एकमात्रमुद्देश्यमस्ति यत् एतादृशविषयान् उद्दिश्य छात्रेभ्यः ज्ञानप्रदानं कर्तव्यं येन छात्राः ज्ञात्वाऽज्ञात्वा वा कठिनरूपेण अहिंसायाः पालनं कुर्युः । जैनदर्शने जीवान्तर्गतत्त्वेन सर्वपदार्थानां समावेशः भवतीत्यतः जीवरक्षा प्रत्ययोऽपि विस्तृतं भवति । यावत् द्रव्याणां पूर्णरूपमध्ययनं न भवति तावत् जीवरक्षा न सम्भवति । द्रव्याणां सम्बन्धज्ञानमेव सम्यग्ज्ञानमिति उच्यते । सम्यग्ज्ञानप्राप्त्यनन्तरं सम्यग्चरित्रस्य पालनं कर्तुं शक्यते । जैनैः प्रोक्त प्रमाणज्ञानस्य व्याख्या एतद् वचनं स्पष्टीकरोति, यत् जीवनस्य औन्नत्यं ददाति तत् प्रमाणज्ञानमिति मन्यते । ज्ञानस्य स्वयं महत्त्वं न भवति यदि अनेन उत्कृष्टचरित्रस्य निर्माणं न भवति ।

**शिक्षणप्रक्रिया**

जैनदर्शने ज्ञानस्य पञ्चप्रकारैः वर्णनं कृतमस्ति । तानि क्रमेण मतिज्ञानं , श्रुतिज्ञानम् , अवधिज्ञानं, मनःपर्यायज्ञानं तथा कैवल्यज्ञानमिति ।

मतिज्ञानं साधारणज्ञानं भवति, यत् इन्द्रियमाध्यमेन उत्पन्नं भवति । एतदेवान्यभारतीयदर्शनेषु प्रत्यक्षज्ञानमिति कथ्यते । यदा केनचित् पदार्थेन साकम् अस्माकं ज्ञानेन्द्रियस्य सम्पर्कः भवति, पुनः मनसः विश्लेषणादिक्रियाद्वारा अस्माकं पदार्थविशेषस्य बोधो भवति, तदेव वयं मतिज्ञानमिति व्यवहरामः । मतिज्ञानं प्रत्यक्षज्ञानमिति वस्तुनिश्चितबोधः (Definite Cognition) इति च कथ्यते ।

**मतिज्ञानम्-**

मतिज्ञानस्य उत्पत्तेःपूर्वम् अस्माकं यत् 'दर्शन ' भवति तद् आधुनिकमनोविज्ञाने संवेदनम् (Sensation) इति कथ्यते । प्रथमदर्शने सूक्ष्मविवरणं न भवति, किन्तु ज्ञाने तदुपतिष्ठते । दर्शनेन साधारणबोधो भवति। परन्तु ज्ञानं निश्चितज्ञानं भवति, यत् संज्ञानात्मकबोधः(Cognitive understanding) इति व्यवह्रियते । सर्वदर्शनसंग्रहे दर्शनस्य परिभाषा एवं दत्ता वर्तते - " वस्तूनां सामान्यगुणानां यः बोधः यस्मिन् विशेषगुणानामभावः भवति एवं सूक्ष्मविवरणस्य ग्रहणं न भवति तत् दर्शनमित्युच्यते । दर्शनस्य अथवा संवेदनज्ञानस्य पञ्च अवस्थाः वर्तन्ते । "

**१) व्यञ्जनावग्रहः** - अस्यां स्थितौ इन्द्रियाणां परिधौ विद्यमाननाडीनामुपरि (सिराणामुपरि) उद्दीपकपदार्थस्य प्रभावः पतति, तद्द्वारा विषयेण साकं विशेषसम्पर्कः भवति ।

**२) अर्थावग्रहः** - अस्यां स्थितौ चैतन्यमुद्दीप्तं भवति । तथा संवेदनायाः प्रतीतिर्भवति । अत्र ज्ञातुः कृते पदार्थमुद्दिश्य केवलं प्रतीतिमात्रं भवति । एषैव मनोविज्ञानभाषायां पदार्थस्य संवेद्यता (Sensing the Object) इत्युच्यते ।

**३) ईहा** - अस्यां स्थितौ मनः ज्ञेयवस्तुनः विवरणं ज्ञातुम् अभिलाषं करोति तथा अन्यवस्तुभिः साकं ज्ञेयवस्तुनः समानतां भिन्नताञ्च अवगन्तुमिच्छति ।

**४) अवायः** - अस्यां स्थितौ वर्तमानविषयस्य अतीतस्य च पुनः पुष्टिर्भवति । ज्ञेयवस्तुनः परिचयः लभ्यते, यथा अयं पदार्थः अमुकः, अमुकः नास्ति इति ।

**५) धारणा** - अस्यां स्थितौ अस्माकं संवेदना पदार्थानां गुणप्रकाशं करोति । अस्य परिणामेन एकप्रकारानुभवः भवति, येन कारणेन वयम् अनन्तरकाले पदार्थानां स्मरणं कर्तुं शक्नुमः ।

उदाहरणेनैकेन उपयुक्तस्थितीनां स्पष्टतां कुर्मः । यथा वयं यत् किमपि ध्वनिं शृण्मः परन्तु तदानीम् अयं ध्वनिः कस्य इति ज्ञानं प्रथमतया न भवति , अयमेव अवग्रहः । तदा मनसि अयं प्रश्नः भवति अयं ध्वनिः कस्य वस्तुनः इति इयमेव ईहा भवति । अनन्तरं निश्चयः भवति यत् अयं ध्वनिः अमुकवस्तुसम्बन्धी इति । अस्यैव अवायः इति नाम । अनेन प्रकारेण मनसि यत् ज्ञानं प्राप्तं तत् मनः स्थिरीकरोति, इयमेव धारणा इत्युच्यते ।

आधुनिकमनोविज्ञानेऽपि संवेदनायाः एतादृशं विश्लेषणं किञ्चित् व्यत्यासेन प्राप्तं भवति। जैनदर्शनं "यथार्थवादी" इत्यतः एवं मन्यते पदार्थः मनसो बहिरपि यथार्थतया तिष्ठति । ज्ञातुः परमपि वस्तूनां यथार्थसत्ता अस्ति, यत् इन्द्रियैः अवबुध्यते । एवं बुद्धिद्वारा ग्रहणं क्रियते । ज्ञानप्रक्रियायां ज्ञेयपदार्थेषु किमपि परिवर्तनं न भवति ।

जैनदर्शने मति- ज्ञानान्तर्गतत्वेन तादृशस्य सर्वस्य ज्ञानस्य समावेशः क्रियते, यत् इन्द्रियानुभूतज्ञानम् (Empirical knowledge) इति कथ्यते ।

इन्द्रियवस्तुनोः प्रत्यक्षसम्पर्कात् यत् ज्ञानप्राप्तिः भवति सैव उपलब्धिः अथवा प्रत्यक्षज्ञानमिति कथ्यते । पदार्थसम्बन्धि एतत् ज्ञानं स्पष्टं त्रुटिरहितं निश्चितञ्च भवति । उदा- नेत्राभ्यां दृष्ट्वा. एवं कराभ्यां स्पृष्ट्वा उत्पीठिकायाः ज्ञानप्राप्तिः । समानेषु अथवा विषमवस्तुषु मध्ये विद्यमानस्य ज्ञेयवस्तुनः परिचायनम् संज्ञायाः अन्तर्गतत्वेन

आयाति। उदाहरणार्थं आकाशवाणि–दूरदर्शन–काचपेटिकाः प्रदर्श्य दूरदर्शनं किमिति पृष्टे सति दूरदर्शनस्य यथार्थावगम एव संज्ञा अथवा प्रत्यभिज्ञानम् इत्युच्यते । यदा समीपे वस्तुनः उपस्थितिः न भवति एवं ज्ञानेन्द्रियैः वस्तुनः प्रत्यक्षसम्पर्कः न भवति तदा सादृश्यवस्तु-दर्शनेन पूर्वानुभूतस्य पदार्थस्य ज्ञानमेव स्मृतिज्ञानमित्युच्यते । उदाहरणार्थं बहुकालानन्तरम् एकं पुरुषम् अन्यत्र दृष्ट्वा स्मृतिद्वारा तस्य परिचयप्राप्तिः स्मृतिज्ञानमिति कथ्यते । केनापि हेतुना साधनेन वा अन्यवस्तुनः ज्ञानप्राप्तिरेव अनुमानविधिः इति कथ्यते। उदाहरणानामाधारेण निष्कर्षं सम्पाद्य अनुमानं कर्तुं शक्यते अथवा यस्याः कस्याः उपपत्तेः उदाहरणद्वारा प्रमाणीकरणम् । उदाहरणार्थं मेघं दृष्ट्वा वृष्टेः पूर्वानुमानकरणं एतादृशं ज्ञानं भवति। मतिज्ञानस्य विधेः प्रयोगः आधुनिकशिक्षाप्रणाल्यां कृतः वर्तते । भाषाध्यापने शब्दज्ञानं प्रत्यक्षप्रणालीद्वारा करणीयावश्यकता वर्तते । प्रारम्भिकप्रत्ययः वस्तुनाम्नोः प्रत्यक्षसाहचर्यात् निर्मीयते । अनन्तरम् आनुषङ्गिकप्रत्ययः (Secondary) अन्यविधिद्वारा अपि भवितुमर्हति । प्रयोगशालायां विज्ञानस्य अध्यापनेऽपि प्रत्यक्षविधेः प्रयोगः अनिवार्यः भवति । सामाजिकाध्ययनेऽपि अवलोकनविधेः प्रयोगः अस्यां प्रणाल्याम् अन्तर्गतत्वेन आयाति । गणितस्य प्रारम्भिकप्रत्ययः गणनं, संकलनं, व्यवकलनं, गुणीकरणं, हरणं, प्रारम्भिकरेखागणितम् इत्यादीनाम् अध्यापनेऽपि प्रत्यक्षप्रणाल्याः प्रयोगकरणं वाञ्छनीयमिति मन्यते । प्रत्यक्षपदार्थस्य स्थाने प्रतिकृतीनां चित्रादीनां प्रयोगोऽपि प्रत्यक्षप्रणाल्याः अङ्ग भवति ।

अधीतज्ञानस्य परीक्षणं द्विधा कर्तुं शक्यते अधीतसामग्र्याः परिचयेन प्रत्यभिज्ञान (Recognition) द्वारा वा । द्वितीयं स्मृति (Recall) द्वारा । ज्ञानस्य एतत् व्यवहारपरिवर्तनद्वयम् अस्माकं परिक्षाप्रणाल्याम् अभिन्नाङ्गत्वेन स्वीकृतं वर्तते । संज्ञा(प्रत्यभिज्ञानम्) एवं स्मृतिः (प्रत्यास्मरणम्) अनयारुभयोः प्रयोगः छात्राणां ज्ञानपरीक्षणार्थमेव न किन्तु ज्ञानस्य स्थिरीकरण(Reinforcement) अपि भवति । बहुवैकल्पिकप्रश्नाः(Multiple choice Questions) प्रत्यभिज्ञानान्तर्गताः भवन्ति । दीर्घप्रश्नानामुत्तरदानं स्मृतौ अन्तर्भवति । सर्वप्रकारकज्ञानं प्रत्यक्षविधिना दातुं नैव शक्यते । परन्तु प्रत्यक्षज्ञानाधारेण अज्ञातज्ञानमपि अनुमातुं शक्यते । एवम् अनुमितस्य प्रामाण्यसम्पादनाय प्रत्यक्षद्वारा तस्य सत्यापनं

(Verification) कर्तुं शक्यते । माध्यमिककक्षापर्यन्तम् बहुविधज्ञानं तर्कविधिना अवश्यं दातव्यं भवति। विधिविज्ञान-सामाजिकाध्ययन- भाषागणितादि सर्वविषयेषु निहितं ज्ञानं तर्कविधिना प्रचुरतया प्रयोगे आनेतुं शक्यते। गणितस्य संश्लेषण-विश्लेषणविधिः, हिन्दीभाषायाः उपमानविधिः, समाजशास्त्रस्य चर्चाविधिः, विज्ञानपाठने आगमन-निगमनविधिः, इत्यादिविधयः सर्वेऽपि तर्कप्रणाल्याम् अन्तर्गताः भवन्ति ।

**श्रुतिज्ञानम्**

श्रुतिज्ञानम् अथवा शब्दज्ञानम् इति ज्ञानं लक्षणेभ्यः, प्रतीकेभ्यः, एवं शब्देभ्यः प्राप्तं भवति । मतिज्ञानं प्रत्यक्षपरिचयेन मिलति, परन्तु श्रुतिज्ञानं वर्णनात् उपलभ्यते। जैनदर्शने श्रुतिज्ञानं चतुर्धा विभज्यते ।

श्रुतिज्ञानम्

लब्धिः (साहचर्यद्वारा ज्ञानम्)
भावना (ध्यानेन ज्ञानप्राप्तिः)
उपयोगः (अर्थ-ग्रहणम्)
नयः ( वस्तूनां तात्पर्यस्य विभिन्नपक्षाः)

लब्धेः अन्तर्गतत्वेन द्वयोः शब्दयोः अथवा उभयोः घटनयोः साहचर्यस्थापनं भवति, यथा अश्वसाहचर्यात् अन्यजन्तूनां परिचयः अथवा अश्वसम्बन्धकार्यव्यापाराणां ज्ञानम् । भावनान्तर्गतरूपेण कर्ण्यविषयस्योपरि चिन्तनं मननञ्च आयाति । केवलं श्रवणमात्रेण साहचर्यं भवति परन्तु श्रुतविषयाणां सुचारु रूपेणावगमनार्थं मननम् आवश्यकं भवति । उपयोगे गृहीतज्ञानस्य एतादृशरूपेण समीचीनबोधनमावश्यकं यत् अस्य वास्तविकपरिस्थितिषु उपयोगः कर्तुं शक्यते । यथा गोधूमस्य बीजावापविधिं पठित्वा तस्य परिणामरूपेण वापक्रियां कर्तुं शक्नोति चेत् तज्ज्ञानस्य अर्थग्रहणं जातम् । नयान्तर्गतत्वेन वस्तून्यधिकृत्य नानापक्षाणामध्ययनमायाति । अस्य विस्तृतविवेचनं पृथग्रूपेण कृतमस्ति । सर्वे शिक्षाशास्त्रज्ञाः सर्वं ज्ञानं प्रत्यक्षप्रणालीद्वारैव न भवति इत्यङ्गीकुर्वन्ति । मानवजातिद्वारा युगयुगान्तरेभ्यः सञ्चितज्ञानराशिः पुस्तकानाम् एवं व्याख्यानादिमाध्यमेन छात्रपर्यन्तं नेतव्यं वर्तते। जीवनस्य अल्पावधौ सञ्चितज्ञानराशेः प्रत्यक्षद्वारा अध्ययनमसम्भवं

भवति। ज्ञानं निरन्तरमेधते। एवं सञ्चितज्ञानं नूतनानुक्रमिकस्तरपर्यन्तं हस्तान्तरीकरणे एकमात्रविधिः भवति श्रुतिविधिः । पुस्तकानामध्ययनं व्याख्यानं, चर्चादि प्रणाल्यः श्रुतिविधौ अन्तर्भवन्ति । दौर्भाग्यात् शिक्षाप्रणाल्यां केवलशब्दप्रणाली एव अवतिष्ठते, तथा प्रत्यक्षप्रणाल्याः उपेक्षया काठिन्यं च भवति । श्रुतिविधेः यथोचितोपयोगः सदा भवति, भविष्यति च, परन्तु अस्य स्वरूपे परिवर्तनं जायते । अद्य आकाशवाणी, दूरदर्शनी, अभिक्रमिताध्ययनं, पत्राचारः इत्यादिद्वारा अध्ययनम् अस्यां प्रणाल्याम् आगतविभिन्नपरिणामाः भवन्ति। विद्यालयीय-अध्यापनप्रणालीदृष्ट्या मतिश्रुतिज्ञानविध्योः मेलनं भवति। एतदनन्तरं जैनाः ज्ञानमुद्दिश्य त्रेधा उल्लेखम् अकुर्वन् । एतानि उच्चतरज्ञानानि साधनातः प्राप्तव्यानि ।

**अवधिज्ञानम्**

देशकालपरिधिं त्यक्त्वा यत् इन्द्रियातीतज्ञानं प्राप्तं भवति तदवधिज्ञानम् । एतद् ज्ञानम् असाधारणदृष्टिद्वारा अतीन्द्रियरूपेण भवति । अस्य ज्ञानस्य उत्पत्तिः तदा भवति यदा ज्ञातुः कर्म न्यूनतां याति । तदा ज्ञाता देशकालातिरिक्तरूपेण पौद्गलिकसीमातिरिक्तरूपेण द्रष्टुं शक्नोति । जैनमतानुसारं कर्मापि पुद्गलनिर्मितं भवति । अनेन कारणेन वयम् इन्द्रियैः सीमितज्ञानमेव प्राप्तुं शक्नुमः, परन्तु कर्मपुद्गलः यदा न्यूनो भवति । तदा कालदेशादिसीमाम् अतिक्रम्य दूरपर्यन्तं द्रष्टुं शक्यते ।

**मनःपर्यवज्ञानम्**

मनः पर्यवज्ञानस्य प्राप्तिद्वारा वयम् अन्यव्यक्तीनां वर्तमानातीतविचाराणाम् एवं मनोभावानां ज्ञानं प्राप्तुं शक्नुयाम । जैनमतानुसारं चत्वारः प्रमुखदोषाः (क्रोधः, मानं , माया, तथा लोभः) प्राणिनां मध्ये अन्तरमुत्पादयन्ति। एते कषायाः अपि पुद्गलनिर्मिताः सन्ति । यदा कषायाणां न्यूनता भवति अथवा नाशो भवति तदा वयम् अन्यव्यक्तीनाम् अन्तरं प्रविश्य तेषां मनोभावान् ज्ञातुं शक्नुमः। एतादृश-मनःपर्यवज्ञानस्य क्षणिकं रूपम् अस्माकं जीवने अनेकपर्यायं द्रष्टुं शक्यते। वयं टेलिपथिद्वारा अन्येषां विचारं ज्ञात्वा तदनुरूपम् अस्माकं व्यवहारे परिवर्तनम् आनयामः ।

**कैवल्यज्ञानम्**

कैवल्यज्ञानमेव परिपूर्णज्ञानं भवति । अनेन सर्वद्रव्याणां तेषां पर्यायाणाञ्च सम्पूर्णज्ञानं भवति । यस्य एतत् ज्ञानस्य प्राप्तिः भवति सः देशकालविषयाणां

सीमातिरिक्तः सर्वज्ञः भवति । सः कर्मबन्धनात् स्वयं मुक्तो भवितुमर्हति । कैवल्यज्ञानप्राप्त्यनन्तरं ज्ञाता, ज्ञेयः तथा ज्ञनमिति पार्थक्यस्य समाप्तिर्भवति, तथा सम्पूर्णव्यक्तित्वं ज्ञानमयं भवति । जैनागमेष कैवल्यज्ञानस्य व्याख्या एवम् अकृत। कैवल्यज्ञानस्य एक एव भेदा वर्तते । तत् सर्वद्रव्याणाम् उत्पत्ति-विनाश-स्थिरतानां, पारस्परिकपदार्थानां भिन्नतायाः परिचयप्रदाने कारणभूतं भवति । एवं प्रकारेण ज्ञेयपदार्थस्य अनन्तत्वात् अमुम् अनन्तमित्यपि वदन्ति । एतत् शाश्वतं भवति ।

**जैन-नयः**

ज्ञानं दृष्टिद्वयेन द्रष्टुं शक्यते । येन रूपेण पदार्थः तेन रूपेणैव ज्ञानप्राप्तिः प्रमाणमित्युच्यते। परन्तु पदार्थस्य येन केनापि सम्बन्धविशेषेण साकं ज्ञानप्राप्तिः नयः इति कथ्यते । नयः एकः दृष्टिकोणः भवति, येनाधारेण वयं पदार्थमुद्दिश्य किमपि वदामः। वयं पृथक्करणप्रक्रियाद्वारा अस्माकं दृष्टिकोणानां परिभाषां भेदश्च कुर्मः । पूर्वोक्तदृष्टिकौणैः साकम् अस्मदीयाः काश्चन कल्पनाः सम्मिलिताः सन्ति । एतेषां पृथक्करणेन तथा लक्ष्यविषयाणामुपरि ध्यानदानकारणात् ज्ञाने सापेक्षता आयाति । वयम् एकस्य दृष्टिकोणस्य निषेधं कुर्मः इत्यनेन यस्य कस्यापि विशेषदृष्टिकोणस्य स्वीकरणमिति आशयो न भवति। यथार्थसत्तायाः सामान्यस्वरूपम् अस्माकं पुरतः नानाविध-आंशिकमतरूपेषु भवति । पृथिव्याः स्थिरत्वकथनमपि एकस्मात् दृष्टिकोणात्, तावत् सत्यं भवति यावत् पृथिवी अस्थिररूपेण मन्यते । चक्षुषा दृश्यमाणपृथिवी स्थिरा भवति, परन्तु अस्याः परिवर्तनीयपक्षदृष्ट्या पश्यामश्चेत् इयमस्थिरा भवति । ज्ञानस्य इमं सापेक्षवादं सप्तभङ्गीन्यायद्वारा बोधनं प्राचीनजैनपरम्परायां वर्तते। एतदेव जैनदर्शने 'स्याद्वादः' इत्युच्यते । सप्तभङ्गीन्यायस्य तात्पर्यम् एवं भवति, यत् यस्य कस्यापि वस्तुनः अथवा तस्य गुणानां विषये कथनार्थं सप्तप्रकारकदृष्टिकोणाः भवति । सप्तप्रकारकंकथनमपि तत्तद् दृष्टिकोणात् सत्यं भवति ।

१) स्यादस्ति घटः(घटः अस्ति) अर्थात् मृन्निर्मितः घटः मम समीपे अस्मिन् क्षणे विद्यते।

२) स्याद् नास्ति घटः (घटः नास्ति) अर्थात् लोहादि धातुना निर्मितघटः , भिन्नस्थाने (प्रकृतमृन्मयघटे) , भिन्नाकारे वा न विद्यते ।

३) स्यादस्ति नास्ति घटः(घटः अस्ति एवं नास्ति च ) अर्थात् एकस्मिन् विशेषेऽर्थे घटः अस्ति, अन्यस्मिन् विशेषेऽर्थे घटः नास्ति ।

४) स्याद् अवक्तव्यः (घटः अकथनीयः) अर्थात् यद्यपि घटे तस्य रूपाधारेण उपस्थितिः तथा अन्यस्वरूपाधारेण अनुपस्थितिश्च मिलित्वा एकत्रैव भवतः चेत् वयं तं व्यक्तीकर्तुं न शक्नुमः ।

५) स्यादस्ति घटः अवक्तव्यः (घटः अस्ति परन्तु अकथनीयः अपि वर्तते )

६) स्याद् नास्ति घटः अवक्तव्यः (घटः न विद्यते तथा अकथनीयः अपि)

७) स्यादस्ति नास्ति च अवक्तव्यः घटः । (घटः विद्यते न विद्यतेऽपि तथा अकथनीयोऽपि)

**सापेक्षवादः**

जैनानां सापेक्षवादः छात्रेषु लोकतान्त्रिकमनोवृत्तेः विकासने अत्यन्तसहायकं भवति । लोकतन्त्रस्य एकः आदर्शः भवति अन्येषां विचाराणां श्रवणम् अवगमनं तथा अन्येषां वैमत्यस्य सहिष्णुतया स्वीकरणम् । जैनदर्शनस्य शाब्दवादः एवं सूचयति अन्येषां दृष्टिकोणमज्ञात्वा तेषाम् अवमानकरणम् उचितं न भवति । अस्माभिः अस्माकं विरोधिनां वाक्यमपि अवगन्तुं प्रयत्नः करणीयः। वयं सत्यम् आंशिकरूपेण पश्यामः । पूर्णसत्यं तु केवलं कैवल्यज्ञानी एव जानाति । स्याद्वादस्य अभ्यासद्वारा छात्रेषु सहिष्णुतायाः विकासः कर्तुं शक्यते । तथा मानवैः अत्यन्तसमीचीनसमाजः निर्मातुं शक्यते । जैनमते नयस्य वर्गीकरणं प्रकारद्वयेन कृतं वर्तते ,यस्य अध्ययनेन अस्माकम् अर्थप्रतीतौ सहायता मिलति, तथा मिथ्याभासज्ञानात् मुक्तिः मिलति ।

**१) नैगमनयः -**

अयमेकः प्रयत्नविशेषेण प्रयोजनेन वा सम्बन्धं स्थापयति, यः सामान्यतया तस्मिन् उपस्थितो भवति। यदि वयं पाठ्यपुस्तकं, टिप्पणीपुस्तकं, (Notes) लेखनीं च नयन्तं बालकं पृच्छामः 'त्वं किं करोषि ?' सः उत्तरं ददाति 'अहम् अध्ययनं करोमि' इति । एतत् नैगमनयस्य उदाहरणम् । अयं नयः अस्मभ्यं सामान्यप्रयोजनस्य बोधं कारयति । एतेषां सर्वेषां कर्मणां शृङ्खलायाः नियन्त्रणं करोति ।

**२) संग्रहनयः -**

अयं सामान्यं विशिष्टतानामुपरि बलं ददाति । अयं वर्गगतदृष्टिकोणः । उदाहरणार्थं- वयम् अश्वः इति पदं, पुरूष- अश्वस्य, स्त्री- अश्वस्य, एवम् अश्वगर्दभसङ्करस्य कृते अपि व्यवहरामः। परन्तु एते भिन्नाः ।

**३) व्यवहारनयः -**

अयं परम्परागतदृष्टिकोणः भवति , यस्य आधारः इन्द्रियानुभूतज्ञानं भवति। यदा अस्माकं वस्तुविषयकं ज्ञानं तस्य समग्ररूपे भवति , तदा वयं तेषां प्रमुखविशेषतानामुपरि ध्यानं दद्मः । शुकः हरितवर्णः । एतद् वाक्यं व्यवहारनयस्य उदाहरणम् । शुकस्य प्रमुखः वर्णः हरितः भवति, परन्तु अन्योऽपि वर्णः तस्य शरीरे विद्यते ।

**४) ऋजुसूत्रनयः -**

अस्यान्तर्गतत्वेन पदार्थस्य एकसमयविशेषस्य अवस्थायाः विचारः क्रियते । अस्मिन् निरन्तरतायाः अथवा सातत्यस्य विस्मरणं भवति । अस्मिन् यथार्थः क्षणिको भवति । वृक्षात् पतत् फलं दृष्ट्वा फलं पतनशीलं भवति इति कथनम् अस्मिन् नये अन्तर्भवति । वस्तुतः फलस्य नित्यप्रकृतिः पतनशीला नास्ति । परन्तु क्षणविशेषस्य इयं स्थितिः ।

**५) शब्दनयः -**

यथा प्रत्येकं नाम्नः स्वस्य अर्थः भवति, एवं भिन्नभिन्नशब्दाः अपि एकपदार्थाभिव्यक्तिं कुर्वन्ति । पदानां, तस्य अर्थानां मध्ये यः सम्बन्धः वर्तते सः सापेक्षो भवति । उदाहरणार्थं - भोजनसमये सैन्धवमानय इति कथनं लवणं बोधयति न तु अश्वम् ।

**६) समभिरुढनयः -**

अयं शब्दनयस्य विस्तृतरूपं भवति । शब्दस्य मूलधातोः आधारेण शब्दार्थस्य निष्कासनं क्रियते। यथा दर्शनस्य उत्पत्तिः दृशिर = प्रेक्षणे, अर्थात् प्रत्यक्षदर्शनम् । अस्य आशयः वर्तते प्रत्यक्षदर्शनम् अथवा प्रत्यक्षानुभूतिकरणं न तु केवलं ज्ञानमात्रम् ।

### ७) एवंभूतनयः-

अयं समभिरुद्धनयस्य संकीर्णः तथा विशिष्टप्रकारः अस्ति । एकपदार्थाभिव्यक्तौ नाना प्रकारेषु पदेषु केवलम् एकस्यैव पदस्य प्रयोगे वक्तुराशयः स्पष्टः भवति। उदाहरणार्थं - 'स्त्री' इति अर्थकथनार्थं रम्भा, रमा, गृहिणी इत्यादीनां शब्दानां प्रयोगः कर्तुं शक्यते , परन्तु वक्तुः आशयानुसारम् उपयुक्तसन्दर्भे एतेषु कस्यचिद् एकस्य शब्दविशेषस्य प्रयोग एव वास्तविकमर्थं द्योतयति । भाषायाः अध्यापने तथा सूत्रबद्धकथनानाम् उचितव्याख्यायाश्च सप्तनयस्य ज्ञानं लाभकारि भवति । अनेन मिथ्याज्ञानात् तथा दुर्व्याख्यातः (Mis- interpretation) रक्षितुं शक्यते ।

### अनुशासनम्

जैनदर्शने शिक्षाप्राप्तौ अत्यन्तकठोरानुशासनस्य प्राधान्यमस्ति । जैनदर्शनानुसारं विना संयमं, विना विनयं च शिक्षा न सम्भवति । ज्ञानप्राप्तौ निम्नाङ्कितविषयाः बाधकाः मन्यन्ते, यथा -क्रोधः, अहंकारः ,प्रमादः, रोगः आलस्यश्च । नाम येन ज्ञानं प्राप्तव्यं तेन क्रोधाहङ्कारादिभ्यः मुक्तिः प्राप्तव्या । यतो हि क्रोधी शान्तभावनया अध्ययनं कर्तुं न शक्नोति। एवमेव अहंकारिणि अभ्यसनाय ग्रहणशीलता न भवति शिथिलता तथा आलस्यमपि अध्ययनस्य घोरशत्रू भवतः । यदि शरीरस्वास्थ्यं नास्ति चेत् अध्ययनं कथं कर्तुं शक्यते । अन्यजैनागमेषु एतद् व्यतिरिक्तरूपेण अनुशासनस्य अष्टौ गुणाः उल्लिखिताः, ये ज्ञानप्राप्तौ सहायकाः भवन्ति।

१) उपहासशीलः न भवितव्यः अर्थात् ज्ञानं गाम्भीर्येण स्वीकरणीयम्,एवं ज्ञानस्य उपहासः न कर्तव्यः।

२) इन्द्रियाणामुपरि नियन्त्रणमावश्यकम्, नाम इन्द्रियाणि तेषां सुखदायिविषयेभ्यः नियन्त्र्याध्ययने एकाग्रचित्तैः भाव्यम् ।

३) कठोराप्रियभाषाव्यवहारो न कार्यः , कुत इत्युक्तौ या वाणी अस्माभिः व्यवहारे उपयुज्यते तस्याः परोक्षप्रभावः अस्माकं चरित्रस्योपरि पतति ।

४) चरित्रवान् स्यात् ।

५) आचरणं शुद्धं स्यात् ।

६) लोलुपता न भवितव्या ।

७) क्रोधः न कार्यः ।

८) सदा सत्यस्य अनुगामी स्यात् ।

भगवता महावीरेण छात्रानुशासने तपसः संयमस्य च अत्यन्तमहत्त्वं प्रदत्तम् । वाक्यमिदं रूपकद्वारा उत्तराध्ययनसूत्रेषु अनेन प्रकारेण प्रास्तावीत् । 'तपसः अग्निं निर्मातु, आत्मानं यज्ञस्थलं करोतु, योगस्य कुलशीलो भव, कर्म इन्धनं करोतु । संयमरूपिशान्तिपाठं करोतु । अनेन प्रकारेण प्रशस्तहोमः भवति ।' मिथ्याज्ञानरहिताय स्वच्छ-आत्मने प्रशंसनीयभावनानाम् उत्पादकः, धमरूपी-सरोवरः तथा ब्रह्मचर्यरूपी-शान्तितीर्थः भवति । एतयोर्मध्ये स्नात्वा स्वयं पवित्रो भव । अन्यभारतीयदर्शनेष्विव जैनदर्शनमपि आत्मानुशासने विश्वासं स्थापयति । जैनदर्शनं न केवलं शिक्षार्थिभ्यः, अपि तु ये ज्ञानं प्राप्तुमिच्छन्ति तेभ्यः अपि इमामपेक्षां करोति यत् ते प्रतिदिनं स्वकृत्यानां पुनरालोकनं कुर्युः । तथा किं करणीयम् ? किं न करणीयम्? इत्यस्मिन् विषये आलोचनां कुर्युः । प्रतिदिनम् अकरणीयकृत्यानां विषये नित्यम् आत्मावलोकनं कृत्वा करणीयकृत्यानां विषये प्रतिज्ञा करणीया । जैनदर्शने अनुशासनाय शिक्षकस्य भूमिकापि अत्यन्तमहत्त्वपूर्णा वर्तते । आत्मावलोकनानन्तरं शिष्यः गुरूसमीपं गत्वा स्वकृत्यानां विवरणं प्रस्तौति, तथा स उचितानुशासनं प्राप्नोति, अथवा दण्डदानाय निवेदनं करोति । अस्यैव दण्डस्य जैनदर्शने प्रायश्चित्तमिति नाम । अध्यापकः छात्रस्वभावं, परिस्थितिम् अपराधस्य गुरुताञ्च विश्लिष्य पश्चात् उचितप्रायश्चित्तस्य व्यवस्थां करोति । इयम् आत्मलोचनक्रिया दैनिकी, पाक्षिकी, तथा वार्षिकी च भवति । प्रायः प्रायश्चित्तरूपेण दीयमानः दण्डः न्यून एव भवति। परन्तु तदा तदा प्रायश्चित्तार्थं कठोरतपः आचरणीयं भवति ।

अनुशासनस्य मूलविषयः एवं भवति, अनुशासनं आचार्यद्वारा निर्बन्धेन न प्रापणीयम् । छात्रः स्वयमेव तस्य अनुशासनकर्ता स्यात् । स्वस्य कृत्यानां स्वयमेव उत्तरदायी भवति न तु अन्यः, यदि सः स्वस्य अपराधं जुगोपयिषति चेत् गोपनं कर्तुं शक्नोति परन्तु तेन तस्य आत्महानिः भवति । अत एवं न कर्तव्यम् । आत्मानुशासनं शनैः शनैः विकसितं भवति । ततः पूर्वम् उपाध्याय-आचार्य-अन्यवरिष्ठाध्यापकैः छात्रस्य मार्गदर्शनं कर्तव्यम् । छात्रस्य व्यवहारोपरि सचेतदृष्टिः स्थापनीया भवति, तेन छात्रः मार्गच्युतः न स्यात् । शनैः शनैः छात्रेषु आत्मानुशासनस्य आनयनानन्तरम् आचार्यस्य भूमिका छात्राणां कृत्यानां श्रवणे दण्डविधाने च भवति । एवं श्रमण-श्रावकयोः नैतिकजीवनस्य अत्यन्तविस्तृतयोजना जैनैः प्रस्तुता वर्तते, यस्यां महाव्रतानां

पालनम्, जीवनव्यवहारे सतर्कता, मनो-वाक्-कर्मादिषु हिंसायाः त्यागः, कषायाणां त्यागः इत्याद्यनेककठोरव्रतानां विवेचनं कृतं वर्तते ।

मोक्षप्राप्तौ साधकाय निम्नाङ्कितमार्गाः प्रदर्शिताः -

१) चतुर्णां कषायाणां (मानं, क्रोधः, माया, लोभः) निवारणं किमर्थमित्युक्तौ एते कषायाः कर्मपुद्गलम् आकर्षन्तः भवन्ति । आत्मानं पुद्गलेन आवरणं कुर्वन्ति च। फलतः अनन्तज्ञानयुक्तस्य आत्मनः ज्ञानरूपप्रकाशः क्षीणो भवति । कर्मपुद्गलस्य, आत्मना साकं संलग्नात्मकक्रियां जैनदर्शने 'आश्रवः' इत्युच्यते। कर्मपुदगलेन संयोगकारणादेव आत्मा बद्धो भवति । आश्रवमार्गस्य अवरोधनक्रिया 'निर्जरा' भवति । निर्जरा केवलं निष्क्रियं नकारात्मककार्यं न भवति ।

कषायाणाम् अवरोधनक्रियया साकं ये पूर्वसञ्चितपुद्गलाः वर्तन्ते, तेषां निष्कासनकार्यमपि निर्जरायाः भवति । तदर्थम् अध्यवसायः स्यात् तथा तपः कर्तव्यं भवति । तपोऽग्नौ द्रवीभूय निर्जराद्वारा कर्मपुद्गलः बहिर्निष्कासितो भवति ।

२) मोक्षस्य वस्तविकस्थितिः एवं भवति यदा आत्मा कर्मपुद्गलेभ्यः मुक्तो भवति । इयमेव कैवल्यज्ञानस्य स्थितिः भवति, तदा आत्मा स्वयं प्रकाशितो भवति।

***********

## ८
# बौद्धशिक्षातत्त्वम्

बौद्धदर्शनं नैतिकजीवनस्य दर्शनम् । भगवान् बुद्धः मनुष्यजीवनोन्नत्यै सहायताभावात् तत्त्वमीमांसायाः विवेचने समययापनमनुपयोगि भवतीति अवगतवान् । बौद्धचिन्तनानुसारं येषां विषयाणां समाधानाय पर्याप्तं प्रमाणं नैव लभ्यते तेषां समाधानाय चेष्टा व्यर्था । बुद्धः प्राचीनकाले विद्यमानानां अनेकदार्शनिकसिद्धान्तानां युक्तिहीनतां निराधारतां च प्रतिपादितवान् । यतो हि तेन मुक्तिमार्गः नैव मिलति ।

## शिक्षायाः उद्देश्यानि

बौद्धदर्शनानुसारं जीवने विद्यमानदुःखानां दूरीकरणमेव शिक्षायाः उद्देश्यं भवति । तेषां दर्शने चत्वारि सत्यानि वर्तन्ते । यथा- जीवनं दुःखपरिपूर्णं भवति । दुःखानां कारणमस्ति ।

दुःखानां नाशः सम्भवति । दुःखनाशाय उपायः वर्तत इति । वेदान्ततुल्यं बौद्धदर्शनेऽपि दुःखानां कारणमस्माकमज्ञानं इति मन्यते । यदा अज्ञानस्य अपाकरणं भवति तदा दुःखानामन्तः भवति । अतः मानवस्य दुःखकारणीभूतात् अज्ञानात् विमुक्तीकरणं शिक्षायाः लक्ष्यं भवति ।

बौद्धमते यदा जन्मजरामरणकारणीभूतं नाम रूपात्मकशरीरम् (Body Mind organism) नश्यति, तदा सम्पूर्णदुःखस्य नाशः भवति । यावत् शरीरं भवति तावत् येन केनापि प्रकारेण दुःख भवति । यत्सुख सांसारिकं भवति, तदपि क्षणिकमेव भवति । तदन्ते पुनः दुःखं भवत्येव।

बौद्धदर्शनस्य एतादृशनिराशवादिदृष्टिकोणाधारेण व्यावहारिकशिक्षायाः उद्देश्यस्य निर्धारणं साक्षात् न सम्भवति । यतो हि बौद्धशिक्षाप्रणाल्यां उद्देश्येन साकं तत्त्वचिन्तनस्य साक्षात् सम्बन्धः न दर्शितः ।

भगवता बुद्धेन सज्जीवनार्थम् अष्टाङ्गमार्गः प्रदर्शितः । स एव मार्गः शिक्षायाः विशिष्टोद्देश्यरूपेण योजयितुं शक्यते ।

**सम्यक् दृष्टिः (समा दिट्ठि)**

अविद्याकारणात् अस्य जगतः , एवमात्मनः सम्बन्धे च मिथ्यादृष्टिः उत्पन्ना भवति । अविद्याकारणादेव वयमनित्येषु दुःखदायिक्षणिकसततपरिवर्तनशीलेषु अनात्मवस्तुषु, नित्यसुखदायि स्थायि आत्मरूपमिति अङ्गीक्रियते। ज्ञानप्राप्तिफलस्वरूपेण शिक्षितव्यक्तिः वस्तूनां यथार्थस्वरूपं जानाति । इयं सम्यक् दृष्टिः भवति । शिक्षायाः प्रथमं कार्यं शिक्षार्थिने सम्यग्दृष्टिप्रदानम् ।

**सत्ससङ्कल्पः - (सम्मा संकल्प)**

केवलज्ञानप्राप्तिमात्रेण तदनुसारजीवनपद्धतेः निश्चयपर्यन्तं दुःखानामन्तः नैव भवति। अन्येषु द्वेषत्यागः, सांसारिकविषयेषु विरागः हिंसात्यागः इत्यादीनां निश्चयः आवश्यकः। अयमेव सङ्कल्पो भवति । शिक्षायाः द्वितीयोद्देश्यं वर्तते छात्रेभ्यः सत्संकल्पस्वीकारे साहाय्यप्रदानमिति।

**उत्तमावाणी – (सम्मा वाचा)**

तृतीयं लक्षणं अस्य वाणी नियमिता स्यात् । शिक्षितव्यक्तिः अन्यान् न निन्दति, अप्रियरूपेण मिथ्यावाण्या न व्यवहरति नैव जल्पति एतादृशसंयमितवाण्याः व्यवहार एव सम्यक् वाक् इत्युच्यते ।

**उत्तमं कर्म - (सम्मा कम्मान्त)**

शिक्षितमनुष्यस्य कार्यं, संयमितं शुभं च स्यात् । सत्संकल्पवाण्यौ सम्यक्कर्मकरणे सहायिके भवतः। अहिंसा, सत्यम्, अस्तेयम्, तथा इन्द्रियसंयमादयः 'सम्यक् कर्म ' रूपेण मन्यन्ते ।

**उत्तमाजीविका - (सम्मा आजीव)**

शिक्षितमनुष्यजीवने व्यवहारे च एतादृशप्रकारेण परिवर्तनं वाञ्छितं भवति यत् सः शुद्धोपायेन स्वपरिवारपालनं पोषणं च कुर्यात् । जीवने धर्मोचितमार्गानामनुसरणम्, अनुचितोपायानां परित्यागश्च शिक्षितमनुष्यस्य लक्षणं भवति । शुद्धोपायैः आत्मनः आजीविकोपार्जनकरणरूपशिक्षणदानं शिक्षायाः प्रमुखोद्देश्यं भवति ।

**युक्तव्यायामः - (सम्मा वायाम)**

सम्यग्दृष्टिः, सम्यक्संकल्पः, सम्यक्वाणी, सम्यक् कर्म एवं सम्यक्

आजीविका इति गुणानां विकासात्परमपि ततः पूर्वं विद्यमानकुसंस्काराणां कारणात् सन्मार्गात् विचलितः भवेत्, एवं मनसि पुनः दुष्टविचाराः उत्पद्येरन् । अतः शिक्षितव्यक्तिः पूर्वोक्त सम्यग्दृष्टिप्रभृतीन् सर्वान् विषयान् निरन्तरमभ्यस्येत्।

१) तेन पूर्वं विद्यमानदुष्टभावनाः सम्पूर्णतया विनष्टाः स्युः।

२) पुनः नूतनदुष्टविचाराः मनसि न प्रविष्टाः भवेयुः ।

३) मनः शून्येन न भवितव्यम्, अतः सदा समीचीनविचारैः परिपूर्णं स्यात् ।

**उत्तमा स्मृतिः - (सम्मा सति)**

शिक्षितव्यक्तिः अधीतविषयान् वारं वारं स्मरणं कुर्यात् । तेन अज्ञानान्धकारो नश्यति।

**उत्तमः समाधिः - (सम्मा समाधि)**

उपर्युक्तसप्तगुणाः यस्य पुरुषस्य जीवने अथवा चरित्रे अङ्गानि भवन्ति, सः पुरुषः सम्यक् समाधिप्रवेशयोग्यतां प्राप्नोति । सम्यक्समाधिः निर्वाणप्राप्तये प्रथमावस्था भवति । कालान्तरे बौद्धशिक्षाप्रणाल्यां जैनव्यावहारिकोद्देश्यानां स्थानं प्राप्तं वर्तते। तान्युद्देश्यानि अधुनातनशिक्षायाः उद्देश्यानीति वक्तुं शक्यन्ते ।

**१)नैतिकजीवनम् -**

भगवान् बुद्धः नैतिकजीवनं शिक्षायाः एकं प्रमुखं लक्ष्यमिति मनुते । उपदेशैः साकं मठे विहारेषु च वातावरणं छात्रचरित्रनिर्माणसहायकमासीत् । आचार्यस्य मुख्यकार्यं शिष्याणां नैतिकजीवनस्य विकासः । चरित्रनिर्माणार्थमावश्यकनियमानां निर्धारणमपि अकृत।

**२) व्यक्तित्वस्य विकासः -**

आत्मनिर्भरता, आत्मसंयमः, आत्मविश्वासः, तथा विवेकादिगुणानां विकासः, शिक्षायाः द्वितीयं प्रमुखं लक्ष्यमासीत् ।

**३) संस्कृतेः संरक्षणम् -**

बुद्धोपदेशान् एवं भारतीयसांस्कृतिकव्यवहारं विद्यार्थिनां हस्तान्तरितकरणं एकं लक्ष्यमासीत् । भिक्षवः स्वयम् अधीत्य जीवने परिपालनं कृत्वा अन्येभ्यो शिक्षां दास्यन्ति । एवं संस्कृतेः सरंक्षणं भवति ।

**४) सर्वाङ्गीणविकासः -**

बौद्धशिक्षाप्रणाल्यां शारीरिकव्यायामः, मानसिकशिक्षा तथा नैतिकजीवनमित्यादि विभिन्नप्रकारकविकासानामुपरि ध्यानमददात् ।

**छात्रस्वरूपम्**

बौद्धदर्शनस्य 'मध्यमप्रतिपदा'(Middle path) सिद्धान्तानुसारं छात्रस्य अतीतस्थित्यनुसारं तस्य भाविस्थितिः भवति। छात्रस्य वर्तमानमस्तित्वं तस्य पूर्वजन्मकर्म तथा बाल्यावस्थायाः संस्काराणामुपरि आधारो भवति । यत्किमपि अकस्मात् नैव भवति । अध्यापनकार्ये छात्रजीवनविषयकः एतादृशदृष्टिकोणः अत्यन्तसहायकः भवति । अध्यापनात्पूर्वं छात्रस्य स्थितेः ज्ञानमध्यापकस्य अत्यन्तमावश्यकं भवति । तत् ज्ञानं विभिन्नक्षेत्रेषु अथवा विभिन्नछात्रेषु निहितां एकतामवगामयति। छात्रेषु विद्यमानभिन्नतायाः कारणमपि प्रस्तुतीकरोति। बालकस्य वर्तमानस्वरूपं पूर्वतरसंस्काराणां परिणामः भवति। सर्वेषां छात्राणाम् अतीतः कालः एकरूपेण न भवति । अतः तेषु विभिन्नता स्वाभाविकी भवति । प्रत्येकं छात्रस्य अध्ययनक्षमताऽपि एकरूपेण न भवति, अतः प्रत्येकं छात्रस्तरानुरूपम् अध्ययनाध्यापनक्रियायाः संयोजनम् अध्यापकस्य कर्तव्यं भवति। इत्थम् अध्यापकः बालकं समीचीनव्यक्तिरूपेण, नागरिकरूपेण च कर्तुं शक्नोति। अतः बौद्धदर्शनस्य सिद्धान्तानुसारं भाविविकासक्षमता वर्तमान-अस्तित्वस्योपरि आधारिता भवति। वर्तमानमानाद् भिन्नं किमपि सिध्यति । किमपि कार्यं विना कारणं न भवति । भाविकार्यस्य बीजं वर्तमानकारणे अवलोकयितुं शक्नुमः। अयं 'कारणकार्यनियम' एव बौद्धदर्शने 'प्रतीत्य समुत्पादनियमः' इति कथ्यते । पूर्वोक्तकथनेन एवं न मन्तव्यम् , बौद्धदर्शनानुसारं छात्रस्य गतिः पूर्वनिर्धारिता एव भवति, अध्यापकः स्वेच्छया किमपि कर्तुं न शक्नोतीति। बौद्धदर्शने कारणकार्यसम्बन्धेन साकं एवमपि प्रतिपादितं दृश्यते - छात्रस्य भविष्यत् सम्यक् संकल्पस्योपरि अपि निर्भरो भवतीति । अस्मिन् दर्शने विश्वासवान् अध्यापकः छात्रभावि लक्ष्यं निर्धारयितुं शक्नोति। छात्रक्षमतानुरूपं पाठ्यक्रमस्य व्यवस्थामपि कर्तुं शक्नोति । एवं छात्रभाविजीवनदिशानिर्धारणे मार्गदर्शनं च करोति। बौद्धदर्शने जातिभेदाः न गणिताः, तथा सर्वेषां मनुष्याणां कृते शिक्षां सुलभां कर्तुमिच्छन्ति । शिक्षां प्राप्तुं प्रत्येकं मानवस्याधिकारः वर्तते । निर्वाणं सर्वमनुष्यस्य लक्ष्यम् अस्ति । अतः निर्वाणप्राप्तये मार्गप्रदर्शनाय समेषां शिक्षा सुलभा भवतु ।

**शिक्षकः-**

अस्मिन् दर्शने शिक्षकैः अवश्यं चत्वारि आर्यसत्यानि ज्ञातव्यानि वर्तन्ते । एवं स्वयं जीवने बुद्धप्रतिपादित- अष्टाङ्गमार्गानुरूपप्रवर्तकोऽपि भवेत् । जैनदर्शनवत् बौद्धदर्शनेऽपि द्विप्रकारकशिक्षककल्पना वर्तते । आचार्यः उपाध्यायः इति । आचार्यः छात्रानुशासनाधिकारी भवति । उपाध्यायः अध्ययनाध्यापनस्याधिकारी भवति । बौद्धदर्शने शिक्षायाः स्थान महत्त्वपूर्णं वर्तते । बौद्धशिक्षाप्रणाल्याम् आधुनिकसंस्थागत (Institutionalized) शिक्षायाः स्वरूपं दृग्गोचरं भवति । यत्र एकाचार्याधीने नैके उपाध्यायाः, एवं प्रत्येकोपाध्यायस्य समीपे छात्राणामेकः अल्पः समूहः भवति स्म । अध्यापकेषु स्नेहपूर्णपारस्परिकसम्बन्धान् स्थापयितुं आचार्यः शास्त्रसम्मतानां केषाञ्चन नियमानां निर्धारणं करोति । एवम् उपाध्यायस्य कार्यम् अध्ययनमध्यापनं च भवति । आचार्यस्य कार्यं न केवलं छात्रेषु अनुशासनसम्पादनम्, किन्तु उत्तरदायिनां शिक्षकाणां मध्येऽपि अनुशासनस्थापनम् ।

**पाठ्यक्रमः -**

बौद्धदर्शनानुसारं जगत्परिवर्तनशीलं भवति । मनुष्योऽपि परिवर्तनशीलः भवति । संसारे किमपि स्थिररूपेण न तिष्ठति । आत्मापि स्थायी नास्ति । सर्वं क्षणिकं क्षणिकमिति सर्वमपि परिवर्तनशीलं भवति । बौद्धदर्शने मूलवादः, दुःखवादः, दुःखात् मुक्तिं प्राप्तुम् उपायान्वेषणं च ।

उपर्युक्तचिन्तनानुसारं बौद्धशिक्षादर्शने पाठ्यक्रमः एवं स्यात् ।

१) चतुर्णाम् आर्यसत्यानां पूर्णपरिपाकज्ञानम् । जगति मनुष्यस्थानम् , जगतः कार्यव्यापारः, जगतः परिवर्तनीयता एवं क्षणिकता, कार्यकारणसम्बन्धः इत्यादिविषयेषु गहनाध्ययनम्। अन्यदर्शनैस्स्माकं बौद्धदर्शनस्य तुलना, एवं बौद्धसिद्धान्तानां प्रतिपादनम्।

२) समीचीनरूपेण च आजीविकोपार्जनकौशलम् ।

३) बौद्धसाहित्यस्य अध्ययनम् ।

४) भगवतः बुद्धस्य अन्येषाञ्च जीवनचरित्राणामध्ययनम् । अनन्तरकाले बौद्धशिक्षाप्रणाल्यां पाठ्यक्रमः विस्तृतो जातः । बौद्धविहारेषु मठेषु च पञ्चधा विद्यानामध्ययनम् अध्यापनम् अवर्तत ।

१) शब्दविद्या - अत्र शब्दनिर्माणं , व्युत्पत्तिः, तथा व्याकरणज्ञानञ्च भवति ।

२) शिल्पासनविद्या - अस्मिन् विभिन्नप्रकारकलाः उद्योगाश्च भवन्ति ।

३) चिकित्साविद्या -अस्याम् औषधविज्ञानं , शरीरविज्ञानं, इत्यादिविषयाणां समावेशः वर्तते।

४) हेतुविद्या - अस्यां तर्कशास्त्राध्ययनं भवति ।

५) अध्यात्मविद्या -अत्र बौद्धदर्शनेन साकम् अन्येषां दर्शनानां तुलनात्मकमध्ययनं दृश्यते। एतदतिरिक्ततया मठेषु विहारेषु च व्यायामः , क्रीडा इत्यादि विषयेष्वपि अवधानमदुः । स्वस्थपुरुषः एव कार्यं कर्तुं प्रभवति अतःस्वास्थ्यसम्पादनार्थमेते विषयाः प्रबोधिताः ।

## शिक्षणविधिः

बौद्धविहारेषु शिक्षाप्रदानाय त्रयाणां प्रमुखविधीनाम् उल्लेखः उपलभ्यते ।

**व्याख्यानम् -**

व्याख्यानं युगपदेव नैकशिष्याणां कृते क्रियते । व्याख्याता स्वविषये निष्णातः स्यात्। अस्मिन् विधौ शिक्षाप्रक्रिया एकमङ्गं भवति । अध्यापकः विषयं पूर्णरूपेण प्रस्तुतीकरोति । परन्तु छात्रः स्वयोग्यतां एवं क्षमतानुसारं गृह्णाति । अध्यापकद्वारा अल्पसमूहस्य शिक्षा अस्मिन् विद्यौ अध्यापकः ५-६ छात्रेभ्यः युगपदेव शिक्षां ददाति । अध्यापनीयवस्तु प्रथमतया स्वयमध्यापकः वाचनं करोति । छात्राः शृण्वन्ति । अनन्तरं छात्रः अनुवाचनं करोति । अध्यापकः अशुद्धिसंशोधनेन साकं पुनः पुनः वाचयित्वा अभ्यासं कारयति । अधीतविषयवस्तुनः , अथवा सूत्रबद्धज्ञानस्य, अध्यापकः व्याख्यां करोति । छात्रः मध्ये मध्ये शङ्कामुपस्थापंयति । अध्यापकः छात्रशङ्काः निवारयति । यावत् छात्रः समूर्णं गृह्णाति तावदियं प्रचलति ।

**चर्चा -**

जटिलदार्शनिकसिद्धान्तानां , अधीतविषयवस्तुनः उपरि च परस्परचर्चा भवति । सामूहिकाध्ययनविधीनां विवेचनं च मिलति । ते क्रमेण -

१) सूत्राणां पुनः पुनः वाचनेन कण्ठस्थीकरणम् ।

२) तथ्यानां स्मरणं सञ्चयनञ्च ।

३) अधीतविषयवस्तुनः पौनःपुन्येन मननम् ।

४) मननात् आत्मसाक्षात्कृतविषयवस्तुनः धारणम् । पूर्वोक्तरीत्या ज्ञानस्य फलस्वरूपेण दुःखानां निवारणं, तेन 'आनन्दप्राप्तिः' । अस्याः अवस्थायाः विवरणं 'सम्मासमाधि' मध्ये अन्तर्गतं भवति। सम्मासमाधौ चतस्रः अवस्थाः भवन्ति । प्रथमावस्थायां शान्तचित्तेन आर्यसत्यानामुपरि तर्कवितर्कः विमर्शनं च भवति । विरक्त्या तथा शुद्धविचारेन साधकः अपूर्वशान्तेः आनन्दस्य च अनुभवं प्राप्नोति । इयं शुद्धतः वैचारिकशान्तिः भवति । द्वितीयावस्थायां सन्देहनिवृत्तिकारणात् आर्यसत्येषु श्रद्धा एधते । तर्कवितर्कयोः आवश्यकता अत्र न भवति । इयं प्रगाढचिन्तनस्य, चित्तस्थिरतायाश्च स्थितिः भवति । अस्यामवस्थायां ज्ञानं तेन साकं शान्तेश्च आगमनं भवति । तृतीयावस्थायां चित्तात् आनन्दस्य शान्तेश्च भावं दूरीकृत्य उपेक्षाभावस्य आनयने प्रयत्नो विधीयते । अस्मिन् प्रयत्ने चित्तस्य साम्यावस्था अनया साकं दैहिकसुखभावोऽपि सम्भवति। चतुर्थावस्थायां चित्तस्य साम्यावस्था । दैहिकसुखात् ध्यानात् लब्धानन्दादपि च साधकः विरक्तः भवति । चित्तवृत्तीनां, निरोधः भवति । अस्यामवस्थायां पूर्णशान्तिः, पूर्णविरागः, एव पूर्णनिरोधोऽपि भवति । इयं पूर्णप्रज्ञायाः अवस्था ।

## बौद्धशिक्षायाः मूल्यानि

सम्पूर्णबौद्धशिक्षाप्रणाली बौद्धदर्शनस्य मध्यमा-प्रतिपदा- सिद्धान्तः परिलक्षितः भवति। बौद्धदर्शने जीवनस्य यस्य कस्यापि एकान्तिकमूल्यस्योपरि आग्रहप्रदर्शनं न दृश्यते । जैनमतसदृशं पूर्णविरागस्योपरि आग्रहोऽपि न भवति, चार्वाकदर्शनवत् केवलसांसारिकसुखमेव सर्वस्वमिति भावनापि नास्ति ।

### १) आध्यात्मिकव्यावहारिकविषययोर्मध्ये मध्यममार्गः -

बौद्धशिक्षापाठ्यक्रमस्य अवलोकनेन अयं विषयः स्पष्टः भवति , यत् बौद्धदर्शने , एकत्र बौद्धधर्मशिक्षायामाग्रहः वर्तते चेदपि अन्यत्र व्यावहारिकजीवनस्य शिक्षायामुपेक्षा नैव कृता । अतः एकत्रनिर्वाणसाधनीभूतध्यानचिन्तन मननादीनाम् आवश्यकता प्रदर्शिता । अन्यत्र आजीविकार्जनाय शिक्षायामपि बलमदात् ।

**२) नैतिकमूल्यम् -**

बौद्धदर्शने प्रस्तावितमनुष्यव्यक्तित्वस्य विश्लेषणद्वारा एतत् स्पष्टं भवति यत्, मनुष्यविकासे नैतिककारणकार्यसिद्धान्तः भागं वहति । अस्य दर्शनस्याधारेण अस्माकं संकल्पः अस्मान् निश्चयरूपेण नैतिकान् करोति । बौद्धदर्शने प्रतिपादितद्वादशनिदानानां (जन्म - मरणस्य कारण- सिद्धान्तः) अनुसारेण सर्वसृष्टिः अस्माकं संकल्पस्य परिणाम एव भवति । अतः यदि वयं सत्संकल्पं कुर्मः तदा निश्चितरूपेण नैतिकाः भवेम ।

**३) शारीरिकमूल्यम् -**

यद्यपि आकाङ्क्षानां त्यागः, तथा इन्द्रियाणां निग्रहः नैतिकजीवनाय आवश्यकं भवति । तथापि शारीरिकस्वास्थस्य उपेक्षा नैवोचिता । शरीरस्य स्वास्थ्यं नितरामावश्यकम् । अन्यथा विवेकदीपस्य प्रज्वालनं नैव कर्तुं शक्यते , तथा मनसः अपि स्वच्छता, दृढता अपि न भवति ।

**४) आर्थिकमूल्यम् -**

बौद्धदर्शने सांसारिकसुखानां त्यागार्थम् उपदेशः कृतः । एवम् उचितविधिद्वारा आजीविकार्जनेऽपि उपदेशः कृतः । विहारेषु यद्यपि यः कोऽपि भिक्षुः सम्पत्तिं स्थापयितुं न शक्नोति । परन्तु संघस्य सम्पत्तिस्थापने अधिकारः वर्तते । एवं आर्थिकमूल्यस्योपेक्षाम् अकृत्वा, तथागतः अस्यापि मध्यममार्गे अवलम्बनार्थं उपदेशमदात्।

**५) सामाजिकमूल्यम् -**

अन्यभारतीयदर्शनानाम् आग्रहः वैयक्तिकोन्नतेः, तथा वैयक्तिकविकासस्योपरि अस्ति । अतः अध्यापनप्रणाल्यपि वैयक्तिकी कृता । बौद्धशिक्षाप्रणाल्याम् अत्यल्पसमूहेषु शिक्षाप्रदानप्रक्रिया आरब्धा दृश्यते। एतेषु समूहेषु शान्तिस्थापनार्थं ,समन्वयार्थं च अनुशासननियमानां निर्माणं कृतम् । एवं प्रकारेण सामाजिकनियमानां पालनेऽपि आग्रहः स्थापितः ।

बौद्धदर्शनानुसारं मनुष्यः यत्किमपि कार्यं करोतु, तत्र नैतिकजीवनस्य पालनमावश्यकम्। समाजहिताय आत्मार्पणं कृत्वा मनुष्यः सुखं , शान्तिं, आनन्दं च प्राप्तुं शक्नोति । तृष्णा, आकाङ्क्षादिस्वार्थप्रवृत्तयः दुःखमात्रकारणानि भवन्ति ।

सम्पूर्णबौद्धशिक्षाप्रणाली भगवतः बुद्धस्य मध्यमप्रतिपदा परिलक्षिता भवति ।

## ९

# भारतीया शिक्षाशास्त्रिणः

भारतदेशे दार्शनिकचिन्तनस्य एका अजस्रधारा प्राचीनकालात् अद्यतनपर्यन्तं प्रवहन्ती दृश्यते । शङ्करवेदान्तानन्तरं वेदान्तशाखानां विस्तृतविवेचनं सम्भूतम् । एकोनविंशतिशताब्दिपर्यन्तमागतवेदान्तस्य अजस्रवाहिनी विभिन्नधारासु विभक्ता । गान्धिमहोदयस्य सर्वोदयदर्शने अथवा टैगोरमहोदयस्य विश्वबोधदर्शने वेदान्तस्य पुनर्व्याख्या मिलति । एवमेव विंशतिशताब्द्यां बहवो हि शिक्षाशास्त्रिणः अस्माकं भारतीयदर्शनानाम् आधारेण शैक्षिकचिन्तनानि प्राकटयन् । तत्र केषाञ्चन विचाराः अत्र प्रस्तूयन्ते ।

## स्वामिविवेकानन्दमहोदयस्य शिक्षादर्शनम्

स्वामिविवेकानन्दस्य जन्म ख्रीष्टस्य 1863 तमेऽब्दे, जनवरीमासस्य द्वादशतमे दिनाङ्के प्रातःकालेऽभवत् । तस्मिन् दिने पौषसङ्क्रान्तिरासीत् । तेषां जन्मस्थलं बङ्गालप्रान्तस्य कलकत्तानगरस्य 'सिमुलियापल्ली' इति नामकमासीत् । तेषां पितुर्नाम श्री विश्वनाथदत्त आसीत् । सः तदानीन्तनः प्रसिद्धो न्यायवादी आसीत् । तस्य क्षत्रियकुलो बङ्गालप्रान्ते प्रख्यात आसीत् । तस्य गृहस्य वातावरणमतीव धर्मानुप्राणितमासीत् । वीरेश्वरस्य शिवस्य भक्त्या समुद्भवात् मात्रा भुवनेश्वरीदेव्या तस्याभिधानं 'वीरेश्वर' इति निश्चितम् । ततः नामकरणवेलायां तन्नाम 'नरेन्द्रनाथः' इति निर्धारितम् ।

विवेकानन्दः स्वानुभूतस्य ज्ञानस्य शिक्षां सहजतयैव प्रदत्तवान् । स वेदान्तस्य व्यावहारिकं स्वरूपं स्वीकृतवान् । स मानवसेवामेव ईश्वरसेवां मनुते स्म । स सत्यनिष्ठतायाम् आध्यात्मिकतायां चेत्यनयोरभिन्नत्वं मनुते स्म । स अनेकताष्वप्येकतां पश्यति स्म । तन्मते स एव शान्तिमधिगच्छति यस्तु वैविध्येऽपि ऐक्यस्य साक्षात्कारं करोति । तन्मते आत्मा एव मनसा शरीरे कार्यं विदधाति । स सर्वान् धर्मान् प्रति सदैव समादरं प्रकटितवान् । परं स्वामिविवेकानन्दः स्वकीयं वेदान्तस्याद्वैतमतमेव सार्वभौमिकं विज्ञानधर्मरूपेण मनुते स्म ।

स्वामी विवेकानन्दः वेदान्तदर्शनस्य पुनर्व्याख्याम् आधुनिकदृष्ट्या अकरोत् । तथैव निराशावकुण्ठनयोर्मध्ये विद्यमानभारतीयजनतां प्रति नवीनमार्गं प्रदर्शितवान् । स्वामिविवेकानन्दानुसारम् आध्यात्मिकोन्नत्यपेक्षया देशस्योन्नतिः आवश्यकी । यावत् पर्यन्तं प्रत्येकं भारतीयस्य जीवनस्तरोन्नतिः नैव भवति, यावत् जीवनसंघर्षणे सन्नद्धः नैव भवति, तावत् पर्यन्तम् आध्यात्मिकोन्नतिविषयकं वचनं निस्सारं भवति। विवेकानन्दः शिक्षायाः उद्देश्यानि एवं वदति -'या शिक्षा प्रणाली जनसामान्यस्य जीवनसंघर्षणेन साकं योद्धुं क्षमताप्रदाने सहायिका न भवति, या मनुष्यस्य नैतिकबलस्य एवं सेवाधर्मस्य, मनुष्ये सिंहसदृशसाहसस्य च विकासं न करोति, सा शिक्षा योग्या भवति किम् ? एवमेवान्यस्मिन् स्थले एवं वदति - एषा उच्चशिक्षा भवतु न भवतु वा, अनया का हानिर्भवति ? एतदधिकं समीचीनं भवति, यदि जनेभ्यः किंचित् साङ्केतिकशिक्षा मिलति, यया जनाः उपाध्यर्थं इतस्ततः भ्रमणापेक्षया यस्मिन् कस्मिन्नपि कर्मणि लग्नाः भूत्वा जीवोपार्जनं कर्तुं शक्नुयुः'।

**शिक्षायाः परिभाषा -**

स्वामी विवेकानन्दानुसारं शिक्षायाः व्याख्या शक्तेः विकासरूपेण कर्तुं शक्यते । शिक्षाद्वारा मनुष्ये अन्तर्निहितपूर्णतायाः विकासः भवति । वेदान्तदर्शनानुसारं प्रत्येकस्मिन् बालके, अनन्तज्ञानं अनन्तबलम् (Omnipotence) एवम् अनन्तव्यापकता (Omnipresence) इत्यादिशक्तयः विद्यन्ते । परन्तु तस्य उपर्युक्तशक्तिविषयकं ज्ञानं न भवति । शिक्षाद्वारा बालकस्य एतासां शक्तीनां प्रत्ययः कार्यः । तथा बालकस्य उत्तरोतरविकासार्थं सहायता भवति । स्वामिविवेकानन्दमते शिक्षा मानवानां पूर्णतायाः अभिव्यक्तिः । श्रीविवेकानन्दः नव्यवेदान्ते एवम् अभिव्यनक्ति शिक्षाद्वारा मनुष्यनिर्माणं भवतीति । समस्ताध्ययनानां अन्तिमलक्ष्यं मानवस्य विकासः । यस्याध्यायनद्वारा मनुष्यस्य सङ्कल्पशक्तेः प्रवाहस्य संयमनद्वारा प्रभावोत्पदकरूपेण निर्माणं कर्तुं शक्यते सा एव शिक्षा । गान्धिमहोदयवत् स्वामीविवेकानन्दोऽपि तथ्यात्मकज्ञानमथवा सूचनाः शिक्षारूपेण न मनुते, स्वामी लिखति- 'शिक्षा नाम न केवलं ( ज्ञान) परिचयसमुच्चयः अथवा विषयसंग्रहो वा नास्ति, येन अस्माकं मस्तिष्कं पूर्णं भवति, एवम् आजीवनपठनेनापि जीवनमार्गप्रदर्शनं नैव लभ्यते । अस्माभिः तेषां भावानां, विचाराणां च आत्मसात्करणीयं भवति, यैः

अस्माकं जीवननिर्माणं भवति, मनुष्यत्वस्य चरित्रस्य च निर्माणं भवति । यदि शिक्षा विषयसंग्रहणमात्रं करोति चेत् , पुस्तकालयः सर्वेभ्यः महान् विश्वकोषः, ऋषिः अपि भवितुमर्हति '।

**शिक्षायाः उद्देश्यानि -**

स्वामिनो नव्यवेदान्तनुसारं शिक्षायाः उद्देश्यं मनुष्यान्तर्निहितपूर्णताभिव्यक्तिः । पूर्णतास्वाभाविकरूपेण मनुष्येषु वर्तत एव, परन्तु शिक्षाद्वारा अस्याः अनावरणं मात्रं करणीयम् । अपूर्णस्य पूरणं बाह्यप्रयत्नेभ्यः नैव शक्यते। शिक्षायाः अस्यान्तिमोद्देश्यस्य प्राप्त्यर्थम् अस्य विश्लेषणं लक्ष्यरूपेण अथवा ध्येयरूपेण स्वीकर्तुं शक्यते।

**१) शारीरकपूर्णता-** पूर्णताप्राप्त्यै प्रथमलक्ष्यं (ध्येयं) शारीरिकस्वास्थ्यम् श्रीस्वामिनः विचारे शारीरिकदुर्बलता अस्माकं पूर्णताम् अत्यन्तं बाधते । सः वदति - प्रथमतः अस्माकं युवकाः सबलाः भवेयुः । धर्मः अनन्तरविषयः भवति । यदि शरीरस्वास्थ्यं सम्यग् भवति चेत् भवान् गीतापठनापेक्षया पादकन्दुक (Foot ball) क्रीडनेन स्वर्गनैकट्यं प्राप्तुं शक्नोति । स्वस्य पादस्योपरि दृढतापूर्वकं स्थातु शक्नोति ।

यदि त्वं स्वान्तःकरणे मानवशक्तेः अनुभवं कर्तुं शक्नोषि, तर्हि त्वं उपनिषदां एवम् आत्मनः महत्त्वम् अधिकसमीचीनरूपेण ज्ञातुं शक्नोषि ।

**२) जीवनसंघर्षणार्थं सन्नद्धता-** स्वामिमतानुसारं शिक्षायाः द्वितीयं लक्ष्यं - बालकानां जीवनसंघर्षार्थं सन्नाहः। जीवननिर्माणार्थं साङ्केतिकी एवं वैज्ञानिकशिक्षा आवश्यकी । स्वामि चिन्तनानुसारं यः कोऽपि प्रकृतेः विरुद्धं संघर्षं करोति, तस्य चैतन्यस्य विकासः भवति । यत्र चेष्टा पुरुषार्थो वा भवति, तत्र जीवनस्य चिह्नं भवति, चेतनायाः प्रकाशश्च वर्तते । स्वामी भारतीयेषु एतादृशसंघर्षाभावम् अवलोकितवान् । अतः स्वामी लिखति अद्यतन काले त्वं जडतुल्यः जातः । बहु प्राचीनकालदारभ्य त्वं हीनः, त्वम् अशक्तः, त्वयि या कापि शक्तिनास्ति, एतादृशवादान् श्रुत्वा श्रुत्वा एवमेव सञ्जाताः सर्वे ।

जीवनसंघर्षणनिर्माणान्तर्गतरूपेण आजीविकाशिक्षायाः समावेशोऽपि भवति । स्वामिमतानुसारं तत्कालीनशिक्षा मनुष्ये केवलं बाह्यपरिवर्तनम् उत्पादयति। परन्तु मनुष्यस्य आजीविकोपार्जनकरणे अशक्ता भवति । जीवनसंघर्षसन्नाहस्य प्रतिफलं उत्पादनरूपेण प्रस्फुटितं भवितव्यम् ।

**३) राष्ट्रियतायाः एवम् अन्ताराष्ट्रियतायाः विकासः -**

स्वामी विवेकानन्दः राष्ट्रियता-अन्ताराष्ट्रियतयोर्मध्ये विरोधाभासं न पश्यति । नव्यवेदान्तानुसारं सम्पूर्णमानवतायाम् एकत्वं विद्यते । परन्तु अस्य विकासः क्रमशः भवति। स्वामिमतानुसारं शिक्षायाः एकं लक्ष्यं राष्ट्रियभावनायाः राष्ट्रियगौरवस्य विकासः। विवेकानन्दः वदति - हे वीर ! साहसस्य अवलम्बनं कुरु। गर्वेण वदतु अहं भारतीयोऽस्मि, सर्वे भारतीयाः मे भ्रातरः । भवान् उच्चैः वदतु यत् मूर्खभारतीयः, ब्राह्मणभारतीयः चण्डालभारतीयः सर्वे मम भ्रातरः सन्ति । भारते दीनदुःखिजनैस्साकं एकीभूय गर्वेणोच्चैः वदतु -

प्रत्येकं भारतवासी मम भ्राता । भारतीयाः मे प्राणाः । भारतस्य देवी देवताः मम ईश्वरः । भारतसमाजः मम बाल्यस्य डोला, तारुण्यस्य उद्यानवनम् , वार्धक्यस्य काशी भवति। सोदर ! वद भारतस्य मृत्तिका मम स्वर्गः, भारतस्य कल्याणमेव मम कल्याणम् अहर्निशं वाक्यमिदं कण्ठस्थं भवतु । हे! गौरीनाथ ! हे जगदम्बे ! मह्यं मनुष्यत्वं ददातु । मम दुर्बलतां, कापुरुषतां च दूरं करोतु, मातः ! मां मानवं कुरु ।

**४) चरित्रविकासः -** स्वामिमतानुसारं शिक्षायाः चतुर्थं लक्ष्यं वर्तते नैतिकचरित्रस्य विकासः। स्वामी वदति- अद्यतनकाले चरित्रवतोः स्त्रीपुरुषयोः आवश्यकता वर्तते । यस्य कस्यापि राष्ट्रस्य विकासः तस्य सुरक्षा अधिकतया चरित्रवतां नागरिकाणामुपरि निर्भरं भवति । यदि वयं भावि नागरिकाणां कृते शिक्षां दद्मः चेत् तत् सुदृढतया चरित्रनिर्माणमित्याधारेण स्यात् । एवं चरित्रनाशात् सर्वमपि नष्टं भवति ।

**छात्रस्वरूपम्-**

अस्य मतानुसारं शिक्षा बालकस्य जन्मसिद्धः अधिकारः भवति । यस्य कस्यापि राष्ट्रस्योन्नतिः तस्य राष्ट्रस्य जनताशिक्षायाः उपरि निहिता भवति, अयं वदति - जनतायाः शिक्षा,बुद्धि-विकासानुसारेणैव देशस्य विकासो भवति । देशस्य पुनरुत्थानार्थं जनसाधारणशिक्षा अनिवार्या इति । स्वामी मनुते, मम विचारे जनसाधारणस्य अवहेलना महत् राष्ट्रियं पापम् एवम् अस्माकं पतनस्य कारणं भवति । यावत्पर्यन्तं भारतीयसामान्यजनस्य शिक्षा, समीचीनाहारः समीचीनसुरक्षा च न दीयेत तावत् पर्यन्तं सर्वोत्तमराजनैतिककार्यम् अपि व्यर्थं भवति। विवेकानन्दानुसारं

प्रत्येकस्मिन् बालके अनन्तज्ञानम् अन्तर्निहितं भवति । बालकः अनन्तज्ञाननिधिः भवति । शिक्षाद्वारा बाह्यात् ज्ञानस्यारोपणं कर्तुं न शक्यते । शिक्षा बालके विद्यमान - ज्ञानस्य केवलम् अनावरणं करोति । बालकस्य विकासार्थम् अथवा तस्य प्रगत्यै बलात् प्रयासः न करणीयः । बालकबालिकयोः समक्षं सदा विध्यात्मकविचाराणां प्रस्तुतीकरणमावश्यकम् । निषेधात्मकविचाराः दौर्बल्यं जनयन्ति । छात्रस्य शिक्षा तस्यान्तरिकावश्यकतानुसारं निश्चेतव्या । शिक्षां प्राप्तुं सर्वेभ्यः समानावकाशः दातव्यः । अस्माकं देशे स्त्रीशिक्षाविषये विद्यमानभेदभावकारणात् अस्माकं हिन्दुसमाजे स्त्रीणां शिक्षा विषये नैर्लक्ष्यं सम्प्राप्तम् । स्वामिमतानुसारं राष्ट्रियोन्नत्यै स्त्रीशिक्षा अत्यन्तावश्यकी । सः वदति प्रथमतया स्त्रीभ्यः शिक्षां ददातु, तदा ताः वक्ष्यन्ति ताभ्यः किं सौकर्यमावश्यकमिति ।

शिक्षायां विद्यमानलैङ्गिकभेदभावः आर्थिकसामाजिककारणेष्वपि भेदभावं जनयति। शिक्षासौकर्यं सर्वेषां कृते समानरूपेणोपलब्धं स्यात्। दरिद्रतायां शिक्षां प्राप्तेः सम्भावना अधिकतया भवति । स्वामी वदति प्रपञ्चे महाचरित्रवतां पुरुषणामध्ययनेन एवं वक्तुं शक्यते यत् अधिकतया सुखापेक्षया दुःखपूर्णपरिस्थितयः एव महत्त्वकारिकाः । सा दरिद्रता आसीत् यथा सम्पन्नतायाः अपेक्षया तेभ्यः अधिकज्ञानाय अवसरः दत्तः । एतादृश तुलनायां तस्य हृदयगततेजसः प्रकटनं भवति ।

**गुरुशिष्ययोस्सम्बन्धः -**

स्वामिविवेकानन्दानुसारं शिक्षाग्रहणार्थं प्रथमनियमोऽयमस्ति, शिक्षार्थिनां हृदये शिक्षकं प्रति श्रद्धा आवश्यकी । स्वामी वदति - शिक्षार्थिनां हृदये शिक्षकं प्रति श्रद्धा विनम्रता, समर्पणभावः सम्मानभावना आवश्यकं वर्तते । विना एतान् गुणान् कोऽपि विकासः न भवति । येषु देशेषु शिक्षकशिक्षार्थिनोस्सम्बन्धस्योपेक्षां कुर्वन्ति तत्र शिक्षकः केवलं व्याख्यातृरूपेण मात्रमवशिष्यते । तत्र शिक्षकः शतरूप्यकेभ्यः स्वकोषपूरणार्थं मात्रं यतते, छात्रः शिक्षकव्याख्यानात् स्वमस्तिष्कस्यपूरणार्थं यतते । एवम् उभावपि स्वस्वमार्गेषु चलतः इतोऽप्यधिकतया उभयोर्मध्ये कोऽपि सम्बन्धः न भवति । स्वामिविवेकानन्दानुसारं गुरुकुलं शिष्यशिक्षकयोर्मध्ये उचितसम्बन्धस्थापने अनुकूलं भवति । पूर्वकालिकगुरुकुलपद्धतेः वर्तमानस्थित्यनुसारं संशोधनं कृत्वा

पुनारचना करणीया इति । स्वामी वदति- मम विचारानुसारं शिक्षायाः अर्थः गुरोः कुलवासः । यस्य चारित्र्यम् जाज्वल्यमानाग्नितुल्यं भवति, तेन साकं सहवासी शिष्यः बाल्यावस्थातः भवितव्यः । येन सहवासेन उच्चतमशिक्षायाः सजीवादर्शाः शिष्यस्य समीपे भवेयुः ।

स्वामिनः कृते दृढविश्वासः वर्तते, यत् चरित्रवतः गुरोः आदर्शजीवनस्यानुकरणद्वारा बालकेषु अन्तःसुप्तस्य देवत्वस्य जागरणं कर्तुं शक्यते । स्वामिविवेकानन्दः विद्यार्थि-अवस्थायां ब्रह्मचर्यपालनं मुख्यमिति अकथयत् । तस्य मतानुसारं ब्रह्मचर्यावस्थायां बालकैः तेषां मनावाणिकर्मभिः ब्रह्मचर्यपालनं कर्तव्यम् । अनेन संकल्पशक्तिः दृढा भवति । आध्यात्मिकशक्तेः आविर्भावः भवति । सूक्ष्मतत्त्वानाम् अवगमने हृदयङ्गमाय च मेधोत्पत्तिः भवति तथा वाग्मितादिशक्तीनां विकासः भवति ।

**पाठ्यचर्या**

प्रत्येकं देशस्य कश्चन सांस्कृतिकविशेषः भवति, यः पाठ्यक्रमनिर्माणस्य धरातलप्रदानं करोति । भारतीयसंस्कृतेः आधारः अध्यात्मविचारः । अपि च आध्यात्मिकविचाररहितः यः कोऽपि पाठ्यक्रमः सार्थकः न भवितुमर्हति । जीवनं परिपूर्णं कर्तुं शिक्षायाः आधारः आध्यात्मिकता भवितव्या । अस्माकं शिक्षा, बुद्धिः एवम् अस्माकं विचारः इति सर्वं पूर्णरूपेण आध्यात्मिकं भवति । स्वामी अध्ययनं तपोरूपेण चिन्तयित्वा हिन्दूनां कृते ध्यानोन्मुखतां वैज्ञानिकान्तर्दृष्टेरुपलब्धौ सहायकरूपेण अवगतवान् । स्वामिविवेकानन्दानुसारं धर्मः शिक्षायाः आत्मा भवति । परन्तु धर्मस्य परिभाषा व्यापकरूपेण भवति । यस्य कस्यापि सम्प्रदायविशेषस्य धर्म इति संज्ञादानम् उचितं न भवति । अस्य दृष्टौ धर्मः एकः साधनं भवति, एकानुभूतिः भवति, आत्मसाक्षात्कारः भवति । स्वामी धर्मनिरपेक्षपाठ्यक्रमस्य कल्पनामपि न करोति, हृदयस्य शिक्षायै पाठ्यक्रमे धर्मस्य कृते उचितस्थानं प्रदेयं भवति । धर्मस्य शिक्षा पाठ्यक्रमे अन्यविषयरूपेण न भवितव्या । पाठ्यक्रमस्यान्यविषयैः मनसः बुद्धेश्च परिष्कारः भवति । परन्तु धर्मः हृदयं समुन्नयति । स्वामिचिन्तनानुसारम् अत्यधिकमानसिकप्रशिक्षणात् अधर्ममनुष्याणां निर्माणं भवति । पाश्चात्यशिक्षायाम् एकदोषः भवति यत् इयं मनुष्यम् अत्यन्तं स्वार्थिनं करोति । बुद्धिः व्यक्तिं तस्याः

सर्वोच्चस्तरं प्रति न प्रापयितुं शक्नोति, तादृशस्तरं प्रति हृदयं प्रापयति, हृदये ज्ञानस्य प्रकाशः भवति । अतः हृदयस्य परिष्कारः आवश्यकः। ईश्वरः हृदयस्य माध्यमात् एव अस्माकं सन्देशं ददाति ।

स्वामिमतानुसारमाध्यात्मिकतायास्साकं विज्ञानस्य एवं साङ्केतिकशिक्षायाः समन्वयः अपेक्षितो वर्तते। पाश्चात्त्यविज्ञानस्य भारतीयवेदान्तेन साकं समन्वयः क्रियते चेत् जगति सुखं समृद्धिः शान्तिश्च उत्पद्यन्ते इति स्वामी विश्वसिति । विज्ञानद्वारा मानवजीवनं अनेकक्लेशेभ्यः मुक्तं भवति । अपि च जीवनस्य सौकर्याणामुपलब्धावपि विज्ञानस्य योगदानं वर्तते । परन्तु वेदान्तचिन्तनाभावे एतत् विज्ञानं विनाशकारकं , स्वार्थवर्धकं च भवितुमर्हति। अतः वेदान्तविज्ञानयोः योगेन मनुष्यस्य चिन्तनं विवेकयुक्तं भवति। तेन मानवतायाः अधिकसुखं च मिलति । स्वामिमतानुसारं वेदान्तेन साकं भारतीयजनतायै सम्पन्नता समृद्धिः च आवश्यकी, यत् विज्ञानसमन्वयीभूतौद्योगीकरणात् आनेतुं शक्यते । अतः पाठ्यक्रमे वैज्ञानिक-साङ्केतिक-औद्योगिकशिक्षायै महत्त्वपूर्णस्थानं दातव्यम् । शिक्षायाः पूर्णतायै शिक्षायां कलानाम् उपेक्षा न कर्तव्या । स्वामी वदति - एशियावासिनाम् आत्मा कलामयः भवति । एते कलारहितवस्तूनाम् उपयोगं न कुर्वन्ति । कला अस्माकं धर्मस्य एकाङ्गं भवतीति ते जानन्ति ।

अयं भारतीयजीवनस्य सर्वभागेषु कलात्मकताम् अपश्यत् । एवं शिक्षायां कलासाधनार्थं स्थानं दातव्यम् इति बलेनोक्तवान् । भाषा अध्यापनदृष्ट्या स्वमिनां विचारः व्यवहारिकः एवं समन्वयवादः च भवति । पाश्चात्त्यादर्शाः भारतीयानाम् अनुपयोगिनः इति चिन्तयन्नपि विज्ञानशिक्षार्थम् आंग्लभाषा आवश्यकी इति अवोचत् । स्वामी देशस्य अख़ण्डतायै सर्वमान्यभारतीयभाषायाः आवश्यकतां प्रतिपादितवान् । अनया दृष्ट्या सर्वेभ्यः बालकेभ्यः अन्तःप्रादेशिकविनिमयार्थं सार्वदेशिकभाषाभ्यसने उपदेशमदात् सामान्यज्ञानार्थं मातृभाषां सर्वापेक्षया शक्तिमयमाध्यमत्वेनाभ्युपगतवान् । एवं प्रारम्भिकशिक्षायां माध्यमरूपेण मातृभाषाद्वारा अध्यापने बलं दत्तवान् । मातृभाषायां शिक्षा प्रादेशिकभाषाणाम् उन्नत्यै आवश्यकी भवति चेदपि स्वामी संस्कृतभाषां सर्वोपरि मनुते । तस्य मतानुसारं संस्कृतस्य ध्वनिमात्रं अस्माकं जातेः कृते शक्तिं क्षमतां, प्रतिष्ठां च प्रदाति । स्वामी वदति केवलं

प्रादेशिकभाषामाध्यमेन शिक्षाप्रदानं, विचारावगमनं वा शिक्षा न भवति । किन्तु संस्कृतेरपि प्रदानावश्यकता वर्तते । यद्यपि समाजः विकासम् औन्नत्यं वा प्राप्नोतु नाम परन्तु यावत् जनसामन्ये संस्कृतभाषायाः प्रचारः नैव क्रियते तावत् समाजस्य विकसितावस्थायां स्थायित्वं न भवति । अनेन मानसिक-बैद्धिक-आध्यात्मिकशिक्षया साकं शारीरिकशिक्षायाः अपि समानमहत्त्वं दत्तम्। अयम् आध्यात्मिकबलेन साकं शारीरिकबलमपि आवश्यकमिति मन्यते । यूनां सम्मुखे भाषणदानसमये एकवारं स्वामी अवोचत् - यत् गीतायाः मर्म ज्ञातुं शारीरिकशक्तिः आवश्यकी । शक्तिरेव जीवनं परमसुखम् अजरम्, अमरजीवनं च भवति । दुर्बलतैव मृत्युः, इयं कदापि दुर्गमपीडा वर्तते ।

**शिक्षणविधिः -** स्वामिविवेकान्दानुसारं ज्ञानप्राप्तेः एकमात्र विधिः भवति एकाग्रता । यावती एकाग्रतायाः शक्तिः भवति, तावदधिकं ज्ञानं प्राप्तुं शक्यते । किमुत पादुका परिष्कारकर्तापि (Polisher) एकाग्रताकारणादेव स्वकार्यं सम्यक् कर्तुं प्रभवति । एवं पाचकोऽपि एकाग्रताकारणादेव स्वादु पाकं कर्तुं प्रभवति । एकाग्रतातः अतिरिक्तरूपेण, अनासक्तिः (Detachment) अपि अत्यन्तप्रबला शक्तिः भवति। (अनासक्तेरभावे एकाग्रता नायाति ) स्वामी लिखति -'शिक्षायाः मूल्यं तथ्यानां संग्रहो न । किन्तु एकाग्रता इति मन्ये यदि पुनः मया शिक्षा प्राप्तव्या भवति चेत् एकाग्रता-अनासक्तिरूपशक्तिद्वयस्य विकासद्वारा एवं मनोरूपस्य निर्दोषयन्त्रस्य साहाय्येन इच्छामात्रात् तथ्यानां सङ्कलनं कर्तुं शक्नोमि' ।

स्वामी आधुनिकभारतीयपरिस्थितीनां प्राक्कल्पनारूपेण यत् समन्वयकारिदृष्टिकोणेन प्रस्तुतवान् तस्मिन् बहु किमपि अद्यतनपरिस्थितिषु ग्रहणीयमस्ति । वास्तवरूपेण वेदान्तविज्ञानयोः समन्वयस्य एतादृशी आवश्यकता प्रबलरूपेण कदापि नासीत् तादृशी आवश्यकता अधुना वर्तते । स्वामिविवेकानन्दस्य विचारः सार्वभौममहत्त्वसम्बन्धी भवति। स्वामिनं केवलं हिन्दूदार्शनिकः इत्युक्त्वा तस्य विचाराणां संकीर्णतायाः सीमायाम् आबन्धनम् उचितं न भवति । स उवाच - 'वयं मानवनिर्माणस्य धर्मं वाञ्छामः । वयं मनुष्यस्य निर्माणकरणरूपसिद्धान्तम् इच्छामः, एवं वयं मानवस्य सर्वाङ्गीणनिर्माणस्य शिक्षाम् अभिलषाम' इति ।

# महात्मागान्धिमहोदयस्यशिक्षादर्शनम्

महान् व्यावहारिको दार्शनिको राजनिको राजनीतिज्ञः शिक्षाशास्त्री च 'मोहनदसः करमचन्दः गान्धी' इत्यस्य महोदयस्य जन्म गुजरातप्रान्तस्य काठियावाडक्षेत्रस्य पोरबन्धरनामके स्थले अक्टूबरमासस्य द्वितीयायां तारिकायां 1866 तमेऽब्दे अभवत् ।

गान्धीमहोदयस्य जीवनदर्शनं भारतीयानाञ्जीवने समाजे च क्रान्तिमुत्पादितवान् । एतादृशोऽन्यो निदर्शनो मानवजातेरितिहासे नोपलभ्यते । गान्धिनो जीवनदर्शनस्य विश्लेषणेन वयमेतेषु चत्वारि महत्त्वपूर्णानि तत्त्वानि प्राप्नुमः।

गान्धिमहोदयो राजनीतिक्षेत्रे समाजसुधारस्य, सत्यस्य, अहिंसायाश्च क्षेत्रे महत् साफल्यं प्राप्तवान् । अनेनैव कारणेन शिक्षासिद्धान्तक्षेत्रे व्यवहारे च प्रदत्तं तस्य योगदानं जनैः न्यूनमेव स्मर्यते । वस्तुतः शैक्षणिकविचारकेषु तस्य श्रेष्ठं स्थानं वर्तते । स स्वकीयजीवनस्य प्रारम्भिके काल एवानुभूतवान् यत् सामाजिकस्य, आर्थिकस्य, नैतिकस्य प्रगतेर्विकासस्य चाऽऽधारः 'शिक्षा' एव वर्तते इति तस्य शिक्षादर्शनं तस्य जीवनदर्शननेन प्रभावितमासीत् ।

विंशतितमशताब्द्याः आरम्भे पञ्चाशत् (५०) वर्षेषु भारतीयजनजीवनस्योपरि सर्वाधिकः प्रभावः महात्मागान्धेः आसीत् । तत्र कारणं तस्य तत्त्वचिन्तनं केवलं वैचारिकमव न किन्तु प्रत्यक्षानुभूतेः तथा प्रयोगस्योपरि आधारितमासीत् । सर्वोदयदर्शनं वेदान्तदर्शनस्य एका नूतनव्याख्या भवति, यस्यां व्याख्यायां केन्द्रबिन्दुः व्यक्तितः आरभ्य क्रमेण वृद्धिं प्राप्य समष्टिपर्यन्तं भवति । आत्मोदयेन साकं सर्वोदयः भवतु । 'यदि सर्वेषाम् उदयः भवति चेत् व्यक्तेः उदयः स्वाभाविकेन जायते । इयं विचारधारा साम्यवादिनी भवितुमर्हति, सर्वोदया न । सर्वोदयः एतत् वचनं विपरीतं कृत्वा एवं वदति यत् यदि प्रत्येकं व्यक्तेः उदयो जायते तर्हि समाजस्य उदयो जायेत ।

आत्मा, परमात्मा, सृष्टिः, इत्यादिविषयसम्बन्धे सर्वोदयविचाराः एवं भवन्ति, ये विचाराः वेदान्तस्य अन्तर्गतरूपेण उक्ताः वर्तन्ते, अतः तेषां पुनरावृत्तिकरणेन कोऽपि लाभः नास्ति । गान्धिः सम्पूर्णभारतीयदर्शनात् द्वयोः प्रमुखतत्त्वयोः चयनम् अकरोत् । प्रथमं तत्त्वं सत्यं, द्वितीयं तत्त्वम् अहिंसा । सत्यमधिकृत्य गान्धिः एवं

लिखति - 'मे सत्यं सर्वोन्नतसिद्धान्तः, यस्मिन् अनेके अन्ये सिद्धान्ताः अपि अन्तर्भवन्ति । एतत् सत्यं वाण्याः सत्यत्वं नास्ति परन्तु विचाराणां सत्यता भवति । तथा एतत् केवलमस्माकं मान्यतासम्बन्धसत्यमेव नास्ति परन्तु परमसत्यं, सनातनसिद्धान्तः अर्थात् ईश्वरो भवति'। ' इयं सत्यस्य शक्तिः हितकारिणी भवति अहितकारिणी वा ? मम एतत् अशुद्धतः हितं करोतीति ज्ञानं वर्तते । कारणम् अहं पश्यामि यत् मृतौ जीवनं जागरितमस्ति, असत्ये सत्यं जागरितमस्ति , अन्धकारे प्रकाशस्य जागरणं भवति अतः मम निष्कर्षः अस्ति यत् ईश्वरः जीवनं, सत्यं, ज्योतिः, स्नेहश्च भवति, सः परमेश्वरः भवति '। गान्धेः विचारे सत्येश्वरौ परस्परं पर्यायौ स्तः, तथा ईश्वरप्राप्तेः एकमात्रसाधनम् अहिंसा भवति । अहिंसा एव एकमात्रनैतिकाधारः, यस्मात् अन्ये सर्वे नैतिकगुणाः आविर्भवन्ति।

सर्वोदयाहिंसायाः विचारः अद्वितीयः भवति । गान्धिमहाशयः अहिंसायाः व्यक्तिवादि नैतिकाधारस्य सामाजिकरूपप्रदानमकरोत् । अहिंसा केवलं व्यक्तेः धर्म एव न, अपितु अस्याः व्याप्तिः राजनीतिः, अर्थनीतिः, शिक्षा, विज्ञानम् इत्यादिषु सर्वेषु क्षेत्रेषु भवितव्या । गान्धिमहशयस्य समग्रदर्शनम् एतत् तत्त्वद्वयावलम्बितं भवति । सत्याहिंसयोः आधारेण उद्भूतानाम् उपपत्तीनां संक्षिप्तरूपेण विवरणम् एवं प्रस्तोतुं शक्यते -

१) आयुधानामपेक्षया स्नेहे शक्तिः अधिकतरा भवति । शिक्षायाः क्षेत्रे दण्डस्य अपेक्षया स्नेहः अधिकप्रभावोत्पादकः भवति ।

२) मानवहृदये देवत्वस्य वासो भवति, यदि एतत् सुषुप्तदेवत्वं प्रकाशं प्रति आनेतुं शक्यते चेत् मनुष्यस्य व्यवहारः न्यायपूर्णो भवेत् । मानवीयान्तःकरणे पवित्रदैवीभावनायाः जागरणेन समाजात् शोषणं दूरीकर्तुं शक्यते। शोषणस्य निवारणाय संघर्षस्य हिंसायाः दण्डशक्तेश्च आवश्यकता नास्ति । मनुष्यस्य हृदयं परिवर्तयितुं शक्यते।

३) पारस्परिकसद्भावेन, सहमत्या समाजस्य अनेकसमस्यानां समाधानं कर्तुं शक्यते ।

४) नकारात्मकविरोधापेक्षया विध्यात्मकस्य एवं रचनात्मकस्य कार्यस्य दृढयुक्तिः अधिकप्रभावोत्पादिका भवति।

५) इच्छानां निरन्तरवृद्धिकारणेन व्यक्तेः सन्तोषः न मिलति, तथा समाजात् शोषणस्य निराकरणं कर्तुं नैव शक्यते । शोषणरहितस्य समाजस्य स्थापनार्थम् इच्छानामुपरि नियन्त्रणमावश्यकम् ।

६) साध्यसाधनयोर्मध्ये सामरस्यम् आवश्यकम् । अपवित्रसाधनेन पवित्रस्य लक्ष्यस्य पूर्तिः न भवितुमर्हति।

**शिक्षायाः परिभाषा उद्देश्यानि -**

शिक्षायाः परिभाषां गान्धिः एवं वदति - 'मम आशयः शिक्षाद्वारा बालके तथा मनुष्ये निहितानां शारीरिक-मानसिक-आत्मिक-श्रेष्ठशक्तीनां सर्वाङ्गीणविकासः भवति'[१५]। एनं विचारं गान्धिः अन्यत्र ' सा विद्या या विमुक्तये ' अथवा शिक्षा सा भवति या मुक्तिमभिलक्ष्य प्रवर्तते, अनेन रूपेणापि प्रास्तौत् । अत्रायं प्रश्नः उदेति यत्, एतत् कीदृशं बन्धनं भवति, यस्मात् शिक्षा मुक्तिं प्रापयति । अन्यरूपेण शरीरस्य, मनसः, आत्मनो वा काः श्रेष्ठवृत्तयः भवन्ति, यासां विकासः शिक्षाद्वारा भवति । गान्धि विचारधारायाः प्रमुखव्याख्याकारः 'काका कालेलकरः' अस्याः परिभाषायाः विशदीकरणम् एवं करोति, -" मनुष्यः बन्धने अस्ति सः अज्ञानी भवति । सः स्वस्य प्राकृतिकवृत्तीनां दासः भवति, तथा परिस्थितिभिः बन्धितः अस्ति। फलतः तस्य आत्मा मर्दितः वर्तते। तस्य विकासस्य अवकाशः न दृश्यते । वास्तवशिक्षा बालकं बन्धनेभ्यः मोचयति । वास्तवज्ञानम् अथवा शिक्षा केवलं सैव भवति, या शरीरं रोगात्, एवम् अशक्तातायाः मोचयति , हस्तादिकर्मेन्द्रियाणि अकर्मण्यतातः मुक्तानि करोति, हृदयं कठोरतातः एवम् ईर्ष्यातः मुक्तं करोति तथा सम्पूर्णमनुष्य सर्वप्रकारकबन्धनेभ्यः मुक्तं करोति, भावनाः लोलुपतातः शक्तिं, मदात् तथा आत्मनं क्षुद्राभिमानात् मोचयति ।

उपर्युक्तदिशा गान्धेः योजनायां एतादृश- समाजस्य निर्माणस्य कल्पना आसीत् यत्र दण्डशक्तेः स्थानम् अहिंसा शक्ति : स्वीकरोति, यत्र उच्च-निम्नौ, धनिक-दरिद्रौ , स्वामिभृत्यौ, बुद्धिजीवि- श्रमजीविनौ, शासक -शासितौ इत्यादिकृत्रिमभेदाः न भवन्ति , यः समाजः वास्तवरूपेण वर्गविहीनः समाजः भवति यत्र एकवर्गः अन्यवर्गस्य शोषणं न करोति, यत्र स्पर्धायाः स्थाने सहयोगसिद्धान्तस्य प्रयोगः भवति तथा यत्र साध्यसाधनयोर्मध्ये समरूपता न स्यात् । एतादृशशोषणमोचिते वर्गविहीने

समाजे सर्वेषां प्रगतेः समानोऽवसरः प्राप्तो भवति, अत एव एषः सर्वोदयसमाजः इति नाम्ना व्यवह्रियते । गान्धिः एतादृशप्रकारकसमाजं रक्तहीनक्रान्तिद्वारा आनेतुम् इयेष । तथा एतादृश- समाजस्थापनाय गान्धिः शिक्षां सशक्तं साधनं कर्तुम् अभिलषति स्म ।

शिक्षालक्ष्याणां विवेचनं गान्धिः अनेकरूपेषु अकरोत्, यानि वैयक्तिक-उद्देश्यानि एवं सामाजिकानि इति द्वेधा वर्गीकर्तुं शक्नुमः ।

**वैयक्तिक-उद्देश्यानि -**

**१) चरित्रनिर्माणम् -** गान्धिः चरित्रनिर्माणं शिक्षायाः सर्वोन्नतध्येयत्वेन मनुते । सः स्वात्मकथायां लिखति -

'अहं सदा हृदयस्य संस्कृतेः अथवा चरित्रस्य प्रथमस्थानं दत्तवान् । अहं चरित्रं बालकानां शिक्षायै उचिताधारस्तम्भत्वेन चिन्तयामि, यदि आधारस्तम्भः दृढो भवति चेत् अन्यान् सर्वविषयान् मित्रादिसहायेन बालकः स्वयम् अभ्यसितुं शक्नोति ' ।

चरित्रनिर्माणम् आत्मनः शिक्षात्वेन गान्धिः मनुते । यथा शारीरिकविकासाय शारीरिकः व्यायामः आवश्यकः, बौद्धिकशिक्षायै बौद्धिकाभ्यासस्य आवश्यकता वर्तते तथा आत्मनः शिक्षायै आध्यात्मिकाभ्यासस्य आवश्यकता वर्तते ।

**सामाजिक-उद्देश्यानि -**

**१) उत्पादक-नागरिकः -** गान्धिमतानुसारं शिक्षाद्वारा प्रत्येकं बालकस्य विकासः उत्पादकनागरिकस्य रूपेण भवितव्यः । यस्मिन् समाजे केचन जनाः एव उत्पादनं कुर्वन्ति , तथा अन्ये जनाः तेषां स्वेदार्जितधनेन जीवन्ति, सः समाजः सर्वोदयसमाजः न भवितुमर्हति । शिक्षायाः एकमुद्देश्यमस्ति सर्वेषु बालकेषु उत्पादनशक्तेः विकासः।

**२) सर्वोदयसमाजाय सेवाभावी नागरिकः -**

शिक्षाद्वारा एतादृशाः नागरिकाः उत्पद्येरन्, ये गान्धिद्वारा प्रकल्पितसमाजादर्शान् अवगम्य तान् स्वीकर्तुं शक्नुवन्ति तथा तदनुरूपेण जीवितुं शक्नुवन्ति । शिक्षया सामाजिकहिताय तथा सर्वकल्याणाय व्यक्तेः निर्माणम् आवश्यकम् । शिक्षया एतादृशनागरिकाः निर्मेयाः, ये यान्त्रिकसम्बन्धानामपेक्षया मानवीयसम्बन्धानां निर्वाहं कर्तुं शक्नुवन्ति तथा भौतिकमूल्यानामपेक्षया

आध्यात्मिकमूल्यानां कृते जीवने स्थानं ददति। पूर्वोक्तरीत्या गान्धेः मतानुसारं सर्वोदयसमाजस्य स्थापानार्थं शिक्षा सर्वेभ्यः सशक्तसाधनं भवितुमर्हति।

**३) छात्राध्यापकयोः सम्बन्धः -**

गान्धेः चिन्तनानुसारं प्रत्येकस्मिन् बालके दैवीतत्त्वं विद्यते । सर्वे बालकाः समानाः, यतो हि सर्वेषु तत् दैवीतत्त्वं वर्तते । यद्यपि सर्वेषां बालकानाम् आत्मा समानोऽस्ति परन्तु प्रत्येकं व्यक्तित्वं विलक्षणं भवति । व्यक्तित्वस्य इयं विलक्षणता तं समाजस्य कृते अनुपमं योगदानं कर्तुं योग्यत्वेन निर्माति । सर्वोदयसिद्धान्तानुसारं शिक्षायां सर्वेषां बालकानाम् अधिकारः भवति । तथा सर्वेभ्यः शिक्षायै समानावसरः दातव्यः भवति। सर्वोदयदर्शनं बालके दैवीअस्तित्वं स्वीकरोति चेदपि तस्य व्यक्तित्वसम्बन्धिनः शारीरिकस्य एवं भावात्मकपक्षस्य उपेक्षां न करोति। गान्धिः लिखति - 'मनुष्यस्य न केवलं बुद्धिः भवति, नापि पाशविकशरीरं, न वा हृदयं नात्मा वा । समग्रमनुष्यस्य निर्माणे एतेषां सर्वेषां तत्त्वानाम् उचितसमन्वयः आवश्यकः'। बालकस्य शरीरम्, इन्द्रियाणि तथा मस्तिष्कं तस्य व्यक्तित्वस्य बाह्यपक्षः भवति, परन्तु बालकस्य व्यक्तित्वनिर्माणे समाजस्य महत्त्वमपि गान्धिः स्वीकृतवान् , तथा विद्यालयस्य गृहस्य च सामाजिकपरिवेशं पवित्रीकर्तुं बलं दत्तवान्।

गान्धेः मतानुसारं सुचारुरूपेण अध्ययनाय पवित्रं जीवनमावश्यकम्। गान्धिः एवं लिखति-'युष्माकं शिक्षा सर्वथा व्यर्था, यदि तस्याः निर्माणं सत्य-पवित्रयोः आधारस्तम्भयोरुपरि न कृतम्। भवतु नाम भवान् महान् विद्वान् एव, परन्तु यदि त्वं स्वंस्य जीवनस्य पवित्रताविषये सतर्कः न भवसि तदा सर्वमपि व्यर्थं भवति'। 'अस्माकं सम्पूर्णशिक्षा वेदपाठः, संस्कृत-ग्रीक्-लेटिन्-भाषाणां शुद्धं ज्ञानं सर्वं व्यर्थं भवति, यदि एतेषां द्वारा अस्माकं हृदयस्य पवित्रतायां वृद्धिः न भवति '। सर्वोदयशिक्षाप्रणाल्यां शिक्षकस्य स्थानम् उन्नतं भवति । गान्धिः लिखति-'यस्य अध्यापकस्य विषये मम मनसि सम्मानः न स्यात् तस्य विद्यालये पठनार्थम् आगमनस्य कारणं जायते परन्तु स्वाध्यापकं प्रति अनादरस्य अपमानस्य च भावः मया नावगतं भवति । एतादृशाचरणम् अशिष्टता भवति तथा अशिष्टता हिंसा भवति'।

गान्धिः छात्र-अध्यापकयोः सम्बन्धम् अभौतिकं आत्मिकसम्बन्धरूपेण मनुते । तन्मते अध्यापकानां सजीवसम्पर्केण स्थित्वा बालकः पुस्तकानामपेक्षया

अध्यापकजीवनात् अधिकं ज्ञानं प्राप्नोति। गान्धिः लिखति- 'अहं चिन्तयामि बालकाः पुस्तकानां तथा व्याख्यानानामपेक्षया अध्यापकानां जीवनात् अधिकं ज्ञातुं प्रभवन्ति । सः अध्यापकः तिरस्करणीयः यः मुखात् एकं वाक्यमुक्त्वा जीवने भिन्नप्रकारेण व्यवहरति'। आचार्यः अध्यापकगणो वा पुस्तकानां पृष्ठेभ्यः चरित्रं न शिक्षितुं शक्नोति । चरित्रनिर्माणं तु तेषां जीवनात् शिक्षेरन् '।

गान्धिः वदति यत् ज्ञानं तु कस्यापि सकाशात् प्राप्तुं शक्यते यथा आवश्यकं वस्तु कस्मादपि क्रेतुं शक्यते, परन्तु प्रत्येकं ज्ञानदाता गुरुः न भवति । गुरुर्भवितुम् आत्मिकसम्बन्धस्य स्थापनम् आवश्यकम्। ज्ञानार्जनस्य प्रथमनियमः विश्वासः, येन विना सम्बन्धः स्थापयितुं न शक्यते । गान्धिः अध्यापकात् एवम् अपेक्षते यत् सः छात्राणाम् आवश्यकतानां रुचीनां तेषां योग्यतानाञ्च अध्ययनं कुर्यात् । यावत् अध्यापकः स्वीयच्छात्रान् नावगच्छति तावत् आत्मिकसम्बन्धस्य स्थापनं न भवितुमर्हति। गान्धिः वेतनस्य अध्यापनकार्यस्य च परस्परमेलनं नोचितमिति अभ्युपगच्छति । शिक्षकः वेतनार्थमेव कार्यं न कुर्यात् यदि सः वेतनेन साकमेव अध्यापककर्म योजयति चेत् अध्यापनकार्यमेव न भवितुमर्हति । अध्यापनकार्ये समर्पणभावः आवश्यकः । गान्धिः लिखति- 'अध्यापकस्य कर्म कक्ष्यापेक्षया कक्षाबहिर्भागे अधिकं भवति । अस्मिन् श्रमिकजीवने, यत्र वेतनार्थम् अध्यापकः कर्म करोति, तस्य समीपे कक्ष्या बहिर्भागे छात्रेभ्यो दानाय समयः न भवति। अद्यतनकाले छात्राणां जीवननिर्माणे चरित्रनिर्माणे च इयम् अधिकसमस्या वर्तते, परन्तु यावत् कक्ष्यायाः बहिर्भागे स्वीयः सर्वः समयः छात्रेभ्यः न दीयते तावत् बहुकिमपि न भवितुमर्हति। तेषां मस्तिष्कस्य निर्माणापेक्षया तेषां हृदयनिर्माणार्थं प्रयत्नः कर्तव्यः। स्वस्य शब्दकोशात् निराशा-कुण्ठाजनकशब्दानाञ्च निष्कासनमावश्यकम्'।

**पाठ्यक्रमः -**

गान्धिमहाशयः तथा विनोबामहाशयश्च जीवनशिक्षाक्रमयोः पार्थक्यं नाङ्गीकृतवन्तौ । सर्वोदयपाठ्यक्रमस्य सिद्धान्तः अस्ति जीवनद्वारा जीवनस्य शिक्षणम्। अर्थात् पाठ्यक्रमः जीवने परिलक्षितः स्यात्, तथा जीवने निरन्तरं शिक्षा प्रचलेत् । अस्माकम् अद्यतनपाठ्यक्रमः जीवनेन वियुक्तः कृत्रिमः वर्तते, यस्मात् जीवनं प्रशस्तं कर्तुं सहायता न मिलति, द्वितीयं तु यदा जीवनस्य आरम्भः भवति तदा

अभ्यसनक्षमताः अपि समाप्ताः भवन्ति । सर्वोदयपाठ्यक्रमजीवनयोर्मध्ये अविच्छिन्नसम्बन्धस्थापनमावश्यकम् ।

सर्वोदयस्य अनुसारं जीवनस्य पञ्च प्रमुखकार्यकलापाः वर्तन्ते, येषामाधारेण पाठ्यक्रमस्य निर्माणं कुर्वीत ।

**१) स्वस्थजीवनस्य कार्यकलापाः -**

अस्यान्तर्गतरूपेण शारीरिकस्वच्छता, शारीरिकं स्वास्थ्यं, परिवेशस्य स्वच्छता, सामुदायिकस्वास्थ्यम् इत्यादिविषयाः आयान्ति । स्वास्थ्यसम्पादनाय शारीरिकव्यायामः, क्रीडनम्, शरीरविज्ञानम्, स्वास्थ्यविज्ञानम्, भोजनविज्ञानम् इत्यादीनामध्ययनं तथा व्यावहारिकाभ्यासः आवश्यकः । अत्र पाठ्यक्रमान्तर्गतत्वेन छात्रेषु स्वस्थस्वच्छयोः ज्ञानदानेन साकं स्वस्थाभ्यासानां, मनोवृत्तीनां तथा दक्षतानां विकासः स्वीकृतः ।

**२) स्वावलम्वन (Self sufficiency) सम्बन्धिकार्यकलापः -**

बालकाः लघुलघुविषयाणां कृते पितृभ्यां तथा अन्येषां जनानामुपरि निर्भराः भवन्ति, कारणम् अनेकान् विषयान् बालकः न जानाति, अथवा सः अशक्तः, अथवा तस्य अभ्यासाः अनेन प्रकारेण न निर्मिताः । परनिर्भरता अशिक्षायाः चिह्नं भवति । पाठ्यक्रमेण एतादृशप्रकारस्य ज्ञानं तथा क्षमताः प्राप्येरन् यस्मात् बालकः स्वावलम्बी भवेत् । अस्यान्तर्गतत्वेन भोजननिर्माणसामर्थ्यं, सोवनसामर्थ्यं, विनिमयकरणसामर्थ्यं, दैनन्दिनजीवने गणनसामर्थ्यं, शाकादीनाम् उत्पादनसामर्थ्यम् इत्यादिकुशलताः सम्मिलिताः भवन्ति । मातृभाषा, आरम्भिकगणितं तथा सामान्यविज्ञानविषयाः अस्यान्तर्गते आयान्ति ।

**३) मूलभूत(बुनियादी)-मूलोद्योगसम्बद्धकार्यकलापाः -**

सर्वोदयदर्शने मूलभूतवाद-मूलोद्योगयोः शिक्षाक्रमः सर्वापेक्षया महत्त्वपूर्णाङ्गत्वेन स्वीकृतं वर्तते । अनेन कारणेन यदा कदा सर्वोदयशिक्षा उद्योगकेन्द्रितशिक्षा अथवा मूलभूतवादशिक्षा इति नाम्ना अभिहिता भवति । गान्धिमतानुसारं जीवनस्य सर्वमहत्त्वपूर्णक्रिया उद्योगः भवति । यस्योपरि वैयक्तिक-सामाजिकजीवनस्य सर्वाः क्रियाः आश्रिताः भवन्ति । मानवसमाजस्य सम्पूर्णः सामाजिक-सांस्कृतिकविकासः जीवनयापनस्य कलानामनुसरणस्य फलस्वरूपेण जाता वर्तते ।

गान्धिः एवं वाञ्छति स्म यत् प्रत्येकं व्यक्तिः नित्यं श्रमं करोतु एवम् एतादृशस्य 'श्रमगरिम'भावस्य (Degnity of labour) विकासः स्यात्। बुद्धिजीविश्रमजीव्योः कृत्रिमवर्गभेदः लुप्तो भवेत् एवं शिक्षायाः माध्यमात् रक्तहीनसामाजिकक्रान्तेः आविर्भावः भवेत् ।

मूलोद्योगः शिक्षार्थिनं प्रकृतेः सम्पर्कं प्रति आनयति, द्वितीयं सामाजिकजीवनेन साकं तस्य सम्बन्धं योजयति । उद्योगार्थं प्रयुक्तसामग्री अस्माकं प्रकृतितः प्राप्ता भवति तथा मनुष्यस्य हस्तद्वारा तस्याः रूपान्तरणं कृतं वर्तते । रूपान्तरितवस्तु समाजस्य कृते उपयोगि भवति । अनेन प्रकारेण उद्योगः शिक्षार्थिनां प्राकृतिकसामाजिकवातावरणेन सम्बद्धो भवति।

मूलोद्योगस्य चयनविषये गान्धिमहाशयेन केचन मापदण्डाः निर्धारिताः येषु पुनः सर्वोदयविचारधारा प्रतिबिम्बता भवति ।

क) शिक्षाक्रमे प्रवेशप्राप्त्यर्थम् उपयुक्तोद्योगः स एव भवितुमर्हति, यस्य शैक्षिकसम्भावनाः अनन्ताः भवन्ति तथा याः न्यूनातिन्यूनम् अष्टवर्षपर्यन्तं शिक्षयितुं शक्यन्ते । यदि कस्मिंश्चित् उद्योगे दक्षता अल्पसमये एव प्राप्ता चेत् सा मूलोद्योगस्य शैक्षिकदृष्ट्या सम्पन्ना इति मन्तुं नैव शक्यते ।

ख) मूलोद्योगः एवं भवेत् येन बालकस्य सम्पूर्णव्यक्तित्वस्य विकासः भवेत्। मूलोद्योगे विज्ञानं, गणितं, भाषा, समाजशास्त्रम् इत्यादयः सर्वे बौद्धिकविषयाः भावात्मकविकासः, तथा चारित्रिकगुणानां विकासस्य सम्भावनाः निहिताः भवेयुः।

ग) मूल-उद्योगस्य उत्पादन-सञ्चालनप्रक्रियाः अहिंसकाः, समाजहितकारिण्यः, शोषणरहिताः भवितव्याः । अनया दृष्ट्या विकेन्द्रितलघूद्योगः एव पाठ्यक्रमे स्थानं प्राप्तुं शक्नोति । मूलाद्योगः एवं भवितव्यः यस्य सामग्री स्थानीयरूपेण उपलब्धा स्यात् तथा यस्य विक्रयोऽपि स्थानीयरूपेण कर्तुं शक्यते ।

घ) मूलोद्योगः एवं भवितव्यः येन स्थानीयसमुदायस्य स्वस्य उद्योगस्य सेवाम् अधिककुशलतापूर्वकं कर्तुं योगदानं लभ्यते ।

**४) नागरिकजीवनस्य कार्यकलापः -**

अस्यान्तर्गते ताः सर्वाः क्रियाः आयान्ति याः नागरिकरूपेण सामाजिक-राजनैतिक -आर्थिकजीवनयापनार्थं प्रयुक्ताः भवन्ति । सहयोगः- सहिष्णुता-

वैचारिकस्वतन्त्रता इत्यादि गुणानां विकासेन साकम् इतिहासस्य, भूगोलस्य, नागरिकशास्त्रस्य, अर्थशास्त्रस्य च मूलसिद्धान्तानामध्ययनमपि अस्मिन् पाठ्यक्रमे सम्मिलितं भवति।

**५) मनोरञ्जनात्मकः सांस्कृतिककार्यकलापः -**

जीवनस्य एकः महत्त्वपूर्णपक्षः अवकाशस्य सदुपयोगः, भावनानां पोषणञ्च । अस्यान्तर्गतत्वेन ललितकलाः, साहित्यं, धर्मः, नाट्याभिनयः, उत्सवानामायोजनम् इत्यादीनां समावेशः क्रियते ।

अनेन प्रकारेण सर्वोदयपाठ्यक्रमे जीवनमाध्यमेन सञ्जीवनयापनार्थं पाठ्यक्रमः प्रस्तावितः। अयं नूतनसमाजस्य स्थापने माध्यमः भवति ।

**शिक्षणविधिः -**

महात्मागान्धिः समन्वयविधिः इति नामकस्य शिक्षणविधेः प्रवर्तकः । सर्वोदयदर्शनानुसारं जीवनम् अखण्डं भवति परन्तु वयम् अस्माकं सौकर्यार्थं ज्ञानं शाखासु विभाजयामः । शाखासु विभक्तम् अनुशासनात्मकं ज्ञानं बाल्यावस्थायाम् उपयोगि न भवति । आरम्भे बालकः ज्ञानम् एकभागरूपेण गृह्णाति । समन्वयविधेः आधारः ज्ञानस्य अखण्डतायाः सिद्धान्तः। पाठ्यक्रमः व्यक्तित्वस्य सन्तुलितविकासस्य साधनं भवति । व्यक्तित्वस्य त्रयः पक्षाः - ज्ञानम्, भावना, कर्म च , अस्याम् अखण्डतायाम् अन्तभवन्ति । यदा एकस्य पक्षस्योपरि अत्याग्रहो जायते चेत् द्वितीयपक्षस्य उपेक्षा भवति, अस्य परिणामेन असन्तुलितव्यक्तित्वं भवति, यस्य दूरगामी परिणामः इतोऽपि असमीचीनः भवति । बुद्धिजीवि-श्रमजीव्योः वर्गभेदः असन्तुलितव्यक्तित्वयुक्तान् जनान् उत्पादयति। ज्ञानिनः कर्मशून्याः भवन्ति तथा कर्मकारः यन्त्रवत् कार्यं करोति । ज्ञानिनः कर्मणा साकं किमपि सम्बन्धं न स्थापयति तथा श्रमिकः ज्ञानशून्यो भवति ।

**अनुशासनम् -**

सर्वोदयदर्शनानुसारम् अनुशासनं निम्नाङ्कितानाम् अभिधारणानामुपरि आश्रितं वर्तते-

१) बालकः प्रकृत्या दुष्टः न भवति परन्तु सामाजिकवातावरणं तं सज्जनं दुर्जनं वा करोति ।

२) प्राकृतिक-सामाजिक-वातावरणस्य अनुबन्धनद्वारा अनुशासनं दृढीकर्तुं शक्यते ।

३) छात्राणामाचरणस्योपरि अध्यापकाचरणस्य सर्वाधिकप्रभावः पतति ।

४) सदाचारस्य उल्लंघनमपि शारीरिकरोगतुल्यः व्याधिः भवति, अतः व्याधेः निवारणाय शिक्षकस्य सहानुभूतिः आवश्यकी, न दण्डस्य । अनुशासनं व्यवस्थापयितुं सर्वोदयि-शिक्षकः, विद्यालयस्य प्राकृतिकपरिवेशं स्वच्छतया तथा पवित्ररूपेण स्थापनार्थं प्रयासं करोति । इत्थं शिक्षकस्य व्यक्तित्वप्रभावोऽपि न न्यूनी भवति । शिक्षकः छात्रेभ्यः बहुदूरे भवति चेदपि अध्यापकद्वारा क्रियमाणकार्यस्य प्रभावः छात्रस्योपरि परोक्षरूपेण पतति।

अनुशासनस्य भङ्गानन्तरं पुनः अनुशासनं स्थापयितुं प्रयुक्तः सर्वोदयविधिः सत्याग्रहः इति कथ्यते । अस्मिन् विधौ अध्यापकः स्वस्य आत्मशुद्ध्यर्थं प्रायश्चित्तं करोति । अस्य पृष्ठतः अभिधारणा एवं वर्तते यत् छात्रानुशासनभङ्गे अध्यापकस्य आचरणमपि परोक्षरूपेण प्रभावोत्पादकं भवति तथा यदि अध्यापकः स्वस्य आत्मशुद्ध्यै प्रयत्नं करोति छात्रस्य व्यवहारः स्वतः पवित्रः शुद्धश्च भविष्यति ।

सत्याग्रहः अत्यन्तकठिनविधिः भवति, तथा प्रत्येकमध्यापकः एनं स्वायत्तीकर्तुं न प्रभवति । अस्योपयोगं कर्तुं द्वौ आवश्यकौ नियमौ इत्थं भवतः -

१) विद्यार्थिनः कृते अध्यापकविषये श्रद्धा आवश्यकी ।

२) अध्यापकस्य मनसि छात्राणामुपरि क्रोधो न भवितव्यः परन्तु स्नेहः सहानुभूतिश्च स्यात् ।

उपर्युक्तद्वयोः नियमयोः एकस्यापि नियमस्य यदि पूर्तिः न भवति सत्याग्रहस्य विधिः सफलो न भवति। गान्धिः एनं विधिम् अनेकवारं प्रयुक्तवान् , सफलताञ्च प्राप्नोत् ।

## आधुनिकशिक्षायां सर्वोदयस्य प्रभावः

अस्माकमाधुनिकशिक्षाप्रणाल्याः उपरि सर्वोदयस्य सर्वापेक्षया अधिकप्रभावः पतति। स्वातन्त्र्यानन्तरं गान्धिमहाशयस्य सिद्धान्ताधारेण निर्मिता मूलभूतवादशिक्षा राष्ट्रियशिक्षायाः रूपेण स्वीकृतिं प्राप्ता । सर्वकारीयतन्त्रस्य अन्तःक्षेपेण

शिक्षाप्रणाली असफला जाता, परन्तु तस्याः कश्चन प्रभावः अस्माकं शिक्षायां स्थायित्वं प्राप्नोत् ।

१) शिक्षा उत्पादनेन साकं संयोजनविषयः सम्प्रति सर्वमान्यो जातः । अद्य उद्योगः कार्यानुभवस्य रूपेण पुनः अस्माकं शिक्षाप्रणाल्याः अङ्गमभवत् ।

२) ज्ञानस्य अनुभवात् पृथक् करण सम्प्रति सर्वत्र अमान्य जातम्। पाठ्यक्रमस्य आधारेण वास्तविकानुभवः प्राप्तव्यः, अयं सिद्धान्तोऽपि साम्प्रतं सर्वमान्यत्वम् प्राप्नोत् ।

३) अनुशासने लोकतान्त्रिकता आगता, तथा दमनात्मकानुशासनस्य स्थानं सामाजिक-दमनविधिः प्राप्नोति ।

# श्री रवीन्द्रनाथठाकुरमहोदयस्य शिक्षादर्शनम्

श्रीमतो रवीन्द्रनाथठाकुरस्य जन्म बङ्गालप्रान्तस्य प्रख्याते टैगोरनामके वंशे ख्रीष्टस्य 1861 तमेऽब्दे मईमासस्य षष्ठदिनाङ्के कलकत्तानगरेऽभवत् । तस्य पिता महर्षिः देवेन्द्रनाथठाकुर आसीत् । टैगोरवंशः स्वसमृद्धये, कलायै, विद्यायै सङ्गीताय च समग्रे बङ्गालप्रदेशे प्रख्यात आसीत् । रवीन्द्रनाथठाकुरः स्वपितुः देशभक्तिं विद्वत्तां धर्मप्रियतां सुजनताप्रभृतिगुणान् उत्तराधिकाररूपेणाऽऽप्तवान् । यद्यपि सः स्वभ्रातृषु भगिनीषु च कनिष्ठस्तथापि स्वयशसा न केवलं टैगोरवंशं प्रत्युत समग्रमपि देशं गौरवान्वितं कृतवान् ।

रवीन्द्रनाथठागुरस्य सत्यम्, शिवम् अद्वैतमित्यतस्यां धारणयां दृढो विश्वास आसीत् । स ईश्वरं सर्वोच्चमानवरूपे अगणयत् । स अद्वैतवादि आसीत् । ब्रह्मसमाजात् प्रभावितः सःह सर्वेश्वरवादम् अपि स्वीकृतवान् । स ईश्वरस्य सत्तामपि स्वीकरोति स्म । कदाचित् स ईश्वरं मानवदेहयुतं कदाचिच्च निराकारं मनुते स्म । सः सृष्टिम् ईश्वरस्य व्यक्तित्वस्य अभिव्यक्तिरूपेणावगच्छति स्म । स मानवेषु दिव्यगुणानां विकासं वाञ्छति स्म ।

ठाकूरमहोदयस्य प्रतिभा बहुमुखी आसीत् । अयं न केवलं कविः परन्तु दार्शनिकः , कलाकारः शिक्षकोऽपि । अस्य व्यापकजीवनदर्शनम् उपनिषदां चिन्तनेन मननस्य परिणामस्वरूपेण विकसितमासीत् । उपनिषत्सु विवेचितविश्वबोधस्य भावनां ठाकूर् आत्मसात्कृतवान् । प्रकृतौ अनन्तस्य सत्तायाः आभास. भवति, सम्पूर्णजीवजगति एकसत्तां प्रदर्शितवान् । अतः मानवमात्रस्य एकतायाम् अस्य अनन्तविश्वासः वर्तते । ठाकूरमहाशयः वदति - मानवता नाम प्रथमतया अधिकविस्तृततायाः भावुकतापूर्णायाः एवं शक्तिशाल्येकतायाश्च अनुभूतिः । तस्मै अस्य विश्वस्य बाह्यानेकतासु एकतावबोधः जायते । अस्य विश्वस्य अन्तराले अवलोक्यते एकस्य आध्यात्मिकयथार्थस्यानुभूतिं कुर्वन्ति । ठाकूरमहोदयस्य विश्वासः यत् ईश्वरः पूर्णतायाः अनन्तादर्शः भवति । एवं मनुष्यः एतत्पूर्णतां प्राप्तुं शाश्वतप्रक्रिया भवति । अनन्तस्य ज्ञानं एव तस्य शक्तिः, आकाशे ताराणामपेक्षया मनुष्यस्य आत्मनि अनन्तता अधिकतयोपलभ्यते । धात्र्याः मानवमात्रं ईश्वरीय सितारवाद्यस्य स्वर्णतन्त्री

भवति । अतः मानवहृदये सततस्पन्दितपारस्परिकसहानुभूतिः तथा बन्धुत्वस्य भावना सर्वं बाह्यभिन्नताभ्यः अगणितं महत्तरं भवति ।

**शिक्षोद्देश्यानि -**

टैगोरमहोदयस्य विचारधारायाम् आदर्शवादः स्पष्टरूपेण प्रतिबिम्बितः भवति । अस्य विश्वासः वर्तते, यत् प्रत्येकं छात्रस्य प्रकृत्या एव अनन्तमानसिकशक्तिः उपलब्धा भवति । जीवनस्य मौलिकावश्यकताना पूर्त्यर्थम् अस्याः शक्तेः अल्पांशप्रयोगः भवति । तदनन्तरं विपुला शक्तिः अवशिष्टा भवति, यस्याः उपयोगः सर्जनार्थमावश्यकः। एषातिरिक्तमानसिकशक्तिः व्यक्तिं सर्जनस्य विभिन्नदिशासु कार्यरत्यै उत्प्रेरयति। शिक्षायाः एकं प्रमुखकार्यं शिक्षार्थिभिः अस्याः सर्जनात्मकशक्तेः पूर्णरूपेणोपयोगः। शिक्षायाः कार्यं न केवलं जीवनयापनदक्षतानां प्रदानम् , अपि तु बालकेषु अन्तर्निहितसर्जनात्मकतत्त्वस्य विकासः, येन जीवनम् उदात्तम् उत्तमम् आनन्ददायकं च कर्तुं शक्यते । टैगोरमहोदयस्य विश्वासः एवं -

प्रत्येकस्मिन् बालके विलक्षणा प्रतिभा क्षमता च निहिता भवति, शिक्षा प्रतिभामेनां विकासयति । प्रत्येकं व्यक्तेः जन्म उचितलक्ष्यप्राप्त्यै भवति । प्रत्येकं बालः स्वस्य लक्ष्यप्राप्तिदिशायाम् अग्रेसरतु , तन्निमित्तं बालकस्य प्रेरणं शिक्षायाः एकं महत्त्वपूर्णं कार्यं भवति। प्रत्येकं बालकः तस्य वैयक्तिक-सामाजिकजीवने द्वन्द्वस्य (Conflict) अनुभवं प्राप्नोति । यावत् द्वन्द्वभावः भवति, तावत् व्यक्तेः समाजस्य च समुचितविकासः न भवति । शिक्षाद्वारा अस्याः द्वन्द्वात्मकस्थितेः दूरीकरणमावश्यकम् । शिक्षा नैरन्तर्येण एतद्विषयसाधनाय प्रयत्नशीला स्यात्, यत् अस्माकं सांस्कृतिकविसमंजसस्य (Maladjustment) परिहारं कुर्वन्ती स्यात् ।

टैगोर अस्य द्वन्द्वस्य विवेचनं कुर्वन् वदति - यावत् अस्माकं सञ्चयवृत्तेः तृप्तिः नैव भवति तावत् अस्माकम् उपलब्धयः अस्मत्पर्यन्तमेव सीमिताः स्युः । एतासां लाभः अन्यस्मै न दातव्यं भवति । परन्तु वैयक्तिकविकासस्य एका एतादृशी अवस्था भवति यत् वयं क्षुद्रस्वार्थभावेभ्यः बहिः आगत्य यत्किमपि अन्यस्मै वितरितुमिच्छामः । व्यक्तित्वविकासस्य एतत् सर्वोन्नतं लक्ष्यं भवति । जीवनस्य लक्ष्यम् आत्मकेन्द्रित-स्वार्थे नास्ति, आत्मनः त्यागे वर्तते । दीपः यदि स्वतैलमव्ययं स्थापयति तर्हि तस्य जीवनस्य लक्ष्यपूर्णं न भवति । तदा दीपः स्वयम् अन्धकारे भवति, अन्यजनान्

अपि अन्धकारे स्थापयति । दीपस्य लक्ष्यं , सः स्वयं प्रकाशितः स्यात् , तथा सर्वान् अपि प्रकाशयेत्।

आरम्भे स्वस्य निर्माणार्थं पुष्पस्य कृते सारजलमावश्यकम् । परन्तु पुष्पस्य जीवनलक्ष्यम् अपूर्णं भवति, यदि तत् तस्य सुगन्धं स्वस्मिन्नेव संचितं स्थापयति । तस्य पूर्णविकासः सुगन्धवितरणे वर्तते, सुगन्धसञ्चयने नास्ति ।

ठाकुरमहाशयः व्यक्तित्वविकासं महत्त्वपूर्णं मन्यते, कुत इत्युक्तौ एतत् एकमात्रानुपमनिधिः भवति, यत् वयम् अस्मदीयमिति वक्तुं प्रभवामः । परन्तु अस्य विकासः आत्मकेन्द्रितः न स्यात् । वैयक्तिक-सामाजिक-हितद्वन्द्वात् व्यक्तेः मुक्तिप्रदानं शिक्षायाः प्रमुखं लक्ष्यं भवति । ठाकुरद्वारा संस्थापितविश्वभारत्याः आदर्शेषु शिक्षायाः निम्नाङ्कितलक्ष्यनिर्धारणं कृतं वर्तते ।

१) पूर्वपश्चिमसंस्कृत्योः मध्ये समन्वयस्थापनम् ।

२) पाश्चात्त्य विदुषामध्ययनं पूर्वीय दृष्टिकोणे स्यात् तथा सत्यस्य अनुसन्धानं विभिन्न दृष्टिकोणेभ्यः करणीयम्, येन मानवतायाः अधिकाधिकं कल्याणं भवितुमर्हति ।

३) मानवसमग्रतायाः विकासः। यस्यान्तर्गत्वेन न केवलं बौद्धिकविकासः, अपितु इन्द्रियाणां संवेदनशीलता- सम्पादनम्, भावनानां परिष्करणं नैतिकविकासकरणमपि अन्तर्निहितं भवति ।

४) बालकस्य स्वतन्त्राभिव्यक्तेः विकासः।

**टैगोर्मते छात्रः -**

टैगोर महाशयः बालकम् ईस्वरस्य सर्वश्रेष्ठकृतिः इति मन्यते । स्वस्य कवित्वपूर्णेषु वाक्येषु कविः एवं वदति ' बालकः अनन्तसुखयुक्तभूम्यां विहारम् अकृत। परन्तु सः अस्यां भूमौ आगन्तुं निश्चयं कृतवान् । कुत इत्युक्तौ मातुः आलिङ्गनं, तस्याः ओष्ठचुम्बनं स्वर्गसुखापेक्षया अत्यन्तमधुरमासीत् ' । टैगोरमहाशयस्य हृदये बालकानां प्रति अनन्तप्रेम, प्रगाढसहानुभूतिः , करुणा च सततं प्रवहन्ति स्म । गृहे बालकानामुपरि क्रियमाणं कृत्रिमनियन्त्रणम्, तथा विद्यालयस्य कठोरानुशासनञ्च अस्मै न अरोचत। प्रकृतिवादि-रूसो मंहोदयवत् टैगोरमहोदयस्य विश्वासः अस्ति यत् सामाजिककृत्रिमतायाः सर्वग्रासस‌माजे प्रवाहे बालकस्य स्वाभाविकगुणाः, लुप्ताः भवन्ति । एवं सः बालकः समाजस्य कृत्रिममुकुटं धरति। टैगोरमतानुसारं बालकस्य उचितशिक्षा, तेषां प्राकृतगुणानां रक्षा, तेषां विकासश्च भवति ।

बाल्यकाले विद्यार्थिनां कृते प्राकृतिकजीवनेन साकं संपर्कस्थापनाय अवसरः दातव्यः। अनेन न केवलं तस्य शारीरिकविकासः, किन्तु मानसिक-भावात्मक-बौद्धिक-विकासोऽपि सुचारुरूपेण भवति । टैगोरमहशयस्योपरि प्रकृतेः अनिर्वापनीयमुद्रा (अमार्जनीयरेखा) बाल्यकालादेव मुद्रिता । तस्य गृहसमीपे विद्यमानलघूद्यानं, समीपस्थतटाकाः , पुराणवटवृक्षनम्राः शाखाः एते सर्वे तस्य चेतनायाः चञ्चलं कुर्वन्तः अवर्तन्ते। यदा अन्यबालकाः सर्वे विशेषवस्त्रादिकं धृत्वाऽपि शैत्यपीडिताः भवन्ति , तदापि वस्त्रशून्यस्य अस्य लेशोऽपि क्लेशः न भवति स्म । शीतऋतौ यदा हिमपातः भवति तदानीमपि बहिरङ्गछदेरुपरि भागे अटतः तस्य केशाः, वस्त्राणि च आर्द्रीभवन्ति चेदपि तस्य स्वास्थ्योपरि हिमपातस्य प्रभावः किञ्चिदपि न भवति स्म । एवं तस्य बाल्यकालानुभवाधारेण टैगोरमहाशयः निष्कर्षं वदति यत् प्रकृत्यासाकं सामञ्जस्यसम्पादनेन बालकानां स्वास्थ्यस्य रक्षा कर्तुं शक्यते इति । टैगोरमहाशयस्य विश्वासः भवति यत् प्रकृतिरहस्यानां ज्ञानार्थं प्रकृत्यासाकं सामरस्यपूर्विका स्थितिः आवश्यकी । यः नग्नपद्भ्यां भूमिं स्पृशति तस्यैव कठोरता-मृदुता-उच्च-नीचादिरहस्यानाम् अवबोधः भवति । प्रकृतेः बालकं पृथक् कृत्वा प्रयोगशालायाम् अथवा कक्ष्याप्रकोष्ठेषु प्रकृतिसम्बन्धबोधनं टैगोर अनुचितं मनुते । सः लिखति -

'वयं बालकानां कृते भूगोलं पाठयित्वा पृथिव्याः वास्तविकभावम्, एवं व्याकरणं पाठयित्वा सहजभाषाज्ञानं, बालकेभ्यः दूरीकुर्मः। बालकस्य क्षुद् भवति काव्यपठने परन्तु तस्य सम्मुखं तथ्यैः, तिथिभिः पूरिताभिलेखादीनां प्रस्तुतीकरणं क्रियते। बालकस्तु जगति जन्म लभते, परन्तु वयं तम् आधुनिक ग्रामोफोन जगति पातयामः'।

कविः एवं विचारं स्पष्टीकर्तुम् अन्यदुदाहरणं, वदति 'चतसृषु दिक्षु व्याप्ता प्रकृतिः अस्माकमुत्कृष्टा शिक्षिका । प्रकृतिः अस्माकं जीवनस्य सौन्दर्यम् आनन्दः समरसता एवं वर्णयुक्तभावनाः इत्येषां रूपं ददाति । अनेन साक म् अस्माक म् अन्तरात्मविषयकमननार्थं प्रेरणां ददाति'।

मातापितरौ, शिक्षकाश्च बालकीयसहजकार्यकलापं तुच्छम् अव्यवस्थितञ्च चिन्तयन्ति, एवमेव वयं तस्मै शिष्टाचारं स्वच्छाताञ्च शिक्षयामः । कवेः विचारानुसारेण

बालकस्य ये सहजकार्यकलापाः वर्तन्ते, ते तस्य स्वतन्त्रतायाः सहजजीवनस्य च प्रतीकानि वर्तन्ते । तेषां तद्रूपेणैव रक्षणं कृत्वा वयं तस्य सहजगुणान् रक्षितुं शक्नुमः । शिष्टव्यवहारः सति समये स्वयमेव आगच्छेत्, परन्तु समयात्पूर्वं तेषां व्यवहाराणां बालके आरोपणेन तस्य सहजगुणानां विकासोऽवरुद्धो भवेत् ।

**शिक्षकः**

टैगोर्महाशयस्य मते प्रकृतिः अस्माकं सजीवशिक्षिका भवति । सा मनुष्यस्य जीवने महत्त्वपूर्णभूमिकां वहति । मात्रा तुल्यं व्यक्तेः संवेगात्मक- नैतिक- आध्यात्मिक-पोषणकर्त्री भवति । टैगोरमहाशयस्य मतानुसारम् अस्माकं महती शिक्षिका प्रकृतिः , या बालकमपि शिक्षति , एवं शिक्षकः यदि संवेदनशीलः भवति तेन तस्य निरन्तरविकासेऽपि साहाय्यं करोति । वृद्धावस्थायां कविः लिखति - 'मम नेत्राभ्यां बहुदृष्टं वर्तते, परन्तु ते न श्रान्ते । मम कर्णाभ्यां बहुश्रुतं वर्तते, परन्तु तयोः श्रवणपिपासा अधुनापि वर्तते । इदं वाक्यं शिक्षकटैगोरमहोदयस्य वर्तते। तदनुसारं शिक्षकस्य आजीवनं नूतनानुभवानां प्राप्तौ लालस्यम् अधिकाधिकज्ञानार्जनवृत्तिश्च भवितव्येति । कविः अन्यस्मिन् स्थाने एवं लिखति शिक्षकः यावत् पर्यन्तं स्वयमध्ययनशीलः न भवति, तावत् सः वास्तविकरूपेण अध्यापनं कर्तुं न शक्नोति । अध्यापकस्य अध्ययनशीलता पुस्तकाध्ययने एव परिलक्षिता न भवितव्या, अपि तु तस्य वास्तविकाध्ययनसामग्री बालकः, यस्य स्वभावस्याध्ययनम् आवश्यकम् । अधिकशिक्षकाणां कृते बालकाना विषये यः अमनोवैज्ञानिकव्यवहारः वर्तते अनेन टैगोरमहाशयः अत्यन्तदुःखी आसीत् । तेन शिक्षकेभ्यः सूचना दत्तास्ति यत् , अध्यापकैः प्रकृतिरूपिणी शिक्षिकातः एतत् ज्ञानं प्राप्तव्यं यत् प्रकृतिः छात्राणां कृते शिक्षा कथं ददाति ? शिक्षकेण बालकस्य सहजप्रवृत्तिः, भावना, आकाङ्क्षा, भयं, जुगुप्सा इत्यादि विषयान् सहानुभूतिपूर्वकं अवगन्तुं प्रयत्नः करणीयः । टैगोर शिक्षक-छात्रयोर्मध्ये पार्थक्यं नेच्छति, तन्मतानुसारेण उभयोर्मध्ये स्नेहस्य अजस्रधारा प्रवहन्ती स्यात् । अध्यापकछात्रयोर्मध्ये यावत् नैकट्यं भवति तावत् उत्तमं भवति। उन्मुक्तवातावरणे एव शिक्षायाः कार्यं सुचारुरूपेण सम्पादितं भवति ।

**शिक्षणप्रक्रिया**

शिक्षणप्रक्रियायाः त्रीणि प्रमुखतत्त्वानि वर्तन्ते । पाठ्यक्रमः, पाठनविधिः

तथा तत् शैक्षिकवातावरणं यस्मिन् शिक्षणप्रक्रिया चलति । टैगोर मतानुसारं शिक्षणप्रक्रियायाः उपरि सर्वाधिकप्रभावः प्राकृतिकपरिवेशस्य पतति । अतः शिक्षणसंस्थायै स्थानस्य चयनम् अत्यन्तमहत्त्वं भवति । बाल्यावस्थायुवावस्थयोः अनुभवाः तस्यैनां प्रेरणाम् अददुः, यत् स्वतन्त्र-उन्मुक्तप्रकृतेः सम्पर्कं प्राप्य नवविकसितमस्तिष्कं पूर्णतां प्राप्तुं शक्नोति । प्रकृतिः तस्य कलात्मकमस्तिष्कम् असीमानन्देन तथा विस्मयेन पूर्णमकरोत् । 'तस्य धारणा एवमासीत् यत् पृथ्वी एवम् आकाशः, सूर्यनक्षत्राणि, वृक्षफलानि, नदीपर्वतादीनि तथा प्रकृतेः हृदयप्रदेशे स्थितशान्तिः, इति परस्परं जायमानैः चक्रवातैः सम्पर्केण च बालकः सुष्ठु पठति, एवं तस्मात् केवलं शारीरिकस्वास्थ्यमेव नास्ति परन्तु मानसिकभावनात्मकस्वास्थ्ययोः प्राप्तिर्भवति'। शान्तिनिकेतनस्थापनासमये कवेः मनसि एषः विचारः दृढरूपेण आसीत् । एतेन कारणेन आसीत् विश्वभारत्याः स्थापनं नगरस्य कोलाहलपूर्णजीवनात् दूरे शान्तगम्भीरवातावरणे अभूत् ।

टैगोर एवं विश्वसितिस्म, प्रकृतेः सौरभ्यवातावरणे स्थित्या बालकानां सौन्दर्यबोधस्य विकासः भविष्यति एवं तस्य समग्रव्यक्तित्वस्यापि विकासः भविष्यति । प्राकृतिकवातावरणाद् अतिरिक्तरूपेण विद्यालयस्य सामाजिकवातावरणमपि बालकानां शिक्षायां महत्त्वपूर्णस्थानं वहति । तेन भारतस्य प्राचीन-आश्रमव्यवस्थातः प्रेरणा गृहीता यत् यत्र मुक्तप्राकृतिकपरिवेशेन साकं जीवने साधारणता सरलता च आसीत्। पाश्चात्त्येषु अधुनातनकाले भौतिकसुखसौकर्याणां वृद्ध्यर्थं स्पर्धा दृश्यते । परन्तु भारतीयादर्शः आसीत् साधारणः । कवेः अनुसारम् 'दरिद्रता एव सः विद्यालयः वर्तते, यस्मिन् मानवः स्वयं प्रथमपाठम् अथवा सर्वोत्तमप्रशिक्षणं प्राप्नोति । यदि वयं विश्वं जीवनस्य सान्निध्यं प्रति आनेतुम् इच्छामः जीवने सारल्यस्य स्वीकरणमावश्यकम् । समृद्धिः जीवनस्य स्वाभाविकतां नाशयति । कविः लिखति- समृद्धियुक्तजीवनं व्यक्तेः आनन्दस्य गर्वस्य वा साधनं भवितुमर्हति किन्तु व्यक्तेः शिक्षायै उपयुक्तं न भवितुमर्हति। अतएव अहं स्वविद्यालये साधारणरूपेण महान्तं शिक्षकं प्रस्तुतीकरोमि-विद्यालयोपयोगिवस्तूनां विरलतायाः रूपेण। अयमभावः दरिद्रतायाः कारणात् न वर्तते, अपि तु एतदर्थं यत् अनेन संसारस्य व्यक्तिगतानुभवः प्राप्तुं शक्यते'। टैगोरमहाशयस्य भयमासीत् यत् अनावश्यकवस्तूनां

सञ्चयनात् शिक्षायाः स्वाभाविकविधिः छिन्नभिन्नः भवेदिति । शिक्षणविधिसम्बन्धे टैगोर विशेषरूपेण किमपि न लिखितवान् । यत् किमपि उक्तं तस्य सारः एवं भवति पुस्तकस्य शुष्कपृष्ठानामपेक्षया बालकस्य कृते स्वच्छन्दप्रकृतेः उपकरणानां द्वारा शिक्षाप्रदानमावश्यकम्। कविः लिखति - 'अस्माकं मस्तिष्कस्य गवाक्षान् पुस्तकपृष्ठैः पिधातुमभ्यासो जायमानो वर्तते । अस्माकं मानसशरीरे पुस्तकीयोद्धरणानाम् औषधयुक्तपटः (Plaster) संलग्नो वर्तते, यस्य दृढता सत्यस्य प्रत्यक्षीकरणे बाधकं भवति'।

पुस्तकैः पुरातनज्ञानस्य प्राप्त्यपेक्षया स्वानुभवद्वारा ज्ञानप्राप्तौ कविः बलं ददाति। नदी, पर्वतः, मुक्ताकाशः, पवनः, मेघः, कठोरधरित्री इत्यादीनि प्रकृतेः सर्वाण्यङ्गान्युपाङ्गानि च बालकस्य शिक्षायाः सहजप्राकृतिकोपकरणानि भवन्ति। रूसो महाशयस्य अनन्तरं प्रायः टैगोर एक एव शिक्षाशास्त्री भवति, यः प्राकृतिकविधिना शिक्षाग्रहणविषये एतादृशम् अधिकबलम् अदात्। टैगोरमहाशयेन विवेचितपाठ्यक्रमे विभिन्नविचारधाराणां समन्वयो दृश्यते । अस्य समन्वयवादिपाठ्यक्रमस्य निम्नाङ्कितानि त्रीणि सूत्राणि -

१) प्राच्य-आध्यात्मिकसंस्कृतेः तथा पाश्चात्त्यविज्ञानस्य पाठ्यक्रमे समन्वयः अपेक्ष्यते ।

२) उदारबौद्धिक - कलात्मकशिक्षया साकं दक्षतापरकशारीरिकश्रमजन्यशिक्षायाः समन्वयः आवश्यकः । अर्थात् उपयोगितावादस्य एवं कलात्मकतायाः मध्ये समन्वयः आवश्यक ः।

३) धर्म-निरपेक्ष- व्यावहारिकशिक्षया साकं धार्मिक-नैतिक-आध्यात्मिकशिक्षायाः समन्वयः आवश्यकः ।

पूर्वोक्तसूत्राणां सन्दर्भे यदि पाठ्यक्रमं पश्यामः रवीन्द्रनाथटैगोर महाशयः स्वविद्यालये लेखनं, पठनं, गणितं तथा अन्यानुशासनपरविषयैः साकं सङ्गीतं, चित्रकला अन्यललितकलाः तथा हस्तशिल्पादीनामपि पाठ्यक्रमे उपयुक्तस्थानं ददौ । टैगोर मतानुसारं मनुष्यस्य यथा शारीरिकक्षुत् भवति, तथा बौद्धिक-आध्यात्मिकक्षुदपि भवति । अतः शिक्षायाः कार्यं न केवलं शारीरिकमस्तकीयक्षुधः निवारणम् अपि तु बालकेभ्यः आत्मनः भोजनप्रदानम् शिक्षायाः पवित्रदायित्वं

वर्तते। आध्यात्मिकज्ञानं वृथा न भवति। काष्ठव्यापारी एवं चिन्तयति यत् वृक्षस्य पुष्प-पत्राणि वृथा सज्जीकृतानि परन्तु अनेन एतदपि ज्ञातव्यमस्ति यत, यदि पुष्प-पत्राणि विलुप्तानि चेत् वृक्षोऽपि नङ्क्ष्यति। अयं विषयः पाठ्यक्रमाय समन्वयो भवति। केवलज्ञानम् उपयागि न भवति, यावत् जीवनपूर्णं न जायते, एवं जीवनपूर्णतायै ज्ञानात्मकविषयेण हस्तनैपुण्येन साकं कलात्मकस्य एवम् आध्यात्मविषयस्य अध्ययनमावश्यकम्।

टैगोरमहाशयः पाश्चात्त्यविज्ञानं मानवीयकल्याणस्य साधनं मनुते, परन्तु आध्यात्मिकतायाः विहीनं तत् विनाशकारि अपि भवितुमर्हति। अतः भारतीयाध्यात्मिकविचारधारया साकं पाश्चात्त्यविज्ञानस्य समन्वयीकरणमावश्यकम्। टैगोर मातृभाषां शिक्षायाः आधारं मनुते, परन्तु अन्यभारतीयभाषाणामध्ययनं सांस्कृतिकैकतायै उपयोगित्वेन अवगतवान्। अनेन विदेशीयभाषाणामपि पाठ्यक्रमे उचितस्थानं प्रदत्तम्, कुत इत्युक्तौ विदेशीभाषामाध्यमेन वयं विश्वसंस्कृतेः ज्ञानं प्राप्नुमः तथा विश्वे विद्यमानान् सर्वेषां मानवानां परस्परं समीपे आनयने साफल्यं साधयामः।

टैगोरमहोदयः पाठ्यक्रमे इतिहासस्यापि महत्त्वपूर्णस्थानम् अङ्गीकृतवान्, परन्तु सः संकीर्णराष्ट्रियतया परिपूर्ण-इतिहासस्य पाठनं नेप्सितवान्। अयं लिखति अद्यतन इतिहासः अन्ताराष्ट्रियतावादस्य प्रकरणात् आरब्धो भवेत्। यदि वयं संकीर्णरीतिसम्प्रदायान्, विचारान् च व्यवहारे आनयामः, तत् विश्वबन्धुत्ववादस्य विपरीतं भवति, तर्हि वयं भाविनिकाले अनुपयुक्ताः भविष्यामः। अहं जानामि यत् राष्ट्रियगर्वोऽपि किमपि वस्तु वर्तते परन्तु अहं हृदयपूर्वकं वाञ्छामि यत् अहम् एनं विषयं कदापि न विस्मरामि यत्, अस्माकं महर्षयः अनैक्यभावनायाः उन्मूलनाय विशेषरूपेण प्रयत्नम् अकुर्वन्'। व्यावहारिकशिक्षया साकं धार्मिकशिक्षामपि मेलयितुं टैगोर ऐच्छत्। परन्तु धर्मविषये तस्य परिभाषा संकीर्णा नास्ति। 'तदनुसारं धर्मः सा आत्मशक्तिः भवति यः मनुष्यस्य ईश्वरेण तादात्म्यं सम्पादयति'। अस्मिन् संसारे यदा व्यक्तिः आत्मान्वेषणं कुर्वन् अमरत्वस्य आनन्दं प्राप्नोति, अर्थात् स्वस्य श्रेष्ठस्वरूपस्य सम्भावनाऽन्वेषणाय सः मित्रतायाः, सहानुभूतेः शान्तेश्च अभिवर्धनं करोति, तदानीम् कथमपि अन्तरात्मा बाह्यक्रियाकलापान् नियन्त्रयति परिवर्तयति च, अस्य

प्रत्येकस्मिन्नङ्गे मनुष्यस्य ईश्वरीयप्रयोजनाभिव्यक्तिं पश्यति एवम् ईश्वरशब्दार्थस्य सम्पूर्णमाशयम् अवगच्छति । टैगोर औपचारिकरूपेण पाठेषु विभाजितधार्मिकशिक्षां न विश्वसिति । अयं लिखति- 'धर्मः किमपि विभाजनीयवस्तु नास्ति यथा विद्यालये पाठ्यमान पाठ्यक्रमस्य अन्यविषयाणामनुसारं साप्ताहिकरूपेण दैनिकसमयान्तरेषु वा विभागः कर्तुं शक्यते । धार्मिकशिक्षा औपचारिकविषयरूपेण न दातुं शक्यते, इयं शिक्षा विद्यालयस्य आध्यात्मिकवातावरणे आत्मसात्कर्तुं शक्यते । धार्मिकशिक्षायाः फलस्वरूपेण बालकस्य मनसि मानवतां प्रति सेवा, स्नेहः , आत्मसम्मानः, आदरः, करुणा इत्यादि- भावनानां जागरणमावश्यकम् । धर्मद्वारा तस्य जीवने शक्तिः तथा आनन्दस्य स्फुरणे भवितव्ये ।

**अनुशासनम् -**

रूसोमहाशयवत् टैगोर महाशयोऽपि समाजसम्मताचरणानां बालकस्योपरि बलपूर्वकस्थापनं नेच्छति, परन्तु एषः एतदपि नेच्छति यत् बालकस्य कृते किमपि सामाजिकाचरणमेव अशिक्षणम् । रूसो नकारत्मकशिक्षायां विश्वासं कृतवान्, अस्य चिन्तनम् एवमासीत् सर्वोत्तमः अभ्यासः नाम यस्य कस्यापि अभ्यासस्य अभावः एव। रूसो सामाजिकवातावरणात् बालकं रक्षितुम् इच्छति, परन्तु टैगोर अस्मिन् अनुशासनस्य रहस्यमङ्गीकरोति यत् विद्यालयस्य वातावरणं(भौतिकं तथा सामाजिकं) अनुकूलरूपेण उद्दीपकरूपेण च निर्मेयं यस्मिन् चरित्रस्य विकासः विना बाह्यारोपणेन स्वतःसिद्धो भवेत् । टैगोर स्वस्य एकस्य प्रयोगस्य उल्लेखनं करोति, यस्मिन् ग्रामान्तरात् केचन बालकाः आगत्य शान्तिनिकेतने प्रविष्टाः । ग्रामस्य उपेक्षितवातावरणकारणात् शरीरेण, बुद्ध्या च ते दुर्बलाः आसन् तथा तेषां व्यवहारोऽपि शिष्टः नासीत् , परन्तु तेषां स्वभावे नीचता, स्वार्थपरता, कृतघ्नतादयः नासन् । शान्तिनिकेतने कतिपयदिनस्थित्यनन्तरं , तेषु उत्सर्गः मैत्री- सहायताभावना-निस्वार्थभावनादीनां विकासः जातः। भोजननिर्माणे, वस्त्रनिर्माणे , वृक्षलतारोपणे , स्वस्य स्थितीनां समीकरणे अन्यबालकानां कृते गुप्तरूपेण सहायदाने एते विशेषानन्दम् अनुभूतवन्तः । अनेन टैगोर निष्कर्षं निष्कासितवान् यत् विद्यालयस्य वातावरणं बालकस्य अनुशासने महत्त्वपूर्णभूमिकां निर्वहति इति । टैगोरमहाशयः विद्यार्थिनां विचारान् अनुभूतीनां, मूल्यानां च प्रत्यक्षरूपेण अनुशासनं कर्तुं प्रयत्नं न कृतवान् , परन्तु

कल्पनात्मकाधारस्योपरि वातावरणस्य अनुभव-पर्यन्तक्रियाकलापानाम् एवं रूपं दत्तवान्, यस्य फलस्वरूपेण बालकेषु अनुकूलप्रतिक्रिया (Response) भवति । अयं लिखति - 'बालकेषु प्रकृतिं प्रति यः सहज अनुरागः भवति तथा मानवीयवातावरणे विकासशीलसम्बन्धान् प्रति या संवेदनशीलता (Sensitivity) भवति, तस्याः अहं स्वस्य विद्यालयस्य बालकेषु साहित्येन उत्सवकार्यैः धार्मिकोपदेशैश्च जागरणं कर्तुं प्रयत्नम् अकरवम्, या संसारेण आत्मीयसम्बन्धस्थापने समर्था जाता तथा यस्मात् सम्पूर्णसंसार एव अप्रत्याशितरूपेण स्वगृहत्वेन प्रतीयते ।

श्रीरामचन्द्रन्महोदयस्य मतानुसारं टैगोरद्वारा परिकल्पितानुशासनस्य निम्नाङ्कितपरिणामः अपेक्षितः आसीत् - 'टैगोरमहाशयस्य इच्छा आसीत् बालकाः-बालिकाश्च निर्भयाः भवन्तु, तेषां मस्तिष्कः उद्घाटितः तथा उन्मुक्तः स्यात्, ते आत्मनिर्भराः भवेयुः , तेषु अनुसन्धानस्य एवं स्वालोचनायाः प्रेरकः एतादृशमनोभावः स्यात्, येषां मूल्यानि भारतभूमौ तु अत्यन्तगभीररूपेण भवन्तु, परन्तु सर्वस्मिन् विश्वे व्याप्तानि स्युः तथा मेलनं सोदरभावः सहयोगश्च एधितः स्यात् , एवं भौतिकरूपेण तथा आध्यात्मिकरूपेण उन्नतौ सहायकश्च स्यात्' । टैगोरमतानुसारम् अनुशासनस्य सम्बन्धः अस्माकं समग्रजीवनेन वर्तते । शिक्षा गतिशीला एवं प्रभावपूर्णा तदा भवितुमर्हति यदा अस्य सम्बन्धः अस्माकं सम्पूर्ण-आर्थिक-सौन्दर्यात्मक-आध्यात्मकजीवनेन वर्तते । विद्यालये एतादृशवातावरणस्य उपस्थितिः इष्यते यस्यां विद्यार्थिनां रचनात्मकशक्तीनां विकासाय अवसरः मिलेत्। ध्वंसात्मिका तथा असंस्कृतावृत्तिः तदा प्रबला भवति यदा विद्यालयस्य वातावरणे रचनात्मकशक्तीनां कृते कुण्ठितकरणतत्त्वानि भवेयुः ।

रवीन्द्रनाथटैगोरमहाशयः भारते प्रकृतिवादस्य प्रणेता इति वक्तुं शक्यते, परन्तु भौतिकप्रकृतिवादस्य लोकं त्यक्त्वा आध्यात्मिकप्रकृतिवादस्य आश्रयं स्वीकृतवान् । रूसोमहाशयेन समम् अस्य महाशयस्य विचारेषु तात्कालिक-कृत्रिमसामाजिक-परम्पराणां विषये आक्रोशः द्रष्टुं शक्यते । कविरिति कारणात् अस्य शैक्षिकविचारेषु कल्पनायाः वर्णः भवति । आदर्शः, दैवी लोकस्य स्वप्नः तथा सुन्दरजीवनस्य दृश्यं भवति । अयं स्वविचारान् विश्वभारतीरूपेण साकारमकरोत् । विश्वभारत्याः मानववादः विश्वैकता, सर्जनात्मकता, कलात्मकाभिव्यक्तिः,

स्वतन्त्रता, सौन्दर्यबोधः, प्राकृतिकजीवनम् इत्याद्यादर्शाः भारतस्य अन्यशिक्षणसंस्थाभ्यः प्रकाशस्तम्भाः बभूवुः। अद्यापि भारतस्य अनेकशिक्षणसंस्थाः विश्वभारत्याः आदर्शानाम् अनुकरणं कुर्वन्ति तथा तान् स्वकीयान् कर्तुं प्रयत्नं कुर्वन्ति । टैगोरमहाशयस्य सर्वापेक्षया महद्योगदानं तस्य समन्वयवादः । भौतिक-आध्यात्मिकजीवनयोर्मध्ये समन्वयः, प्राच्यपाश्चात्त्ययोर्मध्ये समन्वयः इत्यादिविचाराः अद्यतनकाले समग्रविश्वे दृढायमानाः वर्तन्ते । अन्ताराष्ट्रियसद्भावनार्थं शिक्षायाः विचारः द्वितीयविश्वयुद्धात् अनन्तरम् आगतः, परन्तु टैगोरमहाशयः अस्य आरम्भं विश्वभारत्यां विंशतितमशताब्देः आरम्भे एव अकरोत् । एवं भारतीयशिक्षादर्शनस्योपरि टैगोर महाशयस्य अमार्जनीय मुद्रा स्पष्टतया द्रष्टुं शक्यते ।

# श्री अरविन्दस्य शिक्षादर्शनम्

शिक्षायां राष्ट्रियाऽऽन्दोलनस्य प्रणेतुः श्री अरविन्दघोषस्य जन्म अगस्तमासस्य पञ्चदशदिनाङ्के ख्रीष्टस्य 1872 तमेऽब्दे कलकत्तानगरस्य घोषपरिवारेऽभवत्। तस्य पितुर्नाम श्रीकृष्णधनघोषो मातुश्च श्रीमती स्वर्णलतादेवी इत्यासीत्। तस्य पितरौ पाश्चात्यसंस्कृत्याः अतीव प्रभावितौ आस्ताम्। श्री अरविन्दस्य प्रारम्भिकी शिक्षा बङ्गालप्रान्तस्य दार्जिलिंगनगरस्य 'लॉरेटो कान्वेण्ट' इति विद्यालये जाता। अत्र स वर्षद्वयपर्यन्तमध्ययनं कृतवान्। ख्रीष्टस्य 1876 तमेऽब्दे सप्तवर्षे वयस्येव स्वभ्रात्रा भगिन्या च सह शिक्षामवाप्तुं श्रीअरविन्दः इङ्ग्लैण्डदेशं गतः। तत्र स 'ड्रिवेड' दम्पत्त्याः सान्निध्ये लेटिनभाषायाः अध्ययनं कृतवान्। ईसायाः 1885 तमे वर्षे असौ लण्डननगरस्य 'सेण्ट-पॉल-विद्यालये' प्रविष्टवान्। ततः उच्चशिक्षायै ख्रीष्टस्य 1890 तमे वर्षे कैम्ब्रिजविश्वविद्यालये प्रवेशं लब्धवान्। तदानीमेव आङ्ग्लभाषया सह ग्रीक, फैञ्च, जर्मनी, इटालियन स्पेनिशभाषायाश्चाध्ययनं कृतवान्।

श्रीअरविन्दस्य शिक्षादर्शनम् आध्यात्मिकसाधनायाम्, ब्रह्मचर्ये योगे चाऽऽधारितम् आसीत्। तस्य विश्वास आसीद्यत् अनया शिक्षया मानवस्य पूर्णो विकासो न सम्भवति। श्रीअरविन्दस्य कथनमासीद्यत् – 'सच्छिक्षा यथार्था वा शिक्षा केवलं सैव वर्तते या मानवस्य अन्तर्निहिताः समस्ताः शक्तीः विकासयति यया च सः पूर्णतः लाभान्वितो भवति' इति।

श्री अरविन्दमहाशयः योगदर्शनस्य पुनः स्थापनमकरोत् तथा आधुनिकपरिस्थितिषु तस्य पुनर्व्याख्यामकरोत्। तस्य दर्शनम् अनुभवातीतसर्वाङ्गयोगदर्शनमिति नाम्ना अभिहितम्। कुत इत्युक्तौ श्री अरविन्दः योगदर्शनस्य कमपि विचारम् अस्वीकृत्य सत्यावलोकनार्थं विभिन्नमार्गान् समरूपेण, समजातीयेन, समन्वितरूपेण च आबध्य प्रयत्नम् अकरोत्। सर्वाङ्गिकतया साकं श्री अरविन्दः केवलम् इन्द्रियानुभव सर्वोन्नतज्ञानं न मनुते, अपि तु एनं सर्वापेक्षया निम्नकोटेः ज्ञानमिति मनुते। तस्यानुसारं ज्ञानस्य अनेकाः कोटयः वर्तन्ते तथा सर्वोन्नतकोटिः आध्यात्मिकानुभूतिः भवति, यत् वस्तुतः अस्मिन् जगति प्राप्तुं शक्यते।

**शिक्षायाः उद्देश्यानि :-**

श्री अरविन्दस्य मतानुसारं शिक्षायाः उद्देश्यं छात्राणां कृते शरीरस्य, मस्तिष्कस्य तथा आत्मादीनां सर्वाङ्गीणविकासः, येन तेषु निहितं दैवीसत्यं प्राप्तुम् एतानि उपकरणरूपेण प्रयोक्तुं शक्यन्ते । शिक्षायाः उद्देश्यं छात्राणां कृते स्वयं समग्ररूपेण विकासप्राप्तये सहायतादानम् । येन ते स्वयं विश्वस्य एकाङ्गरूपेण आत्मानमवगन्तुं शक्नुवन्ति । कुत इत्युक्तौ इदं विश्वमपि छात्रेषु निहितसत्यमेव बहुरूपेण अभिव्यनक्ति । श्री अरविन्दः लिखति-

'बालकीयशिक्षा तस्य प्रकृतौ यत् किमपि सर्वोत्तमं, सर्वाधिकशक्तिशालि, सर्वाधिकान्तरङ्गं जीवनपूर्णं च वर्तते, तस्य अभिव्यक्तिः भवेत्, मनुष्यस्य क्रियायाः विकासस्य च अपेक्षितरूपनिर्माणं कर्तव्यम्, तदपेक्षितरूपन्तु तस्यान्तरिकगुणस्य शक्तेश्चानुरूपं भवति । तेन नूतनवस्तूनि अवश्यं प्राप्तव्यानि परन्तु सः वस्तूनि सर्वोत्तमरूपेण, सर्वाधिकप्राणमयरूपेण स्वयं स्वस्य विकासस्य, प्रकारस्य, अन्तरङ्गशक्तेश्च आधारेण प्राप्स्यति '[२४]।

शिक्षायाः लक्ष्यं केवलं व्यक्तेः प्रकृत्यैव निर्धारितं न भवति, परन्तु व्यक्तेः सामाजिकपक्षोऽपि महत्त्वपूर्णो भवति । श्री अरविन्दः दैवीसमाजस्य, दैवीमानवस्य च कल्पनां करोति, अतः शिक्षायाः उद्देश्यं व्यक्तेः समाजस्य च दैवीपूर्णताप्राप्तिः। दैवी समाजस्य कल्पना पाश्चात्त्यविचारः भवति परन्तु श्री अरविन्दः तासां कल्पनानां भारतीयादर्शैः साकं समन्वयं कृत्वा नूतनरूपेण प्रस्तुतवान् । शिक्षायाः लक्ष्यण एवं प्रकारेण सर्वाङ्गपूर्णमनुष्यस्य सर्जनं, यः केवलं व्यक्तिरूपेण नास्ति परन्तु समाजस्य सदस्यरूपेणापि विकसति ।

**सर्वाङ्गदर्शने छात्रः -**

श्री अरविन्दानुसारं विद्यार्थी प्रच्छन्नरूपे सर्वशक्तिमान् चैतन्यः । सः स्वस्य काव्यमयवाण्याम् एतत् तथ्यम् एवम् अभिव्यनक्ति - 'एकः महान्, सर्वशक्तिशाली सर्वज्ञः सार्वभौमसत्ता एकस्मिन् दिने कारणवशात् स्वस्य प्रकृतेः सर्वथा विपरीतमाचरितुं निश्चितवान् , तथा स्वस्योपरि एकमावरणं संस्थाप्य चेतनायाः निम्नतमधरातलं प्राप्य स्वस्य मूलप्रकृतिं प्रच्छन्नां कर्तुं प्रयासमकरोत् । ह्रासस्य अस्यां शृङ्खलाया शुद्धचैतन्य प्रकृतस्वरूपात् पतित्वा अवचेतनस्य, विसंज्ञस्य, जडस्य च स्तरपर्यन्तं प्राप्नोत्। सत्यात्

असत्यं, प्रकाशात् अन्धकारं, जीवनात् मृत्युं प्राप्तवान्, परन्तु अस्मिन् घोरान्धकारेऽपि अयं मूलरूपेण जडवत् नास्ति अतः अयमस्मात् निम्नतरस्तरात् उच्चतमस्तरपर्यन्तं विकासं प्राप्तुं शक्नोति'।

श्री अरविन्दमतानुसारं जीवनमेका अखण्डप्रक्रिया। चेतनायाः अनेके स्तराः भवन्ति, या निम्नस्तरात् उच्चतमस्तरपर्यन्तम् आनेतुं शक्यते। अरविन्दः मानवजीवनस्य विभिन्नावस्थानां मानवविकासस्य विभिन्नस्तरेष मानवीयचेतनायाः अनुभवं प्राप्तवान्, तथा अयमेवं निष्कर्षं वदति यत् वर्तमानमानवसमाजे मस्तिष्कस्य बुद्ध्या दृष्ट्या च विकासस्य चरमपरिणतिः जाता, परं दुर्गममार्गः अधुनापि शिष्टः। साम्प्रतं मानवविकासः एनां स्थितिं प्राप्तः वर्तते, यत्र दैवीसमाजस्य कल्पना साकारं कर्तुं शक्यते, तदनन्तरं विकासः अग्रे न भवति चेत् पराभवः निश्चितः। पराभवस्य निम्नतरस्तरात् प्रायः दैवीतत्त्वस्य मूलस्वरूपं चेतनायाः निम्नतरस्तरोपरि आगत्य चेतनायाः उच्चतरस्तरपर्यन्तं विकसितुं प्रयत्नः क्रियते, एतादृशविकासस्य प्रक्रिया सततरूपेण प्रवाहिता भवति। अस्य पराभवस्य , विकासस्य प्रक्रिया चेतनतत्त्वस्य निम्नतरस्तरप्रकाशेन, शक्त्या, सत्येन च समन्वयार्थमत्यावश्यकी, यतः एतन्माध्यमेन सः मानवजीवनस्य प्रमुखोद्देश्यम् अनुभवातीतसत्य चेतनतत्त्वेषु सम्पूर्णरूपेण रूपान्तरित भवितुमर्हति। छात्रव्यक्तित्वस्य सम्बन्धेऽपि श्री अरविन्दस्य विचारः सर्वाङ्गीणः भवति । सः बालकस्य शरीरम् , प्राणः, मनः, बुद्धिः, आत्मा इत्यादिविभिन्नपक्षाणां समन्वितविकासस्योपरि बलमदात्, यतः सत्तायाः पूर्णता न केवलं शारीरिकरूपेण न आत्मिकरूपेण वा । बालकस्य सर्वाङ्गीणशिक्षायां चेतनायाः विभिन्नस्तराणां समन्वितविकासः आवश्यकः। शिक्षायाः महत्त्वपूर्णमङ्गम् 'अन्तः करणम्' इति कथ्यते । सांख्य-योग-वेदान्तेषु वर्णितस्य अन्तःकरणस्य विभिन्नकोटीनां वर्णनं श्री अरविन्दः स्वीकृतवान् । तन्मतानुसारम् अन्तःकरणस्य प्रथमकोटिः चित्तमिति कथ्यते। एतत् मानसिकसंस्काराणां, स्मृतीनाञ्च सञ्चयस्थलम्। चित्तस्य आवश्यकतायां सत्यां, सक्रियस्मृतिः आवश्यकतानुगुणं पदार्थानां तथ्यानाञ्च चयनं कारयति। द्वितीयकोटिः 'मनः' इति उच्यते। अस्य कार्यम् इन्द्रियैः अनुभवाना ग्रहणम्, प्रत्ययत्वेन विचारत्वेन च रूपान्तरीकरणम् । श्री अरविन्दानुसारं मनः षष्ठमिन्द्रियं भवति, एतत् बाह्यजगतः वस्तून्यतिरिच्य स्वयं स्वीयविषयानपि गृह्णाति । एतान् विषयान् तत् मानसिकप्रभावरूपेण परिवर्तयति ।

तृतीयकोटिः 'बुद्धिः' भवति, अस्याः अध्ययनप्रक्रियायां महत्त्वपूर्णस्थानं भवति । बुद्धेः कार्यमेवं भवति ज्ञान-सामग्र्याः (Knowledge Data) व्यवस्थापनं, तस्याः रचना पुनारचना, विश्लेषणसंश्लेषणम्, वर्गीकरणं तस्मात् निष्कर्षस्य निष्कासनम्। वयं बुद्धिमाध्यमेन कल्पनां कुर्मः, स्मरणं कुर्मः, निरीक्षणं कुर्मः एवं निर्णयं प्राप्नुमः । बुद्धेः कार्यमालोचनम् । स्वस्य आलोचनात्मकशक्त्या भेदं करोति, तुलनां करोति, सामान्यसिद्धान्तनिरूपणे सहायताञ्च करोति ।

अन्तःकरणस्य चतुर्थकोटिः 'साक्षात् अनुभूतिः'" भवति । अस्मिन् अन्यमाध्यमेन विना ज्ञानस्य साक्षात् प्रत्यक्षानुभूतिः भवति । श्री अरविन्दमतानुसारं 'मस्तिष्के तादृशं किमपि ज्ञानं शिक्षयितुं न शक्यते, यत् बालके पूर्वस्मात् सुप्तज्ञानरूपेण अविद्यमानं स्यात्' । अध्यापकः एतासां सुप्तशक्तीनां यौगिकक्रियाद्वारा, साधनाद्वारा वा जागरणं कुर्यात्, बाह्यात् किमपि नूतनज्ञानम् आरोपयितुं नैव शक्यते । अन्तःकरणस्य विभिन्नकोटीनां विकासाय एका सुघटिता योजनापि श्री अरविन्देन प्रस्तुतम्, अस्य विवेचनं पाठ्यक्रमान्तर्गतत्वेन कृतं वर्तते ।

**शिक्षकः -**

अस्यानुसारं शिक्षकः 'इन्स्ट्रक्टर्' नास्ति । तस्य कार्यं स्वात्मावगमने छात्रस्य साहाय्यकरणम् । तस्य कार्यं तथ्यानां प्रस्तुतीकरणं न वर्तते, परन्तु मार्गदर्शनम् । तथ्यात्मकसूचनादानेन शिक्षा न जायते । छात्राणां क्रियात्मकरचनात्मकशक्तीनां विकासं कृत्वा लक्ष्यं प्रति प्रेरणम् । विद्यार्थिनामुपरि स्वविचाराणामारोपणं शिक्षकाय उचितं न भवति । बालकस्य सर्वाणि शारीरिकाणि मानसिकानि अङ्गानि तस्य नियन्त्रणे भवेयुः न तु शिक्षकनियन्त्रणे । यदि शिक्षकः बालकस्य :रुचीः आवश्यकताश्च विज्ञाय तदनुगुणं बालकं कार्येषु सम्मेलयति चेत् तस्य सद्विकासो जायते ।

श्री अरविन्दानुसारं शिक्षकः राष्ट्रियसंस्कृतेः चतुरः वनपालको वर्तते । सः संस्कारस्य मूलेषु सार संस्थाप्य, स्वश्रमेण सिञ्चन् महाप्राणशक्तेः निर्माणं करोति । शिक्षकः स्वस्य गुणदोषाणां तटस्थसमीक्षकः भवेत् । श्री माँ इत्यस्याः ये शब्दाः मातापित्रोः कृते दीयमानोपदेशरूपेण भवन्ति, ते शिक्षकाय अपि उपयोगिनः भवितुमर्हन्ति - 'बालेभ्यः शिक्षादानयोग्यताप्राप्त्यै प्रथमं कर्तव्यमस्ति स्वयम् आत्मनः शिक्षादानम्, स्वीयविषये, सचेतनो भूत्वा स्वस्योपरि प्रभुत्वस्थापनम् , येन वयम् अस्माकं

बालानां समीपे किमपि असमीचीनमुदाहरणं नोपस्थापयामः । एकेनैव उदाहरणेन शिक्षा फलदायिनी भवति यदि भवान् युष्माकं बालकात् आदरमिच्छति स्वस्मै आदरभावः स्थापनीयः तेन प्रतिमुहूर्तं सम्मानयोग्यो भवतु । कदापि स्वेच्छाचारी, अत्याचारी, असहिष्णुः, क्रोधी मा भवतु, यदा युष्माकं बालकः कमपि प्रश्नं पृच्छति तदा भवान् मा चिन्तयतु यत् बालकः भवतः वचनं नावगन्तुं शक्नोति इति तं जडभावेन मूर्खभावेन च मत्वा उत्तरं मा ददातु । यदि भवान् लेशमात्रं कष्टं स्वीकरोति चेत् भवान् सर्वदैव बालकाय भवतः वचनम् अवगामयितुं प्रभवति'।

**शिक्षणप्रक्रिया :-**

शिक्षणप्रक्रियां सुचारुरूपेण चालनार्थं श्री अरविन्दः कांश्चन मौलिकसिद्धान्तान् प्रतिपादयामास, येषामुल्लेखनमत्र सङ्गतं भवति।

१) बालकः स्वशिक्षां स्वयं करोतु , अध्यापकस्य कार्यं बालस्य स्वसुषुप्तशक्तेः अवगमने सहायमात्रकरणम् ।

२) पाठ्यक्रमः बालकस्य प्रकृतेः अनुरूपः भवितव्यः अर्थात् बालकस्य विशिष्टगुणः योग्यता अभिरुचिः इत्यादीनामनुरूपेण भवितव्याः । गीताशब्देषु पाठ्यक्रमद्वारा स्वधर्मस्य विकासः आवश्यकः । अस्य विकासस्य फलस्वरूपेण आत्मानुभूतिः भवति ।

३) पाठ्यक्रमे वर्तमानात् भविष्यं प्रति निकटात् दूरमिति सिद्धान्तः माननीयः। शिक्षायाः आदर्शः, स्वरूपञ्च स्वदेशीये भवितव्ये । श्री अरविन्दः प्राच्यपाश्चात्त्यज्ञानयोर्मध्ये समन्वय स्थापयितुमिच्छति, परन्तु आरम्भः स्वदेशिज्ञानेन भवितव्यः । यावत् पर्यन्तमस्माकं संस्कृतौ अस्माकं मूलानि बलिष्ठानि न भवन्ति, तावत् पाश्चात्त्यज्ञानं प्रभावोत्पादकं न भवति । श्री अरविन्दानुसारं वास्तविकराष्ट्रियशिक्षायाः लक्ष्यं सिद्धान्तनिश्चयः यत् आधुनिकसत्यस्य ज्ञानस्य वा अवहेलनं नास्ति । परन्तु अस्माकमाधारभूमिः अस्माकं विश्वासस्य, मस्तिष्कस्य, आत्मनः उपरि आश्रिता भवितव्या ।

**पाठ्यचर्या -**

श्री अरविन्दः शिक्षाक्रमस्य एकां पञ्चमुखीं योजनां प्रस्तुतवान् । तस्य सर्वाङ्गविचारधारायाः अनुसारं शिक्षायाः पूर्णतायै शिक्षायां पञ्चप्रमुखस्तराणां

विकासः भवितव्यः। एते स्तराः भौतिकः, प्राणिकः, मानसिकः, अन्तरात्मिकः आध्यात्मिकश्च । एते सर्वे स्तराः बालविकासस्य उत्तरोत्तरावस्थाः भवन्ति परन्तु अनेन एवमभिप्रेतं न भवति यत् उत्तरोत्तरप्रगतेः अवस्थासु एका अवस्था अन्यावस्थायाः स्थानं स्वीकरोति इति । जीवनस्य एते सर्वे पक्षाः महत्त्वपूर्णाः भवन्ति, आजीवनं चलन्ति च । श्री माता लिखति यत् - 'यस्य सत्यस्य अन्वेषणं वयं कुर्मः तत् प्रधानतया चतुर्भिर्वस्तुभिः निर्मितमस्ति-प्रेमा, ज्ञानं, शक्तिः, सौन्दर्यञ्च । सत्यस्य एतानि चत्वारिरूपाणि स्वयमस्माकं सत्तायाः अन्तरे अभिव्यक्तानि भविष्यन्ति । अन्तरात्मा सत्यस्य शुद्धप्रेम्णः वाहनं भविष्यति, मनः अभ्रान्तज्ञानस्य यन्त्रं भविष्यति, प्राणः एकम् अदम्यशक्ति सामर्थ्यञ्च प्रकटीकरिष्यति, शरीरं पूर्णसौन्दर्यस्य पूर्णसामञ्जस्यस्य च प्रतिमा भविष्यति '।

**शारीरिकशिक्षा -**

पञ्चमुखीशिक्षायाः प्रथमस्तरः भवति, स्वस्थशरीराय शिक्षा । शरीरमेव समस्तकर्मणां माध्यमः भवति। श्री अरविन्दस्य सर्वाङ्गयोगदर्शने शरीरस्य साधनायाः पूर्णयन्त्रनिर्माणे महत्त्वं वर्तते । सुदृढशरीरं, सुदृढास्थीनि, संवेदनशीलेन्द्रियाणि सुन्दराङ्गानि इत्यादीनां महत्त्वं स्वीक्रियते । शारीरिकशिक्षा प्रकारत्रयात्मिका -१) शारीरिकक्रियाणां संयमनम् । २) शरीरस्य सर्वेषामङ्गानां क्रियाणाञ्च सुसङ्गत (Harmoneous) विकासः। ३) शारिरिकदोषाणां निवारणम्।

शारीरिकविकासाय श्री अरविन्दाश्रमेण पांडिचेरी मध्ये विभिन्नप्रकाराणां क्रीडा व्यायामादीनामभ्यासः कार्यते, यस्मात् शरीरस्य सन्तुलितः सुसङ्गतः विकासः भवति ।

श्री मातुः अनुसारम् - 'शरीरस्य समस्तशिक्षा जन्मतः आरभ्य भवितव्या , आजीवनं प्रचलेत् च । शिक्षामभिलक्ष्य एवं वक्तुं नैव शक्यते यत् शिक्षायाः आरम्भः शीघ्रं जातो इति, बहुविलम्बं शिक्षा चलति इति वा ' ।

**प्राणिकशिक्षा -**

चरित्रनिर्माणाय प्राणिकशिक्षा आवश्यकी । सामाजिक-प्राकृतिकवातावरणे व्यक्तित्वनिर्माणे सहायके भवतः, परम् इच्छाशक्तिबलेन व्यक्तिः वातावरणमपि प्रभावयितुं प्रभवति। प्राणिकशिक्षायाम् इच्छाशक्तेः दार्ढ्यसम्पादनाय अभ्यासः कार्यते । इच्छाशक्तिः चरित्रनिर्माणञ्च नैतिकोपदेशेभ्यः न भवति, यद्यपि तस्य प्रभावः

स्वल्पमधिकं वा भवति । नैतिकशिक्षा उपदेशापेक्षया सङ्केतेन दीयते । अस्मिन् सङ्केते स्वाध्यायः, संयमः, मार्गदर्शनञ्च आयान्ति । विद्यार्थिनां सम्मुखे महापुरुषाणामादर्शाः उपस्थाप्यन्ते शिक्षकस्य चरित्रमपि संकेतकर्म करोति, छात्रान् न दण्डयित्वा आत्मविश्लेषणाय तेषाम् अवसरः देयः ।

'प्राणिकशिक्षायाः एकः पक्षः सौन्दर्यात्मकविकासः। इन्द्रियेभ्यः उचितप्रशिक्षणदानेन सौन्दर्यबोधस्य विकासः कर्तुं शक्यते । यथा शरीरस्य तस्य गतीनामेकं सौन्दर्यं भवति, तथा इन्द्रियानुभवानाम् एकं सौन्दर्यं सामञ्जस्यञ्च वर्तते । यदा यदा बालानां सामर्थ्यमवगाहनञ्च वर्धते तदा सः अध्ययनकाले एव तथाभ्यासं कुर्यात् येन सः शक्त्या यथार्थतया च साकं सौन्दर्यविषयकसुरुचेः सूक्ष्मवृत्तेश्च विकास प्राप्नुयात् । तस्मै सुन्दर-उच्च-स्वस्थमहद्वस्तूनि यानि प्राकृतिकानि मानवसृष्टानि वा प्रदर्शनीयानि, तानि अभिलषितुं तद्विषयकप्रेमकर्तुञ्च शिक्षणीयं भवेत्' ।

**मानसिकशिक्षा -**

मनः अस्माकं सत्तायाः सर्वेषु भागेषु चञ्चलभागो भवति, अतः मनोनियन्त्रणं कठिनम् । केवलं पुस्तकीयज्ञानेन तथ्यानामेकत्रीकरणेन वा मानसिकविकासो न भवति । मानसिकशिक्षा व्यक्तिगतस्तरोपरि संस्कृतेः निर्माणं करोति, तेन मनुष्यः सुसंस्कृतो भवति । सामूहिकस्तरे मनसः शिक्षा, जीविकाय सामाजिकसम्बन्धाय च उपयोगिनी भवति । सामूहिकस्तरे मानसिकशिक्षायाः त्रयः स्तराः वर्तन्ते - क) पूर्वार्जितज्ञानस्य सञ्चयः ख) नवीनज्ञानस्य अन्वेषणम्, ग) अर्जितज्ञानस्य उपयोगः।

श्री माता मनसः शिक्षायाः पञ्चाङ्गानि (५) प्रतिपादितवती -

१) एकाग्रतायाः शक्तेः जागरणम् ।

२) मनसः व्यापक-विशाल-बहुविध-समृद्धरूपेण निर्माणम् ।

३) किमपि उच्चतमं लक्ष्यं केन्द्रीकृत्य समस्तविचारैः सुसंघटनम् ।

४) विचाराणां संयमनं तथा अनिष्टविचाराणां त्यागः येन मनुष्यः इमां शक्तिं प्राप्नोति यत् सः यदिच्छति यदा इच्छति तदा तत् विचारयितुं प्रभवति ।

५) मानसिकस्थिरतातः, पूर्णशान्तेः तथा सत्तायाः उच्चतरक्षेत्रेभ्यः आगतानां अन्तःप्रेरणानाम् अधिकाधिकं पूर्णतायाः साकं ग्रहणस्य क्षमतायाः विकासः'।

श्री अरविन्दः मानसिकविकासाय योगविधिं स्वीकुरु इत्युपदिशति । यम-

नियम-आसन-प्राणायामाः छात्राणां कृते ध्यानकेन्द्रीकरणाय सहायतां यच्छन्ति ।

**आन्तरात्मिकशिक्षा -**

अन्तरात्मनः शिक्षायां जीवनस्य लक्ष्यं, भूम्यां मनुष्यास्तित्वकारणम्, जीवनान्वेषणलक्ष्यमेवं तत्परिणामाः, शाश्वतसत्तां प्रति मनुष्यस्य समर्पणमित्यादिप्रश्नाः स्वीकृताः भवन्ति । विकासस्य पूर्णप्रक्रियायाम् अन्तरात्मनः विकासः महत्त्वपूर्णस्थानं वहति । अन्तरात्मनः एतादृशी शक्तिः अस्ति यत् मानवजीवने अपेक्षितपरिणाममुत्पादयितुं शक्नोति । श्रीमातुः अनुसारं 'एतदन्वेषणं व्यक्तेः व्यक्तिगतकार्यं भवति, लक्ष्यप्राप्त्यै एकः महान् संकल्पः दृढनिश्चयः, क्रियाशीलाध्यवसायः इत्यादीनां विशेषावश्यकता भवति '। इयं शिक्षा पुस्तकद्वारा, उपदेशेन वा न दातुं शक्या । इमां प्राप्तुं योगसाधना आवश्यकी।

**आध्यात्मिकशिक्षा -**

इयं शिक्षायाः उच्चतमावस्था भवति । अस्यामन्तर्गतत्वेन शिक्षार्थी मानवीयास्थानां विश्वासानां सर्मर्पणानां च माध्यमेन विकासप्रक्रियां द्रुतगत्या अग्रे नेतुम् एकया सार्वभौमशक्त्या साकं घनिष्ठसम्बन्धं स्थापयति। मनुष्यस्य सर्वप्रकाराणां समस्यानां समाधानम् आध्यात्मिकशिक्षाद्वारा सम्भवति ।

अस्माकं व्यक्तिगत आत्मा सार्वभौमात्मना साकं सम्बन्धं संस्थाप्य, तस्य शक्तेः सौन्दर्यस्य च ह्रासं कृत्वा तं मातृशक्त्या वञ्चयित्वा अनेकसमस्याभिः परिपूर्णं कृत्वा पृथिवीं प्रति आनयति । आध्यात्मिकशिक्षाप्राप्त्यनन्तरं 'सहसा एकः आन्तरिककवाटः उद्घाटितो भविष्यति, भवान् एकं ज्वलत् ज्योतिः प्रविशति यत् भवताममरतायाः आश्वासनं प्रदास्यति तथा स्पष्टानुभवः भविष्यति यत् भवान् सदैव जीवितो भवति, भविष्यति च । नाशः बाह्यरूपाणामेव भवति, भवतः वास्तविकसत्तायाः विषये एतदपि ज्ञातुं शक्यते यत् एतानि रूपाणि वस्त्रसदृशानि भवन्ति, यानि जीर्णे सति विक्षिप्तानि भवन्ति '।

**आधुनिकशिक्षायां सर्वाङ्गदर्शनम् -**

श्री अरविन्दस्य दर्शनम् अस्याः यथार्थानुभूतेः उपरि आश्रितो भवति यत् मानवविकासः एतादृशीम् अवस्थां प्रति आयाति, यत्र बौद्धिकविकासः स्वस्य

चरमसीमा पर्यन्तं प्राप्तमस्ति । तदनन्तरम् आन्तरात्मिकः अध्यात्मिकः विकासः आगच्छति । यदि मनुष्यः एवम् अग्रेसरः न भवति तर्हि तस्य विकासः न केवलमवरूद्धो भविष्यति परन्तु सः पतने अग्रेसरो भविष्यति ।

श्री अरविन्दः मनुष्यस्य एकाङ्गिविकासेन खिन्नोऽस्ति , तदनुसारं मनुष्यस्य विकासः सर्वाङ्गीणः भवितव्यः। शिक्षायाः सिद्धान्तोऽयं सर्वमान्यो वर्तते, परं तस्य मार्गस्तु श्री अरविन्दद्वारा प्रशस्तिं प्राप । श्री अरविन्ददर्शने न तु प्राचीनभारतीयादर्शानां प्रति पलायनम्, न वा पाश्चात्त्यसंस्कृतेः अन्धानुकरणम् अस्ति । तस्य दर्शने उभयोः विचारधारयोः समन्वयः मिलति । अद्यतनकाले अस्माकं शिक्षाप्रणाल्याम् अस्य समन्वयात्मकविचारस्य स्वीकरणमावश्यक वर्तते ।

********

# उपयुक्त ग्रन्थसूची

## संस्कृतम्


1. सर्वदर्शनसङ्ग्रहः – श्री माधवाचार्यः
2. श्रीमद्भगवद्गीता – रामकृष्णमठम्
3. शिक्षायाः दार्शनिकाधाराः – डा. सोमनाथसाहु
4. भारतीयाः शिक्षाशास्त्रिणः – डा. लोकमान्यमिश्रः
5. न्यायमनोविज्ञाननयेन प्रत्यक्षविमर्शः – डा. रामचन्द्रुलबालाजी
6. साङ्ख्यकारिकाः – श्री ईश्वरकृष्णः
7. साङ्ख्यतत्त्वकौमुदी – श्री वाचस्पतिमिश्रः
8. न्यायदर्शनम् – महर्षिगौतमः
9. वैशेषिकदर्शनम् – श्री कणादमुनिः
10. वेदान्तपरिभाषा – श्री धर्मराजाध्वरीन्द्रः
11. विवेकचूडामणिः – श्री शङ्कराचार्यः
12. आत्मबोधः – श्री शङ्कराचार्यः
13. न्यायसिद्धान्तमुक्तावलिः – श्री विश्वनाथपञ्चाननः
14. सर्वदर्शनसारसङ्ग्रहः – श्री माधवाचार्यः
15. औपनिषद्शिक्षाविमर्शः (लघुशोधप्रबन्धः) – डा. प.ना.शास्त्री
16. उपनिषदिशिक्षा (लघुशोधप्रबन्धः) – प्रो. क.साम्बशिवमूर्तिः


## हिन्दी



1. भारतीय दर्शन – डा. बलदेव उपाध्याय
2. शिक्षा की दार्शनिक पृष्ठभूमि – डा. लक्ष्मीलाल के. ओड
3. भारतीय दर्शन – डा. उमेश मित्रा
4. विश्व के श्रेष्ठ शिक्षाशास्त्री – डा. रामशकल पाण्डेय

**English**

1. Out lines of Indian philosophy - M. Hiriyanna
2. Contemporary Indian philosophy - Basanth kumar lal
3. Hindu philosophy - Theosbernand
4. Out lines of Indian philosophy - J.N.Sinha
5. The six systems of Indian Phylosophy - Maxmuller

**Telugu**

1. Darshanani - Sri Achanti Laxmipati
2. Darshanamulu - Sri Peri Suryanaraya Sastry



**Shree Somnath Sanskrit University - Veraval**

Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417
e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info